ISSN NO: 2278-6163

# शिक्षावाहिनी

Vol. 12 Issue 1 2022-23

सम्पादकः
प्रो. के. के. हर्षकुमारः
आचार्यः, शिक्षाशास्त्रविद्याशाखा

सहसम्पादकः
डा. एम्. श्रीधर् राजन्
सहायकाचार्यः (अतिथिः), शिक्षाशास्त्रविद्याशाखा

शिक्षाशास्त्रविद्याशाखा
केन्द्रीयसंस्कृतविश्वविद्यालयः
संसदः अधिनियमेन स्थापितः
गुरुवायूर्-परिसरः, पुरनाट्टुकरा,
तृश्शूर्, केरलम् - 680551.







ISSN NO: 2278-6163

# शिक्षावाहिनी

## (SHIKSHA-VAHINI)

(Volume – 12) (Issue -1)

2022-23

**सम्पादकः**

**प्रो. के.के. हर्षकुमारः**

आचार्यः (शिक्षाशास्त्रविद्याशाखा)

**सहसम्पादकः**

**डा. एम्. श्रीधर् राजन्**

सहायकाचार्यः (अतिथिः) (शिक्षाशास्त्रविद्याशाखा)

**शिक्षाशास्त्रविद्याशाखा**

**केन्द्रीयसंस्कृतविश्वविद्यालयः**

**संसदः अधिनियमेन स्थापितः**

**गुरुवायूर्-परिसरः, पुरनाट्टुकरा, तृश्शूर्**

**केरलम् – 680551**

# शिक्षावाहिनी SHIKSHA-VAHINI

## (Journal in Education)


**© All Rights Reserved**


| | | |
|---|---|---|
| **ISSN** | **:** | **2278-6163** |
| **First Impression** | **:** | **March, 2023** |
| **No. of Copies** | **:** | **150** |
| **Chief Editor** | **:** | **Prof. K.K. Harshakumar**<br>School of Pedagogy,<br>Guruvayoor Campus,<br>Puranattukara, Thrissur<br>Kerala – 680551. |
| **Sub Editor** | **:** | **Dr. M. Sridhar Rajan**<br>**Guest Faculty,**<br>(Assistant Professor Grade)<br>School of Pedagogy,<br>Guruvayoor Campus,<br>Puranattukara, Thrissur<br>Kerala – 680551. |
| **Editorial Board** | **:** | **Prof. K.K. Shine, Head**<br>**Prof. Chandrakanth C**<br>**Dr. K. GiridharaRao**<br>**Dr. VenugopalaRao**<br>**Dr. P. Vidyadhar**<br>**Dr.Shyamraj. C** |
| **Typed by** | **:** | **Faculties and Students** |
| **Type Setting** | **:** | **Dr. M. Sridhar Rajan** |
| **Cover Design** | **:** | **Dr. M. Sridhar Rajan** |
| **Published by** | **:** | **Bhavana Print Factory** |

# सम्पादकीयम्

सर्वलोकवर्तिनाम् अज्ञानरूपं तिमिरेण जतायाः अन्धतायाः नाशयन् चक्षुषम् उन्मीलने अद्वितीयशक्तिमान् मूलविराठ् भवति शिक्षा। अनयैव शिक्षया मूढावस्थायां विद्यमानलोकः तत्त्वज्ञानं प्राप्नोति।अपि च शिक्षा व्यक्तिषुसमुदायेषुसमाजेषु च अपेक्षितपरिवर्तनं करोति।

तत्र शिक्षकाः परिवर्तनस्य मुख्यभूताः भवन्ति। समर्पणेनउत्साहेनकौशलेनच, ते छात्राणां ज्ञानजालम्उन्मोचितुं मार्गदर्शनं कुर्वन्ति।ते विद्यार्थिनः जिज्ञासां समालोचनात्मकचिन्तनस्य सृजनात्मकशक्तेश्चच संवर्धयन्ति। प्रभावशाली-शिक्षकाः केवलं शैक्षणिकं ज्ञानं ददति, किन्तु मूल्याणि, नैतिकताः सामाजिकदायित्वं च वहन्ति। तादृशशिक्षकाणां निर्माणे सम्पूर्णोत्तरदायित्वं शिक्षाशास्त्रविभागस्य वर्तत इति महतोऽयं गर्वः। तदीयकार्येषु विशेषतया, सुस्थिरतया, सुस्पष्टतया च ज्ञानप्रस्तुतीकरणाय, ज्ञानप्रचारप्रसाराय च क्रियामाणं कार्यं भवति पत्रिकाप्रकाशनम्। इदं सारस्वतकार्यं सम्पूर्णप्रपञ्चे विद्यमानान् सर्वान् साक्षरान् विकासपथम् अधिरोहितुं सहकुरुते। अध्यापकानां छात्राणाञ्च समालोचनात्मक-चिन्तनाय, विश्लेषणाय च प्रोत्साहयति ।

तत्कर्मणि अस्माकं विभागः निरन्तरं प्रवर्तते। तथा च यः शिक्षालोककल्याणाय, छात्रकल्याणाय च समग्रशिक्षाजगति विलसमानः एकैकः बहुपरिसरयुक्तः केन्द्रीयसंस्कृतविश्वविद्यालयः दिल्लीनगरं मुख्यालयरूपेण संस्थाप्य आभारतं विराजते। तस्य परिसरेषु अन्यतमः परिसरः गुरुवायूर्-परिसरः । परिसरेऽस्मिन् शिक्षाशास्त्रिविभागेन प्रतिवर्षमिव अस्मिन्नपि वर्षे ISSN संख्यया युक्ता शिक्षावाहिनी इति विभागीया शोधपत्रिका प्राकाश्यत इति महतः प्रमोदस्य विषयः। अस्यां पत्रिकायां विभागीयाध्यापकानां शिक्षाशास्त्रिच्छात्राणाञ्च शोधप्रबन्धाः लेखाश्च शिक्षालोककल्याणाय उपकुर्वन्तीति आशास्महे ।

शिक्षावाहिनी पत्रिकायाः सम्पादकरूपेण अवसरं प्रदाय पत्रिकायाः गुणवत्तावर्धनाय मार्गदर्शनेन आशीर्भिश्च अनुगृहीतवद्भ्यः शिक्षासङायप्रमुखेभ्यः परिसरप्राचार्येभ्यः प्रो. ललित कुमार साहू वर्येभ्यः, समये समये समुचितमार्गनिर्देशनेन प्रोत्साहितवद्भ्यः विभागाध्यक्षेभ्यः डा.के.के. शैन्-वर्येभ्यः. प्रबन्धानां संशोधनकर्मणि सहकृतवद्भ्यः सर्वेभ्यः विभागीयाध्यापकेभ्यःप्रो. चन्द्रकान्तः सि महोदयेभ्यः, डा. के. गिरिधररावमहोदयेभ्यः, डा. डि. वेणगोपालरावववर्येभ्यः, डा. प्रभल विद्याधरवर्येभ्यः, डा. श्यामराजः सि

महोदयेभ्यः धन्यवादान् वितन्वः। प्रबन्धानां टङ्कनकर्मणि सहकृतवद्भ्यः अध्यापकेभ्यः शिक्षाशास्त्रिद्वितीयवर्षच्छात्रेभ्यः साधुवादान् समर्पयावः । अत्यन्तसुन्दररूपेण मुखपुटं सज्जीकृतवत्यै पत्रिकायाः सुचारुमुद्रणं कृतवत्यै संस्थायै तथा मुद्रणालयप्रतिनिधिभ्यः धन्यवादं वितन्वः।

इत्थम्

**प्रो. के.के. हर्षकुमारः,**

**डा. एम्. श्रीधर् राजन्**

# आशीर्वचांसि

केन्दीयसंस्कृतविश्वविद्यालयस्य गुरुवायूर्-परिसरस्य शिक्षाशास्त्रविभागेन प्रतिवर्षमिव ऐषमोऽपि "शिक्षावाहिनी" नाम्नी वार्षिकी पत्रिका प्रकाश्यत इति सुमहत आनन्दस्य विषयः। विभागेऽस्मिन् विद्यमानाः अध्यापकाः, प्राध्यापकाः, आचार्याः विभागमुख्याश्च सर्वे सम्मिल्य एतस्याः पत्रिकायाः सम्पादने प्रकाशने च आत्मनः नियोजयित्वा आत्मनां कर्मभिः विभागीयच्छात्राणां सुमहदुपकारं साधयन्ति । किञ्चानया छात्राणां छात्रीणाञ्च लेखप्रकाशनेन ते ताश्चोत्साहिता भवन्ति येन विभागस्य प्रचारप्रसाराभ्यां सह परिसरस्यापि यशः सुदूरप्रसारि भूयात्।

अतोऽवसरेऽस्मिन् शिक्षावाहिन्याः सम्पादकौ प्रो. के.के. हर्षकुमार्, एवं डा. एम्. श्रीधर् राजन् महोदयौ, आचार्याः के. के. शैन् महोदयाः सम्पादनमण्डल्यां विद्यमाना अन्ये बान्धवश्च, येषां सहयोगेन कठोरपरिश्रमेण च पत्रिकेयं पूर्णतां गता तेषां समेषां कृते साधुवादैः पत्रिकायाः उत्तरोत्तरसमुन्नतिमिच्छामि । किञ्च पत्रिकेयं संस्कृतशिक्षाजगतः कल्याणं विदधातु इति बुद्ध्या परमकारुणिकस्य भगवतः गुरुपवनपुरीशं श्रीकृष्णं सम्प्रार्थयामि।

**प्रो.ललितकुमारसाहुः**

**निदेशकः**





**Prof. SrinivasaVarakhedi**
**Vice Chancellor**

**Prof. Ranjit Kumar Barman**
**Registrar**



**Prof. Lalit Kumar Sahoo**
**Director**

## Faculty Members



Prof. K.K. Shine
Head of the Department



Prof. Chandrakanth C
Professor



Dr. K.K.Harshakumar
Professor



Dr. K. GiridharaRao
Assistant Professor



Dr. VenugopalaRao
Assistant Professor



Dr. P. Vidyadhar
Assistant Professor



Dr.Shyamraj. C
Assistant Professor



Dr. M. Sridhar Rajan
Assistant Professor (Guest)



Smt. Vijayalakshmi
Assistant

# विषयानुक्रमणिका


सम्पादकीयम्

आशीर्वचांसि

विभागाध्यापकानां चित्राणि

| क्र.सं. | विषयः | लेखकः | पृ.सं. |
|---|---|---|---|
| 1. | शिक्षकप्रतिज्ञा | - प्रो.चन्द्रकान्तः | 01 |
| 2. | संस्कृतविश्वविद्यालयानां भविष्यत्कर्याचरणानि | -डा.डि.वेणुगोपालरावः | 02 |
| 3. | शिक्षकानाम् आचारसंहिता | - डा. एम्. श्रीधर् राजन् | 08 |
| 4. | सरलमानकसंस्कृतंनःधियःप्रचोदयेत् | - जअनिच्छङ्करः | 12 |
| 5. | छात्रेषुअध्यापकानांप्रभावः | - श्रीलक्ष्मीके | 16 |
| 6. | संस्कृभाषाद्वाराभारतस्यअभिवृधिः | - अभिरामिटि. एस् | 17 |
| 7. | यौनशिक्षा | - अतुल्श्रीराग्केआर् | 18 |
| 8. | अनुसन्धानविधयः | - अरुन्धतीचक्रवर्त्ती | 19 |
| 9. | त्रिभाषासूत्रंसंस्कृतञ्च | - सुवलकुमारमिश्र | 22 |
| 10. | आधुनिकवातावरणानुगुणंसंस्कृतशिक्षणस्यपुनर्नवीकरणम् | - *मुक्ताएम्वी* | 24 |
| 11. | छात्राधिगमेविद्यालयातिरिक्तशिक्षणस्यप्रभावः | - अञ्जना. एस्. | 26 |
| 12. | ब्रह्मचर्यम् | - विवेककुमारमिश्र | 28 |
| 13. | आयुर्वेदस्यसिंहावलोकनम् | - वैष्णा | 29 |
| 14. | शास्त्रानुगुणदिनचर्या | - मणिरमणठाकुर | 30 |
| 15. | कक्षावातावरणनिर्माणेशैक्षिकप्रविधिशास्त्रम् | - नितुराणीराउत | 32 |
| 16. | मर्मणांप्राधान्यम् | - अञ्जनाकेके | 35 |
| 17. | ओडिशाराज्येमहिलासशक्तिकरणम् | - बैशाखीकुन्डु | 36 |
| 18. | भारतीयसंस्कृतौनारीणांस्थानम् | - गीताराणीमिश्र | 38 |
| 19. | शिक्षणकर्माणिअन्तर्जालस्यविनियोगः | - झरणासाहु | 40 |

| | | | |
|---|---|---|---|
| **20.** | **स्मृतिशास्त्रेषुदायभागनिर्णयः** | - कान्हुचरणमिश्रः | **42** |
| **21.** | **किं संस्कृतंराष्ट्रभाषाभवितुमर्हति ?** | - मधुस्मितापाणिग्राही | **45** |
| **22.** | **वयंसंस्कृतच्छात्राः** | - मनोरञ्जन्पाणि | **48** |
| **23.** | **संस्कृतभाषाशिक्षकस्यव्यक्तित्वंकार्याणिच** | - पद्मिनीप्रियदर्शिनीरणसिंह | **48** |
| **24.** | **अध्यापकप्रशिक्षणेशिक्षणाभ्यासः** | - प्रतिक्ष्यारौट्रि | **49** |
| **25.** | **अभिज्ञानशाकुन्तलेतात्कालीनंसामाजिकचित्रम्** | - पुजाराणीराऊत | **53** |
| **26.** | **भारतेअध्यापकशिक्षा** | - पूर्णिमामहान्ति | **55** |
| **27.** | **नवशिक्षानीतिःशिक्षागुणवत्ताच** | - शिल्पाआर्. एस्. | **58** |
| **28.** | **संस्कृतभाषायाःमहत्त्वम्** | - शुभश्रीज्योतिषी | **59** |
| **29.** | **रक्षाकवचोधर्मः** | - स्मरणिकादास् | **60** |
| **30.** | **आदिशङ्करः** | - श्रुतिःसि.के. | **62** |
| **31.** | **प्रौढशिक्षा** | - कमालिनीस्वैन् | **64** |
| **32.** | **कलिङ्गानांलोकसंस्कृतिः** | - तपनकुमारदाश | **66** |
| **33.** | **दर्शनसारसंग्रहः** | - अश्वती P.G. | **69** |
| **34.** | **भारतीयज्ञानपरम्परायांसंस्कृतस्ययोगदानम्** | -प्रद्युम्नकुमारः | **71** |
| **35.** | **वृक्षायुर्वेदस्यमहत्वम्** | - अमृतापिएस् | **72** |
| **36.** | **भारतस्यप्राचीनशिक्षा-व्यवस्था** | - शुभलक्ष्मीरायगुरु | **75** |
| **37.** | **महाराणाप्रतापस्यजीवनम्** | - सागरगौतमः | **76** |
| **38.** | **श्रीनारायणपट्टपादकृतम्नारायणीयम्** | - काव्यापीयू | **78** |
| **39.** | **प्रभावीपठनम्** | - श्रीकान्तःके.पि. | **80** |
| **40.** | **राष्ट्रियशिक्षानीतिः2020** | - नरेश्एक्का | **81** |
| **41.** | **आधुनिकसमाजेव्यवहारस्यप्रासङ्गिकता** | - अङ्कितागिरि | **83** |
| **42.** | **छात्राणांकृतेसङ्गणकस्यउपयोगः** | - श्वेतासन्तोष् | **85** |

| | | | |
|---|---|---|---|
| **43.** | **शिक्षकस्य कृते प्रशिक्षणस्य आवश्यकता** | - स्मिता माला | **85** |
| **44.** | **प्राचीनकाले कृषिविज्ञानम्** | - स्नेहा. के | **88** |
| **45.** | **शिक्षा और परीक्षा** | - शुभश्री महान्ति | **90** |
| **46.** | **हिन्दी भाषा का उद्भव तथा विकास** | - सुस्मिता प्रधान | **92** |
| **47.** | **गुरुकुल शिक्षा** | - असिमा बेहेरा | **93** |
| **48.** | **Gender Issues in Schools** | - Aparna V | **94** |
| **49.** | **Understanding the Economy in India** | -Sruthi K | **96** |
| **50.** | **Vrukshayurveda in the Puranas** | -Surya Gopinath K | **97** |

## शिक्षकप्रतिज्ञा

**प्रो.चन्द्रकान्तः,**

शिक्षाविभागः

बहोः कालादारभ्य मनसि किञ्चन चिन्तनं प्रचलदासीद्यद् सर्वासां संस्थानां वा सर्वकारीयविभागानां वा कस्यचिदुद्दिष्टकार्यक्रमस्य वा निश्चयेन किञ्चन ध्येयवाक्यमाहोस्वित् प्रतिज्ञावाक्यं भवत्येव तदनु संस्कृतशिक्षकप्रशिक्षणस्यापि तादृशं प्रतिज्ञावाक्यमपेक्षत इति। यथा- "अहर्निशं सेवामहे" इति भारतीयडाक्कार्यालयस्य, "योनूचानः सनो महान्" इति केन्द्रीयसंस्कृतविश्वविद्यालयस्य, "सत्यमेव जयते" इति भारतसर्वकारस्य,"धर्मचक्रप्रवर्तनाय" इति लोकसभायाः,"योगक्षेमं वहाम्यहम्" इति भारतीयजीवविमानिगमस्य च वर्तन्ते। एतादृशचिन्तनसमये एव मम मित्रवर्यः आचार्यः हर्षकुमारःमां प्रैरयद्यद्भवान् शिक्षाशास्त्रिच्छात्रप्रेरकान् कांश्चन श्लोकान् लिखत्विति। तेन समुत्साहितोऽहं कर्मण्यस्मिन् झटित्येव प्रवृत्तोऽभवम्। तत्फलरूपेण श्लोकत्रयं मन्मानसपटलान्निर्गत्य मूर्तरूपमवाप्नोत्। तदत्र लिपिबद्धं भवतां पिपठिषूणां भाविनि शिक्षकाणामुपयोगाय कल्पतां तथैव शिक्षणकार्यारम्भतः पूर्वं सङ्कल्पनाय भवत्वित्याशासे।

**शिक्षकोऽहं भविष्यामि शिक्षाशास्त्रं पठामि च ।**

**पाठयामि सदा सम्यक् पठामि च पुनः पुनः ।।१।।**

**शिक्षणस्य कृते जीवन् कुर्वन् छात्रहितं सदा ।**

**नित्यं यच्छामि शिक्षां वै बालानां बुद्धिशुद्धये ।।२।।**

**नित्यं स्मरामि शिक्षायाः प्रक्रियां पद्धतिं हृदा ।**

**छात्रप्रीतिमवाप्नोमि वन्दे शिक्षकदैवतम् ।।३।।**

(कर्ता-प्रो.चन्द्रकान्तः,शिक्षाविभागः)

★★★★★

## संस्कृतविश्वविद्यालयानां भविष्यत्कर्याचरणानि

**डा.डि.वेणुगोपालरावः,**

सहायकाचार्यः

**पीठिका -**

सूत्रे मणिगणाः, वस्त्रे तन्तवः, आत्मनि इन्द्रियाणि यथा स्वास्तित्वमासाद्य भवन्ति तथैव सना भारतीयानां मनांसि सामाजिकविषयेषु संस्कृतिं संस्कृतञ्चैव समाश्रयन्ति। एतस्मात् कारणात्तदा प्राचीनभारतीयसमाजे शिक्षानीतीनामपेक्षा नानुभूता आसीत्। परमा, दुरत्यया, अव्ययी त्रिगुणमयी, लोककल्याणकारी, सुखप्रदा, शान्तिमयी च तत्कालिकशिक्षानीतिः जगद्गुरुनियता आसीत्। परन्त्वधुना शिक्षानीतिः समाजाश्रितेत्यतः शिक्षानीतिनिर्माणे समाजस्य समस्तक्षेत्राधिकारिणः स्वकार्यक्षेत्रप्रगत्यै तत्कालिकसमाजौन्नत्यै च प्रदत्तमनस्काः प्रयतन्ते। स्वतन्त्रभारतेऽपि पाश्चात्यविचाराचाराहारगुणमयभावैः भारतीयैः संस्कृतं तथा संस्कृतिः इति प्रतिष्ठे विहाय बह्व्यः शिक्षानीतयः आरचिताः याभिः मानवस्यास्तित्वं प्रश्नार्थके अपतत्। इमां प्रश्नार्थकसमस्यां तरणाय, दूरीकरणाय तथा संस्कृतसंस्कृतिमूल्योपेतस्य नवीनभारतस्य निर्माणाय चाधुनेयं नवशिक्षानीतिः **(NEP2020)** भारतसर्वकारेण उद्घोषिता। आधुनिकशिक्षाप्रकृतिप्रवृत्त्या पाश्चात्यभावमायापहृतज्ञानेन च विगतस्पृहाः भारतीयाः सर्वे पुनः भारतीयसंस्कृतेः तथा तदाधारभूतसंस्कृतज्ञानविज्ञनयोः च संरक्षणे अनया लब्धमतयः यशस्विनश्च सञ्जाताः इति मोदात्मकविषयः भवति। संस्कृतशिक्षोपासकाः सार्थकजीवने सक्षमाः भवेयुरिति बहुलविषयकशिक्षावसरान् कल्पयन्तीयमधुना नवशिक्षानीतिः (NEP2020) नियतस्वस्वरूपसाधने तर्कवितर्कवादविवादचर्चासंवादीन् समाश्रित्य जनजिह्वस्था विराजते। नवशिक्षानीतेः (NEP2020) अस्याः भौतिकावस्था शैशवावस्थैव, परन्तु विषयपरकावस्था तु वयोजनावस्था भवति। अस्याः विषयविचारावस्था तु अनन्ता, विशदा, विशाला, सापेक्षिता, स्वोचिता, आचरणसाध्या, औपयोगिकी, स्वास्तित्वनियता, कौशलाधारा च भवति। इदमित्थमिति यस्मै कस्मै क्षेत्राय मानवाय वा प्राधान्यमदत्वा समग्रसम्पूर्णकौशलयुतस्य मानवस्य क्षेत्रस्य वा अपेक्षां सूचयतीयं नवशिक्षानीतिः (NEP2020)। विचारेऽस्मिन् संस्कृतक्षेत्रस्थाः शिक्षाविदश्च नवशिक्षानीत्यनुगुणं संस्कृतविश्वविद्यालयानां स्वरूपनिर्माणे प्रदत्तमनस्कास्सन्तः नैकेषु कार्येषु कार्याचरणरताः विद्यन्ते। सन्दर्भेऽस्मिन् **संस्कृतविश्वविद्यालयानां भविष्यत्कार्याचरणं कथं स्यादिति** केन्द्रीयसंस्कृतविश्वविद्यालयस्यादेशं मनसि निधाय यथामति चिन्त्यते।

**पत्रस्य लक्ष्यप्रस्तुतिः -**

पुरा भारतसमाजः संस्कृत्या संस्कृतभाषया च पोषितः समाधारितश्च आसीदिति समतीतानां वर्तमानानां च समाजः, संस्कृतिः, सम्प्रदायः, आचारः, साहित्यं तथा शिक्षाव्यवस्था इत्येतेषामेव विचाराप्रमाणैः ज्ञायते। गुरुकुलानि, ऋषिकुलानि, मुनिकुलानि, साध्वारामाः, देवालयाः, अग्रहाराः, आश्रमाः च संस्कृतशिक्षायाः प्रचारे प्रसारे च आसन्निति सर्वविदः निगदन्ति। भारतं **"जगद्गुरुः"** इत्याह्वाने अस्य संस्कृतस्यैव योगदानमनुपममासीत्। भारते वैदेशिकानामागमनपर्यन्तं भारतीयसमाजिकक्षेत्रेषु सर्वेषु संस्कृतभाषायाः विचारः अव्यक्तः, अचिन्त्यः, अविकार्यः, अच्छेद्यः, अदाह्यः, अक्लेद्यः, अशोष्यः, अचलः, सर्वगतः, स्थाणुः, नित्यश्चासीत्। पश्चात्तु कालक्रमे जनानां

प्रमादमोहकलिलाभ्यां समागतानां परिवर्तनानां कारणैः संस्कृतभाषायाः विचारः सामाजिकक्षेत्रेषु सर्वेष्वपि प्रश्नार्थकः समभूत्। पुरा सनातनभारतीयसमाजः बहुधा विविधैः विषयक्षैत्रैः विभक्तश्चेदपि मोक्षप्राप्तिः, आत्मसाक्षात्कारः, शीलता, चारित्र्यता, सत्यम्, अहिंसा, अक्रोधः, शान्तिः, क्षमा, धर्मः, मानवता, मानवसेवा इत्यादि दैविकसात्विकभावानाधाय संस्कृतमेकमेव सर्वसाधकत्वेन अङ्गीचकार। भावना त्वैषाधुना पाश्चात्यानामतत्त्वार्थबुद्धेः, तज्ज्ञानस्य च प्रभावेण भारतीयसमाजे आच्छादिता, अदृश्यमाना च विद्यते। राजसतामसगुणपूरितानां भारतेतरशिक्षाविदां पृथग्विधान् नानाभावान् समाश्रयन्तः भारतीयाः समाजिकसमस्तक्षेत्रेषु तदेव ज्ञानमिति तुष्यन्तः स्वनिजमार्गात् विगतस्पृहाः, भ्रष्टाचारिणस्सन्तः भारतभुवि भारभूता इव जीवनं यापयन्ति। स्वातन्त्र्याकांक्षाकालादेव अस्याः परिस्थितेः दूरीकरणं कृत्वा पूर्ववैभवेन सह नवभारतसमाजनिर्माणाय भारतीयाः प्रयतन्ते। प्रयत्नेषु एतेषु शिक्षाव्यवस्थां भारतीयसमाजव्यवस्थायाः जीवातुरिव सम्भाव्य प्रस्तुताः शिक्षानीतयः नैकाः विद्यन्ते। तासु **नवशिक्षानीतिः (NEP2020)** इति काचिदतिविशिष्टा विद्यते।

प्रधानतया प्राच्यपाश्चात्यविवादकालात् यः साहित्यगतः, भाषागतः. शिक्षागतो वा विचारः भारतीयजनमनांसि निष्पीडयति, स एवाधुनापीति कथने नातिशयोक्तिः। स्वातन्त्र्यभारतेऽपि सम्पूर्णशिक्षामूलां पराञ्चेमां संस्कृतभाषां मुक्तकण्ठेन, सुस्पष्टतया वा शिक्षानीतिषु उद्घोषयितुं वैश्विकभीत्या ऊहापोहापवादमनसा भारतीयाः एव अबलाः संलक्ष्यन्ते। **"सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यमप्रियम्"** इति श्रुतिवाक्यं पालयन्तः **नवशिक्षानीतेः**(NEP2020) समितिजनाश्च तथैवाधुना शिक्षानीत्यां संस्कृताय स्थानमयच्छन्। तथापि संस्कताय स्थानम् अस्ति, नास्ति, विकल्पः, ऐच्छिकः, सम्पूर्णतया संस्कृतसंस्कृतिमयः, साधयितुं शक्यं इति बहुधा संस्कृतशिक्षाविद एव पृथक् पृथक् सहर्षं तुमुलैः स्वशब्दैः व्याख्यानप्रक्रमेण निगदन्ति। आरम्भस्तरात् विश्वविद्यालयस्तरं यावत्सर्वे संस्कृतविद्यालयाः, महाविद्यालयाः, आदर्शमहाविद्यालयाः, संस्कृतविश्वविद्यालयाः तथा तदाश्रिताः सर्वे संस्कृतजनाश्च नियतरूपेण प्रतिदिनमधुना संस्कृतं तथा संस्कृतिं च समाश्रित्य न्यूनातिन्यूनं प्रार्थनां शान्तिपाठं वा समायोजने अशक्ता इव दृश्यन्ते। संस्कृतक्षेत्राणामस्यां वर्तमानस्थितौ **भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा** इत्युक्तिं, तथा **नवशिक्षानीतेः (NEP2020)** आशयञ्च मनसि स्थिरीकृत्य, संस्कृतविश्वविद्यालयान् बहुलविषयकसंस्कृतविश्वविद्यालयत्वेन (Multidisciplinary Central Sanskrit Universities) परावर्तनाय भविष्यत्कार्याचरणविचारसन्दर्भे यथामति विचार्यते।

**संस्कृतविश्वविद्यालयानां भविष्यत्कार्याचरणम् -**

सूक्ष्मेक्षिकया भारतेतिहासस्य भारतसंस्कृतसाहित्यस्य, भारतशिक्षेतिहासस्य चाध्ययनेन सर्वा समस्ता च प्राचीनभारतीयशिक्षाव्यवस्था यादृच्छिकी आसीदिति, कालक्रमेण तत्र फलाकाक्षिभिः जनैः स्वापेक्षितरूपेण औपचारिकता समानीता इति कश्चन विषयः बोधितो भवति। कस्यचित् व्यक्तेः, वस्तुनः, पदार्थस्य वा भविष्यं तत्तत्क्षेत्रस्वरूपमाधारीकृत्य भवति। यथा यावन्ति विशालक्षेत्रणि, तावन्तः वृक्षाः, तथैव तावन्ति फलानि, तदनु जनावसरपूर्तिश्च भवतीति विदितांश एव। यदि अपेक्षितक्षेत्रमेव न भवति, तर्हि तदनुगुणमेव फलानि भवन्ति, प्रजावसराश्च पूर्यन्ते च। प्रसङ्गेऽस्मिन् प्राचीनभारतीयशिक्षाव्यवस्थां तथा वर्तमानसंस्कृतविश्विद्यालयस्वरूपताञ्च मनसि निधाय संस्कृतविश्वविद्यालयानां भविष्यत्कार्याचरणविषये यथामति मौलिकाधारभूतस्तम्भात्मकाः चत्वारः विचाराः प्रस्तूयन्ते।

**संस्कृतविश्वविद्यालयानां भौतिकता -**

अयं विचारः संस्कृतविश्वविद्यालयानाम् आधारभूतभविष्यत्कार्याचरणस्तम्भेषु प्रथमः । सुविशाले, एकान्तप्रदेशे, प्रशान्तवातावरणे, निर्जनदेशे, वने, अरण्ये, नदीतटे, पर्वतप्रान्ते, बहिर्प्रान्ते, प्राकृतिकसंसाधनस्थले, आध्यात्मिकभूमौ, परिवारे, गुरुकुले वा प्राचीनभारतीयसमाजे संस्कृतशिक्षाकेन्द्राणि आसन्। परन्त्वधुना नेयं स्थितिरवलोक्यते । सामान्यविश्वविद्यालयैस्सह संस्कृतविश्वविद्यालयाः अपि देशकालस्थित्यवसरफलाकांक्षया तत्तत्स्थानात् परावर्त्य स्वरूपत एव भिन्नत्वेन स्थापिताः स्थाप्यन्ते च। विचारेऽस्मिन् नवशिक्षानीतौ (NEP2020) उच्चशिक्षास्वरूपे प्रतिपादितविषयाः 10, 10.1, 10.2 ( It is Time to that India bring back this great Indian tradition) अवधेयाः वर्तन्ते। प्राचीनभारतीयबहुविषयकसंस्कृतविश्वविद्यालयेषु प्रत्येकं छात्रः शास्त्रान्तरविषयैस्सह कथञ्चित् परिचितः प्रभावितश्च भवतिस्म। अधुना संस्कृतविश्वविद्यालेषु इयं स्थितिः नास्ति। संस्कृतविश्वविद्यालयाः वैश्विकस्तरे विषयाध्ययनाय अयोग्याः वर्तन्ते। प्रत्यक्षतया, यथार्थरूपेण च समाजावसरविचारान् त्यक्त्वा, सामान्यविषयैरेव वर्तमानाः संस्कृतविश्वविद्यालयाः शक्तिहीनाः दृश्यन्ते।

आध्यात्मविद्या, योगविद्या, आयुर्वेदविद्या, कलात्मकविद्या, रसायनविद्या, आभियान्त्रिकविद्या, तथा तदपेक्षितकौशलशिक्षा इति नैकप्रकारकशिक्षाभ्यः संस्कृतविश्वविद्यालयाः दूरस्थाः अभवन् । तत्र प्रधानं कारणं विश्वविद्यालयेषु अपर्याप्तक्षेत्रक्षेत्रज्ञाभाव एव भवति। संस्कृतविश्वविद्यालयानां कृते अपेक्षितस्थानमपि न भवति, न कल्प्यते च सर्वकारेण। संक्लिष्टे अत्यल्पस्थाने एव परिमितभवनैः निर्दिष्टकार्येणैव संस्कृतशिक्षाकेन्द्राणि कार्यसाधकानि विद्यन्ते। प्राचीनभारतीयैः प्रदत्तानि विशालसंस्कृतक्षेत्राणि संस्कृतज्ञैः न रक्षितानि च। सम्प्रति नैकेषु राज्येषु विद्यमानपरिसराः तथा तद्गतसंस्कृतक्षेत्राणि च विभिन्नसंस्थाभिः अक्रमरूपेण बलान्नीयमानानि सन्ति। भविष्यदि इयमवस्था बहुलमाध्यमिकसंस्कृतविश्ववियालयानां कृते नोचिता भवति। नलन्दा, तक्षशिला, विक्रमशिला इत्येतेषु एककाले एव त्रिसहस्राधिकाः नानाविधशास्त्रजिज्ञासवः छात्राः, शिक्षकाः सम्भूयैव अध्ययनकार्यणि साधयन्ति स्म इति प्रमाणानि प्रत्यक्षाणि एव। तथैव आधुनिकसंस्कृतविश्वविद्यालयानां बहुलविषयकसंस्कृत-विश्वविद्यालयत्वेन परावर्तनाय, परिवर्तनाय वा प्रप्रथमतया विशालक्षेत्राणि समाजात् सर्वकाराद्वा संरक्षणीयानि, सम्पाद्यानि च भवन्ति, यथा सदैवैककाले सहस्रसंख्याकानां नैकप्रकारकशास्त्रजिज्ञासूनां च मेलनमध्ययनाय प्राकृतिकरूपेण सम्भवति स्म।

**संस्कृतविश्वविद्यालयेषु संसाधनव्यवस्था** –

अयं विचारः संस्कृतविश्वविद्यालयानाम् आधारभूतभविष्यत्कार्याचरणस्तम्भेषु द्वितीयः । मानवभौतिकार्थिकसंसाधनानां व्यवस्थयैव आधुनिकानां विश्वविद्यालयानां संस्कृतविश्वविद्यालयानां वा गतिविधयः सुसाध्याः भवन्तीति कथने नातिशयोक्तिः। परन्तु निशततया परिशीलयामश्चेत् वर्तमानसमाजे नैकाः संस्कृताध्ययनसंस्थाः, विद्यालयाः, महाविद्यालयाः, आदर्शमहाविद्यालयाः संसाधनानामभावात् स्थगिताः जनशून्याश्च विद्यन्ते। अतः ज्ञानविज्ञानयोः संस्थारूपेण विश्वप्रसिद्धाः प्राचीनसंस्कृतविश्वविद्यालया एवात्र आदर्शभूतत्वेन स्वीकरणीयाः। पुरा तु तत्कालिकैः सामाजिकैः शैक्षिककार्यक्रमैः एव संसाधनानां संसाधने संस्कृतविश्वविद्यालयाः सक्षमाः आसन् । योगिनः, मुनयः, ऋषयः, राजानः, आस्थानिनः, प्रजाधिकारिणः, समाजोद्धारकाः, कवयः, दातारः, संस्कृतानुरागिणः, आध्यात्मिकपरायणाः, शान्तिप्रियाः, वैराग्यस्वभाविनः इत्थमनेके जनाः संस्कृताधिष्ठानेभ्यः संसाधनानि प्रयच्छन्ति स्म। देवालयेषु, उत्सवेषु, सांस्कृतिककार्यक्रमेषु तथैव सामाजिककार्यक्रमेषु सर्वेषु

संस्कृताधिष्ठानपक्षतः एव प्रतिनिधयः भागं स्वीकृत्य वैविध्यपूर्वकाणि तानि संस्कृतसांस्कृतिककार्याणि सम्पाद्य च प्रजाभ्यः संसाधनानि प्राप्नुवन्ति स्म। पुरा वैदिकमन्त्रोच्चारणपारायणाध्यात्मिककार्यक्रमैः, साहित्यसंङ्गीतकलाकलापैः, यज्ञायुर्वेदविज्ञानोपचारैः, काव्यकवितारचना-प्रवचनैः, युद्धकौशलपाठनेन च संस्कृताधिष्ठानानि जगद्विख्यातानि संसाधनभरितानि च आसन्। वर्तमानाः संस्कृतविश्वविद्यालयाः एतादृशैः कार्यक्रमैः पृथक्कृताः विद्यन्ते। सम्प्रति संस्कृतेतरसंस्थाः आध्यात्मिका, सांस्कृतिकता, मनोरञ्जनम्, आनन्दानुभूतिः, मूल्यपरिरक्षणं, मानवसेवा, सहानुभूतिः इत्येवं संस्कृतसाहित्यगतमूल्यान्याश्रित्य संसाधनैः पूरिताः विराजन्ते। प्रजाः संस्कृतविश्वविद्यालयान् हैन्दवमतप्रचारकसंथा इव गणयन्तीति अनपेक्षितभीत्या तत्तत्प्रभावात्मकमूल्यकार्याणि त्यक्त्वा स्वास्तित्वरक्षायै अधुना संस्कृतविश्वविद्यालयाः यतमानाः सन्ति। एतस्मादतत्त्वार्थचिन्तनात् निश्चितरूपेण संस्कृतविश्ववाद्यालयाः विमुक्ताः भवेयुः।

यथा कथमात्मानं रक्षतीति अज्ञात्वैव **कलियुगदेवं श्रीवेङ्कटेश्वरं** केवलम् आध्यात्मिकभावनया, विश्वासेन च नमस्कृत्य, सम्प्रार्थ्य च भक्ताः प्रतितिनं कोटिशः रूप्यकाणि संस्थायै समर्पयन्ति, यथार्थतया निर्माणपद्धतिमज्ञात्वैव जनाः **रामदेव बाबा** पतञ्जलिसंस्थां समाश्रिताः, सम्पोषताः, संरक्षन्तश्च सन्ति, रामनिर्माणोद्घोषणेनैव कोटिशः अपरिमितधनराशिः सामाजिकपक्षतः एकत्रीकृतः तथैव संस्कृतविश्वविद्यालयाः निजकार्यक्रमैः भविष्यत्कार्याचरणे अग्रे भवेयुः। **पृच्छति चेदेव माता भोजनं प्रयच्छति** इति लोकयुक्तिं ज्ञात्वापि तत्प्रकारकयोगदाने संस्कृतविश्वविद्यालयाधिकारिणः असमर्थाः विद्यन्ते। संस्कृतयोगदानाय इहलोके के तादृशाः जनाः, के तत्र योग्याः, के तत्र प्रेरणीयाः, के च वन्दनीयाः, के च प्रष्टव्याः, के तन्मनस्काः इति ज्ञात्वा पृष्ट्वा च संसाधनानां सम्पादने अग्रेसराः भवेयुः। तेनैव बलेन बहुलमाध्यमिकसंस्कृतविश्वविद्यालयत्वेन स्वभावमासाध्य विश्वपटले संस्कृतविश्वविद्यालयाः स्वस्थानस्थिरतायै सक्षमाः भवन्ति। अत्रोदाहरणानि विश्वप्रसिद्धानि आध्यात्मिकमन्दिराणि, अध्यात्मिकसेवासंस्थाः, तीर्थयात्रास्थानानि, मानवसेवाभावसंस्थाः एव भवन्ति ।

**संस्कृतविश्वविद्यालयेषु पाठ्क्रमपाठ्यचर्ययोः व्यवस्था -**

अयं विचारः संस्कृतविश्वविद्यालयानाम् आधारभूतभविष्यत्कार्याचरणस्तम्भेषु तृतीयः। पाठ्यक्रमः तथा पाठ्यचर्येति शब्दद्वयं प्राचीनभारतीयशिक्षेतिहासे अदृष्टपूर्वमेव भवति। शिक्षा परापरेति द्विधा प्रकीर्त्यते स्म। संस्कृतशिक्षाक्षेत्राणि सर्वाणि नैकप्रकारकैः शैक्षिकक्रियाकलापैः सदा सहजतयैव निमग्नानीव दृश्यन्ते स्म। भौतिकं प्राकृतिकं तथा शैक्षिकं संस्कृतशिक्षाक्षेत्रवातावरणं शान्तिमयं मुक्तिप्रदं च भवति स्म। ओंकारनादेन निरन्तरं तन्मयत्वक्षेत्राणि भवन्ति स्म। प्रातः ब्राह्मीमुहूर्तादारभ्य रात्रौ शय्यासमयं यावत् संस्कृताध्ययनकेन्द्रेषु प्रणवरवाः तथा तत्तन्मन्त्रोच्चारणध्वनयः भवन्ति स्म इति प्राज्ञाः । छात्राः प्रातः ब्राह्मीमुहीर्ते उत्थाय गुरुशुश्रूषा, सन्ध्यावन्दनजपतपानुष्ठानानि, यज्ञानुष्ठानाय सन्नद्धता, वोदाध्ययनं, वादविवादाः, भिक्षाटनं, गोसेवा, क्षेत्रसेवा, क्षेत्रस्वच्छता, क्षेत्रसंरक्षणं, अतिथिसेवा, वाक्यार्थाः, शास्त्रविमर्शाः इत्यनेकधा दैनिन्दिनकार्याणि शैक्षिककार्याणीव अनुष्ठीयमानाः एव संस्कृताध्ययनमकुर्वन्निति विदितविषय एव। वेदाध्ययनं वेदपारायणं वा प्रधानविषयश्चेदपि चतुष्षष्टिकलात्मकाः शिक्षाः सर्वाः तच्चतुर्वेदवेदाङ्गोपनिषदामध्ययनमाध्यमेनैव गुरुसन्निधौ यथाविधि यथासमयं च स्थित्वा समग्रतया छात्राः पठन्ति स्म । पाठ्यक्रमस्य पाठ्यचर्यायाः वारम्भः एकदादावेव, तथैवान्ते एव समाप्तिश्च आसीन्न प्रतिवर्षम्। अष्टमे वयसि उपनयनसंस्कारेण सभाजितः वटुः गुरुकुलं प्रविश्य पञ्चविंशतिवर्षाणि ब्रह्मचर्यं

पालयन् स्वेच्छया गुरुं, शास्त्रं तथा शैक्षिककार्यं च चित्वा सम्पठ्य च समावर्तनसंस्कारेण समग्रतया स्वशास्त्रे स्वप्रतिभां गुरुसन्निधौ निरूप्य अग्रेसरः भवति स्म । पठ्यक्रमपाठ्यचर्ययोः एकताभाव एवासीन्न तु भिन्नता। वर्तमानकाले इयं स्थितिः आधुनिकसंस्कृतशिक्षाकेन्द्रेषु केष्वपि नावलेक्यते। संस्कृतशिक्षाकेन्द्राणि इत्थमपि भवन्ति वेति जनाः विस्मयास्सन्तः हेलनभावनया गणयन्तः सन्ति। प्रायः प्रसिद्धदेवालयेषु, ध्यानमन्दिरेषु, सेवासंस्थासु तथा केषुचित् सनातनधर्मानुष्ठाणकेन्द्रेषु एव सा स्थितिः वर्तते।

अतः अनवरतं सैद्धान्तिकप्रायोगिकसंस्कृतक्रियाकलापैः पुरा यथा संस्कृतविश्वविद्यालयाः स्वास्तित्वनिरूपणे नियतरूपेण सक्षमाः आसन् तथैव आधुनिकपाठ्यक्रमपाठ्यचर्ययोः माध्यमेनापि मूलप्रकृतिमाश्रित्य व्यवहरेयुः।

**संस्कृतविश्वविद्यालयेषु वासावासवसनप्रणाली -**

अयं विचारः संस्कृतविश्वविद्यालयानाम् आधारभूतभविष्यत्कार्याचरणस्तम्भेषु चतुर्थः। समाजे समेभ्यः जनेभ्यः वासः, वस्त्रं, भोजनमिति त्रयाणां मौलिकावसराणां पूर्तिरेव प्रजातान्त्रिकलक्ष्यं परिलक्ष्यते। शिक्षाक्षेत्रेष्वपि एतेषां त्रयाणां विषये तु विशेषावधानं प्रदेयमिति नैकाः संस्थाः, आयोगाः, नीतयः, योजनाश्च सर्वकारेण कल्प्यन्ते। शिक्षाव्यवस्थासु वासव्यवस्था, आवासव्यवस्था, आचारव्यवहाराहारव्यवस्था इति प्राणभूताः विद्यन्ते। छात्राणां व्यक्तित्वनिर्माणे एते त्रयः अंशाः प्रभावजनका इति दार्शनिकाः मनोविज्ञानिनः सर्वे च शिक्षाविदः । अत एव प्राथमिकस्तरादारभ्य उन्नतस्तरपर्यन्तं सर्वेषु शिक्षाकेन्द्रेषु, सर्वेषु सामजिकक्षेत्रेषु च प्रामाणिकरूपेण तद्गतनियमाः पालनीयाः इति शिक्षानीतयः सर्वकाराश्च कथयन्ति। इत्थमेनं विचारं हृदि संस्थाप्य, सूक्ष्मेक्षिकया विचारयामश्चेत् सर्वापेक्षया प्राचीनभारतीयशिक्षाप्रणाल्याः वासावासवसनप्रणाली एव सर्वादर्शरूपेति कथने नातिशयोक्तिः। विचारेऽस्मिन् पाश्चात्यातत्त्वार्थबुद्ध्यापहृतज्ञानाः भारतीयाः प्राचीनाम्, विश्वैकरूपाम्, अमूल्यां, भारतीयसंस्कृतसंस्कृतिमयीञ्च प्राचीनप्रणालीं त्यक्त्वा वाणिज्यमयीं, स्वार्थपरां, विभिन्नमतोत्पादकस्वभावयुक्तां च आधुनिक-प्रणालीं समाश्रयन्ति। आधुनिकशिक्षाक्षेत्रेषु आधुनिकप्रणाल्यामस्यामपि नियतरूपेण एकरूपता नास्त्येव। पाश्चात्यैः तथा भारतीयैश्च बहिष्कृतेषु संस्कृतज्ञानविज्ञानशिक्षाकेन्द्रेषु तु विचारोऽयं दःखावह एव वर्तते। प्रत्येकं पञ्चवर्षप्रणाल्यां समर्पिते शिक्षायोगे अथवा शिक्षानीतौ भारतीयसंस्कृतसंस्कृतियुक्तभावनां दृढीकर्तुं विचाराः प्रस्तूयन्त एव। तथापि ते विचाराः पत्रगताः एव, नाचरणसाध्याः अजायन्त। एतस्मात् कारणादेवाधुनापि भारतस्य पूर्ववैभवं, संस्कृतिं, संस्कृतं, मूल्यानि, व्यवहाराः, स्वाभावाः इत्येनेकान् आदर्शभावान् छात्रेषु वर्धयितुं राष्ट्रियशिक्षानीतिः अस्मान् सर्वानुपदिशति।

संस्कृतविश्वविद्यालयाः बहुलविषयकविश्वविद्यालयत्वेन स्वस्वरूपं परिवर्तयितुं निजस्वभावञ्च प्राप्तुं मौलिकीं, प्राचीनां तां वासावासवसनप्रणालीं समाश्रयेयुः। अनेन समाजे मौलिकतया संस्कृतविश्वविद्यालयाः स्वास्तित्वनिरूपणे सक्षमाः भवन्ति। विचारेऽस्मिन् सह नाववतु, सह नौ भुनक्तु, सहवीर्यं करवावहै, तेजस्विनावधीतमस्तु, माविद्विषावहै इति श्रुतिवाक्यं परिपालयेयुः। छात्राः, शिक्षकाः, कर्मकराः तथा अन्ये च जनाः सर्वे प्राचीनपरम्परामनुसरन्तः निश्चितरूपेण संस्कृतविश्वविद्यालये वासं कुर्युः। भेदभावं विना सर्वे मिलित्वा आवासभवनेषु तिष्ठेयुः तथा च समवस्त्रधारिणस्सन्तः शैक्षिककार्याणि साधयेयुः। संस्कृतविश्वविद्यालयाः सर्वे दिनान्तं, मासान्तं, वर्षान्तं, शिक्षान्तं वा शैक्षिकविषयेषु सर्वेषु छात्राः शिक्षकाश्च सहैव यथा भागभाज भवेयुः तथा वातावरणसम्पादनाय प्रयतेरन्। पुरा उपनयनसंस्कारेण प्रविष्टः वटुः समावर्तनेनैव गृहं निर्गच्छतिस्म। वटुः निश्चितेऽस्मिन् समये संयमी भूत्वा

स्थितप्रज्ञस्सन् गुरुमनुगच्छति स्म। स्थितिरियमेका वर्तमानसंस्कृतशिक्षाकेन्द्रेषु नावलेक्यते। अतः स्थितिरयमेकैव छात्रेषु नैकप्रकारककुव्यवहारोत्पन्ने बलवती दृश्यते। समता, समानता, सहृदयता, सहभावना, समन्वायः. समनावसरः, सामाजिकचेतना, सोदरभावना, सहकारभावना इत्यनेकानि प्रजातान्त्रिकमूल्यानि छात्रेषु संवर्धयितुं, सम्पादयितुं सामान्यविद्यालयेषु, उच्चशिक्षाक्षेत्रेषु तथा विश्वविद्यालयेषु च वासावासवसनविचारेषु नियमाः पाल्यन्ते। तथापि स्वातन्त्र्यभारते प्राथमिकस्तरादुन्नतस्तरपर्यन्तं संस्कृतशिक्षाकेन्द्रेषु विचारेऽस्मिन् निर्दिष्टनिर्णयस्वीकारे संस्कृतविदः अक्षमाः वर्तन्त इति जुगुप्साकरविषयोऽयं वर्तते । भाविभारतस्य संस्कृतविश्वविद्यालयानां चास्तित्वसंरक्षणाय पुनः सैव प्राचीनव्यवस्था संस्कृतशिक्षाकेन्द्रेषु सर्वेषु समानेतव्या सम्पादनीया च ।

**निष्कर्षः** -

**“बहुलविषयसंस्कृतविश्वविद्यालयाः”** इति राष्ट्रियशिक्षानीतेः नवीनप्रस्तुतिं स्वीकृत्य संस्कृतविश्वविद्यालयाः सर्वे स्वभविष्यत्कार्याचरणान्तर्गतत्वेनादौ पाठ्यक्रमे पाठ्यचर्यायां वा चतुष्षष्टिकलाः, वैज्ञानिकविद्याः, प्राविधिकशिक्षाः, प्रायोगिशिक्षाः, कौशलात्मकशिक्षाः, आधुनिकशिक्षाः इति नैकासामाधुनिकशिक्षाणां समायोजने दत्तमनस्काः विद्यन्ते। **गतानिगतिको लोकः** इति लौकिकाभाणकं संस्मृत्य तदतिरिच्य संस्कृतविश्वविद्यालयाः बहुलविषयसंस्कृतविश्वविद्यालयत्वेन स्वस्वरूपप्राप्त्यै स्वभविष्यत्कार्याचरणेषु आधुनिकविषयाणां संयोजनेन सह भौतिकता, संसाधनव्यवस्था, पाठ्यक्रमपाठ्यचर्ययोः व्यवस्था, वासावासवसनव्यवस्था इति संस्कृतशिक्षाक्षेत्रमौलिकाधारभूतेषु चतुर्षु विचारेषु स्थितमतयः पूर्वानुयायिनः भवेयुरिति कथ्यते। आधुनिककाले प्रत्येकं क्षेत्राय कश्चन निश्चितसङ्केतः (Perfect Identity) विद्यत एव। आधनकसमाजे शिक्षाक्षेत्रे वा सङ्केतरहितक्षेत्रं (Without Perfect Identity) संस्कृतक्षेत्रमेवाधुना इति कथने नास्ति सन्देहः। यथा प्राचीनभारते संस्कृतविश्वविद्यालयानां निर्दिष्टस्वरूपता (Perfect Identity), तथैव वर्तमानसंस्कृतविश्वविद्यालयानां निर्दिष्टस्वरूपतायै (Perfect Identity), भविष्यद्यशसे च इमे चत्वारः विचाराः प्राणभूताः भवन्तीति शम्।

★★★★★

# शिक्षकानाम् आचारसंहिता

**डा. एम्. श्रीधर् राजन्,**
**सहायकाचार्यः (अतिथिः)**

**परिचयः**

अयम् आधुनिकः प्रविधियुगः वर्तते। अत्र सर्वे मानवाः स्वेच्छया स्वाभीष्टं विषयं प्रविधिमाध्यमेन पठन्ति। अनेन ते यदा कदापि यत्र कुत्रापि अध्ययनं कर्तुं शक्नुवन्ति । अतः प्रविधियुगे अध्यापकानाम् अभावेऽपि अधिगमः भवितुमर्हति। किन्तु तत्र गुणवत्तायाः विषये सर्वदा चिन्तनीयम् । तत्रापि विशेषतः संस्कृताध्यापकानाम् उपस्थितिः अस्माकं भारतस्य सांस्कृतिकमूल्यानां संस्थापनार्थं विकासार्थम् अनिवार्यमेव । तेषामेव तत्र विशेषरूपेण उत्तरदायित्वं वर्तते । तेषाम् अभावे भारतीयानां तादात्म्यता कालान्तरे प्रश्नास्पदं गमिष्यति । तादृशानां कृते शिक्षणव्यवसायस्य नीतिनैतिकतायाः विषये मार्गनिर्देशनार्थम् आचारसंहिता सहकरोति । अतः अस्मिन् लेखे आचारसंहितायाः विषये विवेच्यते ।

**शिक्षकस्य कर्तव्यानि**

शिक्षकस्य कर्तव्यानि केवलम् अध्यापने एव न पर्यवसति । अपितु विद्यार्थिनां सर्वाङ्गीणविकासाय पोषणाय च अत्यन्तं महत्त्वपूर्णम् उत्तरदायित्त्वं वर्तते । तत्र मुख्यरूपेण शिक्षककर्तव्यत्रयं वर्तते ।

1. **अध्यापनम्** –

ज्ञानप्रदानम्, छात्रेषु समालोचनात्मकचिन्तनस्य प्रवर्धनम्, उत्तरोत्तरविषयेषु जिज्ञासायाः उत्पादनम्, स्वजीवने अधीतस्य कार्यान्वयने प्रेरणाप्रदानञ्च अध्यापकानां कार्याणि भवन्ति। यथा एकः संस्कृताध्यापकः एकं सुभाषितम् पाठयति। तदा व्यवहारिकदृष्टान्तानां साहाय्येन जटिलव्याकरणांशान् स्पष्टीकरोति। तत्र विद्यमानान् शाक्तिक-लाक्षणिक-व्यङ्ग्यार्थान् अवबोधयति। कविना किमर्थम् एवं रूपेण श्लोकः रचितः इति जिज्ञासोत्पादनं करोति। एवं तत्रत्य मूल्यानां निजजीवने पालनार्थमपि प्रेरयति। इदमेव अध्यापनम् इति उच्यते।

2. **पालनम्** –

अध्यापकः स्वस्थ्यसांवेगिकपरिस्थितेः निर्माणम्, प्रोत्साहनप्रदानं, वैयक्तिकमार्गदर्शञ्च करोति। यथा “एकछात्र-एकाध्यापकवर्गः” एकम् उत्तमोदाहरणं भवति । अनेन छात्राणां व्यक्तिगतं साहाय्यं प्राप्यते। अत्र प्रत्येकस्य छात्रस्य कृते अपेक्षितः पाठः पाठ्यते। तस्य कृते वैयक्तिकरूपेण समयस्य कल्पनं क्रियते। तदीयव्यक्तिगतानि गोपनीयानि गोप्यते। वैयक्तिकभिन्नतानुसारं, पाठनविधेः चयनं क्रियते। अनेन अधिगमे व्यक्तिगतं साहाय्यम् मार्गदर्शञ्च छात्रैः प्राप्यते।

3. **मार्गदर्शनम्** –

शैक्षिक-वैयक्तिक-व्यावसायिक-अभिवृद्ध्यर्थं सहायय्यता प्रदानं मार्गदर्शनं भवति। अत्र शिक्षकः छात्राणां विभिन्नपरिचयं सम्पाद्य तस्य लक्ष्यप्राप्तये मार्गदर्शनं परामर्शञ्च करोति ।

**शिक्षकस्य आचारसंहिता**

स्वीयवैयक्तिकयोग्यतायाः अभिवृद्धये, स्वीयकर्तव्यतायाः पालने च आचारसंहिता शिक्षकाणां मार्गदर्शनं करोति । छात्रेण सह कथं वर्तितव्यम्, अभिभावकेन सह कथं वर्तिव्यम्, सहकर्मिणा सह कथं वर्तितव्यम् इति रूपेण यू.जि.सि., एन्.सि.टि.ई., एन.सी.ई.आर्.टि., संस्कृतसाहित्यपरिषद् इत्यादीनां आशयाः अस्मिन् लेखे प्रकट्यन्ते ।

**छात्रसंबन्धिताः आचारनियमाः (Code of Conduct Toward Students)**

**वैयक्तिकतायाः आदरः -** यू.जि.सि. तथा एन्.सि.टि.ई. च दृढं निर्दिशति यत्, अध्यापकः छात्रेभ्यः सर्वदा आदरं प्रकटयेयुः इति। अध्यापकः सहानुभूतिपूर्णं समावेशात्मकं वातावरणं संरच्य तान् प्रोत्साहनं कुर्युः। अपि च अध्यापकः वर्ण-जाति-धर्म-लिङ्गादिककारणैः पक्षपादं न कुर्युः। सर्वेषु समभावनायाः पालनम् अवश्यं कुर्युः ।

**समग्रविकासस्य प्रोत्साहनम् -** अध्यापकाः छात्रणां शैक्षिकविकासाय न केवलं प्रयत्नं कुर्युः अपि तु नैतिकसांवेगिकगुणानां विकासाय छात्रान् प्रोत्साहयनं कुर्युः। संस्कृतसाहित्यपरिषद् तु "शिष्यसंरक्षणम्" इति मन्त्रम् आदाय शिक्षकाः छात्रेषु नैतिकसांवेगिकगुणानां विकासं संपादयेयुः इति सूचयति ।

**व्यावसायिकसीमायाः परिपालनम् -** शिक्षकाः व्यक्तिगतसीमासु स्थित्वा छात्रैः सह वैयक्तिकसम्बन्धस्य स्थापनं न कुर्युः । Facebook, WhatsApp, Twitter, Instagram इत्यादिभिः सामाजिकमाध्यमैः तैः सह सम्पर्कं न कुर्युः। सर्वदा तत् परिहार्यमेव। अपि च संस्कृतसाहित्ये "गुरुशिष्यमर्यादा" महत्त्वपूर्णा वर्तते। छात्राः शिकाणां दासाः न भवन्ति। अतः परस्परं मर्यादानेन सह आदरपूर्वकं सम्बन्धं अध्यापकाः स्तापयेयुः ।

**सुरक्षित-शिक्षण-पर्यावरणस्य निर्माणम् -** छात्राणां कृते सुरक्षित-भयभीतरहितस्य शिक्षण-पर्यावरणस्य निर्माणम् अनिवार्यं वर्तते । शिक्षकाः छात्राणां संवेगात्मककल्यानाय महत्प्रयासं कुर्युः । येन केनापि प्रकारेण हिंसा, पीडा, दुष्टार्थकवाचा क्लेषोत्पादनम्, इत्यादिना यदि छात्राः पीडिताः भवन्ति तर्हि तद्विषये सङ्कोचं विना सूचयितुम् तेभ्यः सौकर्यं कल्पनीम्।

**आलोचनात्मक-चिन्तनस्य विकासः -** शिक्षकाः स्वतन्त्ररूपेण सृजनात्मकरूपेण च चिन्तयितुं छात्रेभ्यः अवकाशं कल्पयेयुः। सर्वदा शिक्षकाः स्वकीयधारणादिकं बालकेषु आरोपणं न कुर्युः ।

**गोपनीयतायाः परिपालनम् -** छात्राणां व्यक्तिगतं विवरणं गोपनीयम् । यदि तत् बहिः प्रकाश्यते तर्हि तत् तेषां हितायैव स्यात्। सर्वाः संस्थाः नैतिकसिद्धान्तस्य परिपालनमेव मुख्यमिति चिन्तयेयुः।

**अभिभावकसंबन्धिताः आचारनियमाः (Code of Conduct Toward Parents)**

**आदरसूचक-सम्भाषणम्** – अध्यापकः सततं निरीक्षणं कुर्युः। तेन बालकानां रुचिः, योग्यता इत्यादिवैयक्तिकविशेषतां संयक् अवगच्छन्ति। तदानीमेव सर्वाङ्गीणविकाससम्पादनम्, तथा वैयक्तिकविशेषतायाः परिज्ञानञ्च कुर्युः । तदर्थम् अभिभावकानां साहाय्यम् अनिवार्यं वर्तते । तस्मात् सर्वे शिक्षकाः अभिभावकैः सह

आदरपूर्णसंवादं कुर्युः । अतः संस्कृत-साहित्य-परिषद् छात्रविकासाय “पितृ-पुत्र सम्मिलनम्” आवश्यकम् इति निर्दीशति।

**प्रतिक्रियायां प्रतिबद्धता सत्यता च** – अध्यापकाः छात्रस्य प्रगति-रुचि-आवश्यकतादीनां विषये अभिभावकैः सह प्रतिबद्धता तथा सत्यता पूर्वकं संप्रेषयणं कुर्युः। शिक्षकाः अभिभावकानां पुरतः छात्राणां विषये स्पष्टं चित्रं प्रस्तौतुं छात्रस्य क्षमतायाः अतिशयोक्तिं न्यूनीकरणं वा न कुर्युः। छात्रगतम् असामर्थ्यं दोषमिव न परिगणणीयम्। अपि तु परिहार्यमित्येव सर्वदा चिन्तनीयम्।

**अभिभावकानां सहभागस्य प्रोत्साहनम्** – शिक्षकाः छात्राणां अधिगमप्रक्रियायाम् अभिभावकान् अपि भागं ग्रहीतुं प्रोत्साहनं कुर्युः। प्रतिदिनं विद्यालयं गत्वा आगमनात् परम् तद्दिने विद्यालये जातानां घटनानां विषये अभिभावकाः चर्चां कुर्युः। छात्राय दत्तानां गृहकार्य-परियोजनादीनां विषये अपि छात्रेण सह स्थित्वा यथा शक्तिः प्रोत्साहनं कुर्युः । एतदर्थम् अभिभावकानां शैक्षिकयोग्यता अनावश्यकी । छात्राणाम् अधिगमाय प्रोत्साहनं, अध्ययनसमये दूरदर्शनादीनां परित्यागः, छायं निर्मायदानं इत्यादिकमपि सहभागित्वे अन्तर्भवति । अध्यापका-अभिभावकानां सहभागेणैव छात्रस्य शैक्षिकलक्ष्यप्राप्तिः सम्भवति इति न कदापि विस्मरणीयम्।

**सहकर्मिसंबन्धिताः आचारनियमाः** - (Code of Conduct Toward Colleagues)

**सहकर्मिणां समर्थनम् आदरश्च -** अध्यापकाः सहकर्मिणां प्रति आदरयुक्तं व्यवहारं कुर्युः। तैः सह सगौरवं वर्तितव्यम्। कारणं सर्वेषामपि अध्यापकानाम् एकमेव लक्ष्यं यत् छात्रहितचिन्तनेन सह छात्रस्य सर्वाङ्गीणविकाससंपादनम्। तथा च अध्यापकाः परस्परम् आदरं प्रकटीकृत्य लक्ष्यसाधनाय सर्वदा चिन्तनीयम्। यद्यपि सर्वे सहवर्तिनः इति कारणेन परस्परं क्वचित् मतभेदः. कलहः, स्पर्धाः इत्यादयः सम्भवन्ति, तथापि तत् सर्वं छात्राणां पुरतः, सर्वेषाम् अध्यापकानां च पुरतः न वक्तव्यं न वा प्रदर्शनीयम्। किन्तु एकान्ततया चर्चां कृत्वा झटित्येव परस्परं समादानस्यापि मार्गः संरचनीयः। आवश्यकतायां सत्यां सर्वे अध्यापकाः परस्परं सकारात्मकं समर्थनं कुर्वन् छात्रहिताय अग्रेसरेयुः। अस्मिन् अवसरे परस्परसहभागीता आवश्यकी । गीतावाक्यमपि सुव्यक्तं परस्परम् आदरस्य श्रेयस्त्वं निरूपयति। यथा -

**देवान्भावयतानेन ते देवा भावयन्तु वः ।**
**परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ।।3.11।।**

**व्यावसायिकसहयोगः तथा परस्परज्ञानविनिमयः -** सर्वेऽपि अध्यापकाः परस्परं सर्वासु शैक्षककर्मसु सहयोगिनः भवेयुः। तत्र सर्वाः शैक्षिकसंस्थाः अध्यापकानां विभिन्नाः समितयः संरच्य शैक्षककर्मसु तेषां परस्परसहयोगत्वं सम्पादयेयुः। एवम् सङ्कायविकासकार्यक्रम-प्रशिक्षुता-कार्यशाला-विशिष्टव्याख्यानैः (FDP, Training Program, Workshop, Special Lectures) औपचारिकरूपेण अनौपचारिकरूपेण वा तदा तदा ज्ञान-विनिमयाय शैक्षिकसंस्थाः अवसरं कल्पयेयुः।

**नैतिकतायाः परिपालनम् -** शिक्षकः परस्य निन्दां तथा असत्याभाषणं वा कदापि न कुर्यात्। तत्र संस्कृत-साहित्य-परिषद् परस्परं विश्वासं” पालयन्तः विश्वासपूर्णवातावरणस्य निर्माणां कुर्वन्तु इति सूचयति।

**उपसंहारः**

शिक्षकानां आचारसंहिता व्यावसायिकतां, नैतिकतां, आदरञ्च संवर्धयति। संस्कृताध्यापकाः संस्कृतस्य संस्कृतेः च संरक्षार्थं विकाससंपादनार्थं विशेषरूपेण आचारसंहितायाः पालनं कुर्युः।

**सन्दर्भाः**

[1] यूनिवर्सिटी ग्राण्ट्स् कमीशन् (UGC), (2019), शिक्षकानाम् आचारसंहिता ।

[2] राष्ट्रीयशिक्षकशिक्षापरिषद् (NCTE), (2014), शिक्षकशिक्षामानकम् ।

[3] एन्.सी.ई.आर्.टि., (2018), शिक्षकशिक्षाहेतुकराष्ट्रीयपाठ्यक्रमः ।

[4] संस्कृतसाहित्यपरिषद्, (2015), संस्कृताध्यापकानां नैतिकता संहिता ।

★★★★★

## सरलमानकसंस्कृतं नः धियः प्रचोदयेत्

**ज अनिच्छङ्करः**

शिक्षाशास्त्रिद्वितीयवर्षम्

**"भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा।**

**विहाय संस्कृतं नास्ति संस्कृतिस्संस्कृताश्रिता ॥"**

संस्कृतं विश्वस्य प्राचीनतमा भाषा वर्तते। समुपसर्गपूर्वक – कृधातुना सह क्तप्रत्ययं संयुज्य निष्पादितः विद्यते अयं संस्कृत – शब्दः ( सं+स्+कृ+क्त = संस्कृतम् )। सम्यक् कृतं संस्कृतम् इति अस्यार्थं विबुधाः वदन्ति। परिष्कृतम् इत्यर्थे संस्कृत-शब्दस्य दुर्व्याख्यानं कुर्वतां सङ्ख्या दिनं दिनं वर्धते। कृ-धातुः भ्वादिगणे (कृञ् – करणे), तनादिगणे ( डुकृञ् – करणे ), स्वादिगणे ( कृञ् – हिंसायाम् ) च दृश्यते। पाणिनीयधातुपाठे कुत्रापि परिष्कृतम् इत्यर्थे कृ – धातुः न दृष्टः। तस्मात् मादृशेभ्यः तत् व्याख्यानं न रोचते। सम्पर्युपेभ्यः करोतौ भूषणे ॥६.१.१३७॥ इत्यनेन पाणिनीयसूत्रेण समुपसर्ग – पूर्वक – कृ - धातुना अत्र भूषणार्थः प्रकाश्यते [ सं+स् (सुडागमः) +कृ+क्त = संस्कृतम् ]। तर्हि संस्कृतस्य भूषितम् ( अलङ्कृतम् ) इत्यपि अर्थः सिद्ध्यति। तत् च दृष्टं यथा -

**" सम्परिभ्यां करोतौ सुट्भुषणार्थे विधीयते।**

**तेन भूषितभाषेति विख्याता पाणिनेर्मते ।।"**

तस्मात् वेदादिभिः शास्त्रैः या भाषा भूषिता ( अलङ्कृता ) , सा भाषा भूषितभाषा ( संस्कृतम् ) इति वक्तुं मादृशाः अधिकम् इच्छन्ति। मम विषयः नास्ति साक्षात् एषः , तथापि सर्वादौ मदीयः कश्चन विचारः अत्र समुपस्थापनीयः इति धिया प्राक्कथनम् इव प्रोक्तम् एतावत् । सम्प्रति लेखनस्यास्य विषयं प्रविष्टुं कामये। **"सरलमानकसंस्कृतं नः धियः प्रचोदयेत्"** इति वर्तते मम विषयः।

### सरलमानकसंस्कृतम् ( Simple Standard Sanskrit )

पुरातनकालात् आरभ्य भारतीयसंस्कृतिः नियतरूपेण प्रवहन्ती, भारतीयसमाजं पोषयन्ती च अस्ति। तस्याः संस्कृतेः मुख्यवाहिका विद्यते संस्कृतभाषा। अत एव अधुना अपि यत्र यत्र संस्कृतेः प्रस्तावः दृश्यते, तत्र तत्र ऐदम्प्राथम्येन संस्कृतम् इति नाम श्रूयते। शिक्षणस्य प्रमुखेषु लक्ष्येषु अन्यतमम् अस्ति संस्कारदानम् इत्यतः शिक्षाक्षेत्रेषु संस्कृतस्य स्थानं महत्त्वपूर्णं वर्तते। सरलमानकसंस्कृतं कदापि पाणिनीयनियमानाम् उल्लङ्घनं न करोति एव। यतः एतदपि पाणिनीयमतान्तर्गतमेव अस्ति।

संस्कृतं भारतीयज्ञानभण्डागारस्य कुञ्चिका विद्यते। अतः भारतीयानाम् अभिव्यक्तिः अनया भाषया एव अभवत्। शास्त्राणाम् अध्ययनाध्यापनम् अपि संस्कृतभाषामाध्यमेन एव आसीत्। तत्रापि सम्प्रेषणविधिः सरलया संस्कृतभाषया एव आसीदिति श्रद्धेयः अंशः भवति। 'एषा कठिना क्लिष्टा च भाषा, केवलं पण्डिताः एव एतां भाषाम् अधिगच्छन्ति, एषा निर्जीवा भाषा, देवभाषा, एकस्य वर्गस्य भाषा' चेति प्रचारं कृतकृत्यैः आङ्ग्लशासकैः

संस्कृतभाषा लोकव्यवहारात् जनहृदयात् च  दूरं नीता । एवं यया भाषया भगवता श्रीकृष्णेन गीतोपदेशः प्रदत्तः, तस्याः अपचयः भारते सञ्जातः । तदा आसीत् संस्कृतभारत्याः अभ्युत्थानम् । सरलमानकसंस्कृतेन संस्कृतभारत्या यत् संस्कृतान्तोलनं कृतं, तस्य महातरङ्गाः विश्वे सर्वत्र सञ्जाताः । तस्मात् अधुना संस्कृतं जीवन्ती भाषा वर्तते । तस्य हेतुः विद्यते सरलमानकसंस्कृतम् । तेन संस्कृतं जनकीया भाषा अभवत् । तर्हि किमिदं सरलमानकसंस्कृतम् ? इति एषः प्रश्नः भवतां मनसि स्यात् , तस्मात् तस्य समाधानमेव अनेन अहम् अत्र उपस्थापयितुम् इच्छामि । सरलं मानकं च संस्कृतं सरलमानकसंस्कृतम् इति कथयन्ति बिबुधाः । तत् आदाय किञ्चित् अत्र प्रवक्ष्यामि । तत् यथा –

**सरलसंस्कृतम् ( Simple Sanskrit )**

सामान्यजनाः अपि तेषां विचारानुगुणं सहजतया येन व्यवहारं कर्तुं शक्नुवन्ति तदेव सरलसंस्कृतं वर्तते । कदापि सरलसंस्कृतं तु सरलीकृतसंस्कृतं ( Simplified Sanskrit ) न भवेत् । इत्युक्ते सरलत्वं प्रापयितुं भाषायां कृत्रिमत्वं न कुर्यात् इति आशयः । पुनः कथं भाषायां सरलत्वम् आनेतव्यम् अस्माभिः ?  एवं समस्या जायते । समाधानं तत्र इत्थं भवेत् –  सारल्यं तु सुप् – तिङन्तेषु ( नाम – क्रियापदेषु ) भवति ।

**सुबन्ते ( नामपदे ) सारल्यं यथा -**

- प्राथमिकस्तरे चतुर्विधशब्दानां (अकारान्तपुंलिङ्गानां, आकारान्तस्त्रीलिङ्गानां, ईकारान्तस्त्रीलिङ्गानां, अकारान्तनपुंसकलिङ्गानां च) सर्वनामशब्दानां अस्मद् – शब्दस्य च रूपाणां प्रयोगः सरलः भवेत् । न अन्येषाम् इति आशयः ।
- नामपदानां द्विवचनस्थाने प्रातिपदिकेन सह **“ द्वयशब्दं ”** संयुज्य प्रयोगः सरलः अस्ति । तत्  यथा - नेत्र + द्वयम् =  नेत्रद्वयम् ,  हस्तद्वयम् , पादद्वय - प्रभृतयः शब्दाः ।
- पञ्चमीविभक्तेः अर्थे **“ तस्सिल् – प्रत्ययस्य ”** प्रयोगः अत्यन्तं सरलः स्यात् । अत्रापि प्रातिपदिकेन सह **“ तः ”** इति अक्षरं संयुज्य प्रयोगः कार्यः । यथा – ग्राम + तः = ग्रामतः, द्वारकातः, काशीतः, नगरतः इत्यादयः.... ।
- चतुर्थीविभक्तेः अर्थे षष्ठीविभक्त्या सह **“ कृते ”** इति पदं संयुज्य प्रयोगःकरणीयः । तत् यथा – देवस्य कृते , अम्बायाः कृते , नर्तक्याः कृते , मित्रस्य कृते इत्यादयः.... ।
- कासाञ्चन विभक्तीनां बहुवचनरूपाणि न आवश्यकानि । यथा – चतुर्थी-पञ्चमी–बहुवचनम् ।
- अकारान्तत्वेन भिन्नान्ते विद्यमानान् बहून् शब्दान् परिवर्तयितुं संस्कृतस्य सामर्थ्यम् वर्तते । तत् यथा –  राजा – महाराजः / पाण्डुराजः, कविः – कवि - वरः / प्रवरः/ श्रेष्ठः/ पुङ्गवः , वक्षः – वक्ष - प्रदेशः / स्थलम् / स्थानम् , जोसफ् – जोसफ् - वर्यः / महोदयः / महाभागः/ महाशयः इत्यादयः ।
- पर्यायपदानां कथनावसरे मातृभाषायां विद्यमानानां प्रसिद्धानां सरलसंस्कृतपदानां प्रयोगः अधिकतया कर्तव्यः । अर्थात् वयं यत् पदं वदामः, श्रोतुः तत् अश्रुतपूर्वकं न भवतु इति विचारः। यथा –  अम्बरम् – आकाशम्, द्योः, द्यौः, गगनम्, अभ्रम्, खम् चेति एतानि पदानि अम्बरशब्दस्य पर्यायपदानि भवन्ति। अत्र आकाश-शब्दस्य चयनं कार्यम् ।

- एकस्मिन् अर्थे एकमेव पदं ज्ञापनीयम् । यथा - कुतः? इति पदस्य कस्मात् प्रदेशात् ?, केन कारणेन ? चेति अर्थद्वयम् अस्ति । अत्र एतत् पदं कस्मात् प्रदेशात् ? इत्यर्थे एव बोधनीयम् , यतः लोकव्यवहारे अस्मिन् अर्थे एव अधिकप्रयोगः दृश्यते ।
- कठिनानां सन्धिः – समासादीनां प्रयोगः न कर्तव्यः । अत्रापि विना कष्टम् अवगन्तुम् योग्यान् प्रयोगान् कर्तुम् अर्हामः । यथा – सन्धिमध्ये – कोऽपि, अत्रापि, चेति, नैव इत्यादयः, समासमध्ये – देवालयः, नीलमेघः, लोकहितम् इत्यादयः च ।
- दीर्घानि वाक्यानि अपि वक्तुं न पारयामः । इत्युक्ते त्रिचतुरपदात्मकानि (३-४) वाक्यानि एव वक्तव्यानि इत्याशयः ।

**तिङ्न्ते ( क्रियापदे ) सारल्यं यथा** –

- युष्मत् – शब्दस्य स्थाने भवत् – शब्दस्य प्रयोगः कार्यः । **“भवद्योगे न मध्यमः/१९०”** इति अस्मात् वार्त्तिकबलात् अत्र पाणिनीयत्वं सिद्ध्यति ।
- पुरुषाणां द्विवचनप्रयोगः प्राथमिकस्तरे त्याज्यः वर्तते, एतस्मात् वर्तमाने प्रथमपुरुष–उत्तमपुरुषयोः एकवचन–बहुवचन–प्रयोगद्वारा भाषायां सारल्यं सञ्जायते ।
- भाविन्याम् अपि प्रयोगः वर्तमानसदृशः एव ।
- लोटि ( लोट्–लकारे ) प्रथमपुरुषस्य एकवचन – बहुवचन – रूपं पर्याप्तम्, यतः अधिकतया आत्मानम् उद्दिश्य प्रार्थना अज्ञा वा कदापि व्यवहारे न क्रियते, इति कारणेन भाषाप्रयोगस्य प्रारम्भकाले उत्तमपुरुषरूपाणि न अपेक्षन्ते ।
- भूते लङि ( लङ्–लकारे ) उपसर्गयुक्तानां धातूनां प्रयोगे **अडागमक्लेशः** बहुत्र जायते । तस्मात् अत्र भूतकृदन्तप्रयोगः ( क्तवतु –प्रयोगः ) बहुसरलः विद्यते ।
- मूलभूतानि ३५ क्रियापदानि ज्ञापयित्वा, तेषु एकैकस्य अपि १६ रूपाणि ज्ञापनीयानि । तथा च वर्तमानस्य -४, भाविन्याः -४, प्रार्थनादेः -२, क्तवतुप्रत्ययान्तस्य -६ चेति १६ रूपाणि ।
- करोति इति क्रियापदेन अनन्तसङ्ख्यकानि क्रियापदानि निर्मातुं शक्नुमः। अनेन गणक्लेशः, आत्मनेपदि – क्लेशः च न भवेदेव । क्रियापदानां प्रयोगे यत्र क्लेशः अनुभूयते तत्र विभज्य प्रयोगः कर्तव्यः । तत् यथा – भाषते – भाषणं करोति / भाषणं कुरुते ।
- एकस्मिन् अर्थे एकम् एव क्रियापदम् ज्ञापनीयम् । यथा - भवति / विद्यते / वर्तते / अस्ति इत्येतेषु अस्ति इत्यस्य प्रयोगः सरलः स्यात् ।

प्राथमिकस्तरे समुचितः सरलः प्रयोगः कर्तरि एव , यतः अन्यभाषाणां व्यवहारे कर्मभावयोः प्रयोगः अधिकतया न दृश्यते । उपरि प्रदत्तान् अंशान् अनुसृत्य वयं यां भाषां वदेम , तदेव सरलसंस्कृतम् इत्युच्यते ।

**मानकसंस्कृतम् ( Standard Sanskrit )**

पाणिनीयसिद्धान्तैः परिमाणविशिष्टं संस्कृतमेव अत्र मानकसंस्कृतम् इत्युच्यते । तथा च सरलभाषाप्रयोगेऽपि व्याकरणशुद्धिः आवश्यकी वर्तते । अन्यथा कालान्तरे भाषायाः स्वत्वं नश्यति एव, नास्ति तत्र सन्देहः । तस्मात् अत्र काचित् विशेषश्रद्धा दातव्या अस्माभिः । व्याकरणान्तर्गतः प्रयोगः एव अत्रापि सर्वसम्मतः विद्यते । तेनैव भाषा निष्कलङ्का चिरं जीवेत् । एतत् मानकसंस्कृतं स्वीयशक्त्यनुसारं अखिलभारतीयस्तरे सर्वत्र सर्वजनावगमनयोग्यतां समानत्वं च आनेष्यति । यद्यपि एकस्य पादार्थस्य निर्देशाय भाषायां नैकानि पदानि विराजन्ते, तथापि निर्देशाय तेषु लोकव्यवहारे सुप्रसिद्धं पदमेव स्वीकरणीयम् । नोचेत् समग्रेऽपि भारते तस्य समानम् अर्थं दद्यात् । मानकसंस्कृते कदापि प्रादेशिकभाषायाः अनपेक्षितप्रभावः न भविष्यति । तद् यथा - 'वृक्षम्', 'मादरम्', 'बेलम्' इत्यादयः अपपाठाः मानकसंस्कृते न भविष्यन्ति इत्याशयः । एतादृशानां भाषादोषाणां निवारकं भवति मानकसंस्कृतम् ।

अवश्यम् अत्र सरलमानकसंस्कृतं किमर्थम् ? इति प्रश्नः भवतां स्मृतिपथम् आयाति । तस्य समाधानं प्रवक्ष्यामि अधुना । तत् यथा –

यदि शिक्षाक्षेत्रे सरलमानकसंस्कृतस्य अन्वयः क्रियते तर्हि बहवः छात्राः लाभान्विताः भवेयुः । स्वकीयविचारान् स्वप्रतिभां च संस्कृतेन अभिव्यञ्जयितुमपि तेषाम् आत्मविश्वासः वर्धेत । अद्य शिक्षाक्षेत्रे सरलमानकसंस्कृतस्य अभावः दृश्यते, इत्यतः छात्रेषु आत्मविश्वासः न दृश्यते, तथैव ते मध्ये पठनं त्यक्त्वा संस्कृतात् दूरं गच्छन्तः सन्ति । यदि पाठ्यपुस्तकानि सरलमानकसंस्कृते भवेयुः, यदि बोधनम् अपि च सरलमानकसंस्कृतेन स्यात् तर्हि संस्कृतं पठतां सङ्ख्या दिनं दिनं वर्धते ।

संस्कृतमाध्यमेन शिक्षणं न क्रियते चेत् उच्चमाध्यमिकविद्यालयेषु, महाविद्यालयेषु, विश्वविद्यालयेषु वा अधीतं विषयं संस्कृतेन प्रकटयितुम् असमर्थाः लेके जायन्ते । एतादृशानां समस्यानां परिहारः वर्तते सरलमानकसंस्कृतम् । पुरतः विद्यमानानां छात्राणां स्तरं ज्ञात्वा शिक्षकेण भाषा प्रयोक्तव्या । नूतनतया ये भाषां पठितुम् आयान्ति, तान् पाठयितुं योग्यं सरलमानकसंस्कृतमेव । प्रयोगेन स्वाध्यायेन वा तेषां भाषा कालान्तरे प्रौढत्वं याति एव, अतः तत्र सन्देहः न करणीयः । तस्मात् प्रौढमानकसंस्कृतस्य अवश्यकता सामान्यव्यवहारे शिक्षणस्य प्राथमिकस्तरे वा न अपेक्षते इत्यहम् अभिप्रैमि । किन्तु यदि अहं शिक्षकः भविष्यामि, तर्हि मदीयान् छात्रान् सर्वान् सरलभाषातः प्रौढभाषां प्रति नेष्यामि, इत्यहं दृढव्रतः अस्मि । यतः सरलप्रौढप्रयोगयोः तेषां सामर्थ्यं भवेत् इति मम आग्रहः । तदा एव ते श्रोतुः भाषास्तरं ज्ञात्वा वक्तुं प्रभविष्यन्ति, तथैव ते सानन्दं शास्त्राणि पठितुमपि च शक्ताः भविष्यन्ति इति मम विचारः।

एषा भाषा धीप्रचोदिनी वर्तते इति सम्प्रति आधुनिकवैज्ञानिकाः अपि अङ्गीकुर्वन्ति । तस्मात् अधुना विदेशराष्ट्रेषु बहुषु अपि प्राथमिककक्ष्यातः निर्बन्धविषयत्वेन संस्कृतं दरीदृश्यते । छात्राणां बुद्धिविकासाय प्रौढसंस्कृतापेक्षया सरलमानकसंस्कृतं सद्यः कार्यं करोति इति। तसमादेव अस्य लेखनस्य शीर्षकं **"सरलमानकसंस्कृतं नः धियः प्रचोदयेत्"** इति युक्तं सङ्गच्छते।

★★★★★

## छात्रेषु अध्यापकानां प्रभावः

**श्रीलक्ष्मी के**
शिक्षाशास्त्रिद्वितीयवर्षम्

आधुनिककाले शिक्षायै मानवाः कियत् प्राधान्यं यच्छन्ति इति वयं सर्वे जानीमः। शिक्षां विना अधुनिकसमाजे जीवनं कठिनं वर्तते । एतद्विज्ञाय सर्वेऽपि मानवाः स्वीय पुत्रम् अथवा पुत्रीं शिक्षितः/शिक्षिता भावयितुं प्रयतन्ते। तदनुसारं सः विद्यालयात् औपचारिकरूपेण शिक्षां प्राप्य शिक्षितः इति गौरवेण सह जीवनं अग्रे यापयति । किन्तु औपचारिकशिक्षाकाले विद्यालयात् बहवः घटकाः छात्रं प्रभावयति । तत्र अन्यतमः भवति अध्यापकः । विद्यालयीयशिक्षाकाले छात्रः पठने व्यापृतः भूत्वा अधिकाधिककालः अध्यापकैः सह कक्षायां यापयतीत्यः अस्य वैशिष्ट्यं महदस्ति । कैः प्रकारैः अध्यापकः छात्रान् प्रभावयति इति पश्यामश्चेत् तत्तस्य व्यक्तित्वेनाधारितं भवतीति दृश्यते।

एकः छात्रः दिनस्य सिंहभागोऽपि स्वीय विद्यालये यापयति । तत्र अध्यापकः एव छात्राणां मार्गनिर्देशकः, पालकश्च । तत्र यथा अध्यापकः छात्रान् निरीक्षते तथैव छात्रः अपि अध्यापकान् निरीक्षते । अत एव एकः अध्यापकः सदा आदर्शभूतः भवेत् । ज्ञानेन, कौशलेन, बुद्ध्या च आन्तरिकरूपेण आदर्शभूतश्चेत् व्यवहारेण, वेषभूषणेन, कर्मनिरतया च बाह्यरूपेणापि आदर्शभूतः भवेत् । शिक्षायाः उद्देश्येषु छात्राणां चारित्रिकविकासे अथवा व्यक्तित्वनिर्माणे अपि प्राधान्यं दत्तमस्ति।तदर्थम् अध्यापकानां योगदानमधिकमिति कारणेन अध्यापकः उत्तमव्यक्तित्वसम्पन्नः भवेत्।अध्यापकः पक्षपाती,कठोरः च न भवेत् । एतादृशानाम् अध्यापकानां पुरतः छात्राः स्वीयावश्यकताः अज्ञानञ्च प्रदर्शयितुं नेच्छन्ति । तेन कारणेन छात्रेषु दमनशीलत्वं तथैव गोपनस्वभावः च उत्पद्यते। अध्यापकः मनोवैज्ञानिकः, अभिप्रेरकश्च भवेत् । कक्षायाम् अनपेक्षितभीत्युत्पादनापेक्षया मितरूपेण छात्रेभ्यः अपि ईषद् स्वातन्त्र्यं दातव्यम् ।

वस्तुतः एकेन अध्यापकेन छात्राणां मनः चोरयितुं शक्यते चेत् शिक्षणाधिगमप्रक्रिया सरला प्रभावपूर्णा च भविष्यति । कथमिति चेत् पठनपाठनप्रक्रिययोः मध्ये जायमाना जामिता नाशनेन छात्राः स्वयं आन्तरिकरूपेण प्रेरिताः भूत्वा पठनाय सिद्धाः भवन्ति । यदा एकः छात्रः आन्तरिकरूपेण प्रेरितः भवति तदा सः शिक्षणक्रियाकलापं आनन्ददायकप्रक्रियारूपेण पश्यति । परन्तु यदा बाह्यरूपेण प्रेरितः भवति तदा सः शिक्षणाधिगमक्रियां किमपि कर्तव्यमिति चिन्तयति । अधिगमप्रक्रियायाम् आन्तरिकप्रेरणा एव प्रभावशाली वर्तते । यदि एकः छात्रः एकं विषयं नेच्छति परन्तु तं विषयं पाठयन्तम् अध्यापकम् आदर्शरूपेण इच्छति तर्हि अवश्यमेव विषयोऽपि सम्यक् पठिष्यति।एतस्य पृष्ठभूमौ कश्चन मनोवैज्ञानिकांशः विद्यते ।

अध्यापकेन केवलं पठने न पाठ्येतरप्रवर्तनेष्वपि अभिप्रेरको भवितुं शक्यते।कदाचित् अध्यापकः छात्रस्य जीवनदिशा परिवर्तनाय समर्थं लक्ष्यस्वीकरणे अपि साहाय्यति।एतावता प्रतिपादितं सर्वं छात्रेषु अध्यापकस्य सकारात्मकप्रभावः एव।परन्तु नकारात्मकप्रभावः अपि सम्भवति । अध्यापकस्य कुव्यवहारेण कदापि छात्रेषु नकारात्मकप्रभावाय अवसरः न दद्यात् । ये अध्यापकाः सकारात्मकप्रभावेन छात्रान् उद्धरन्ति ते अध्यापकाः छात्राणां मनसि आजीवनं आदरेण विलसन्ति । अतः वयं राष्ट्रनिमातारः शिक्षकाः एतद् मनसि निधाय कार्यक्षेत्रे कार्यं कुर्मः । तेन छात्राः उत्तमनागरिकाः भूत्वा अवश्यमेव राष्ट्रकल्याणाय प्रयतिष्यन्ते । राष्ट्रस्य कृते एतदर्थमेव आध्यापकानां सेवा भवेत् ।

★★★★★

## संस्कृभाषाद्वारा भारतस्य अभिवृद्धिः

**अभिरामी टि. एस्**

शिक्षाशास्त्रिद्वितीयवर्षम्

आधुनिकभारते संस्कृतभाषायाः स्थानं महदस्ति । इयं भाषा देवभाषा इत्यपि प्रसिद्धा। संस्कृतपठनेन संस्कृतिः, परोपकारचिन्ता, एकत्वम्, परस्परविस्वासः, सहकरणमनोभावः च नितरां वर्धते । इयं भाषा अस्माकं संस्कृतिम् उद्वहति। सर्वासां भारतीयभाषाणाम् उद्भावः संस्कृतात् एव भवतीत्यतः संस्कृतभाषापठनं सर्वभाषापठनेन तुल्यं भवति। भारतीयभाषासु सर्वास्वपि संस्कृतस्य प्राधान्यं प्रचुरतया प्रतिफलितम् । अस्माकं राज्येषु सर्वत्र इयं संस्कृतभाषा मातृभाषात्वेन विराजते च। संस्कृतभाषापठनेन उच्चारणशुद्धिः भाषाज्ञानं च वर्धते । अपि च सहिष्णुता, अखण्डता, संस्कृतिः, च वर्धते। अस्माकं भारतस्य सांस्कारिकस्त्रोतः भवति इयं संस्कृतभाषा । संस्कृतपठनात् ऋतेः कश्चन यथार्थभारतीयाः नैव भवेत् इति श्रीमता महात्मागान्धिना उक्तमस्ति।

अक्कादमिकतले , व्यवहारतले च अस्माकं संस्कतभाषा नितरां विराचते । कलोत्सववेदिषु संस्कृतस्य प्रत्येकं स्थानमस्ति 'संस्कृतोत्सवः' इति । सङ्गीतस्य साहित्यस्य च पठनाय संस्कृतज्ञानम् आत्यन्तापेक्षितमेव । भारतस्य अखण्डतायाम् संस्कृतभाषायाः योगदानं महदस्ति। साहित्ये शास्त्रे कलासु च संस्कृताचार्याः एव प्रथमगणनीयाः नितरां शोभन्ते। चतुर्वेदाः, वेदाङ्गाः, उपनिषदः, पुराणानि, षट् दर्शनानि, इतिहासद्वयं, पञ्चमहाकाव्यानि, सन्देशकाव्यानि किं बहुना सर्वास्वपि मेखलासु संस्कृतभाषायाः असूयावहं सानिध्यं अस्त्येव। अस्याः भाषायाः प्रचारणार्थं तद्वारा परिपोषणार्थं च केंद्रीय - राजकीय सर्वकाराः सुतरां श्रद्धालवः सन्ति । आकाशवाण्याम् , दूरदर्शने च संस्कृतवार्ताः प्रतिदिनं प्रसारयन्ति। प्राचीनाः संस्कृतग्रन्थाः पूनर्मुद्रिताः, मुद्रणानन्दरं विपणीम् प्रापिताः च ।

संस्कृतम् पठितुं केवलं इच्छैव आवश्यकी, यतः अस्याः पठनार्थं अवसराः सुलभाः। सामान्यजनानां मुखे इयं भाषा सरला, सुगमा च विलसतु इति विचिन्त्य संस्कृतभारती नाम संस्था सम्भाषणशिबिराणि, प्रशिक्षणशिबिराणि च आयोजयन्ति । संस्कृतम् केवलं वरेण्यभाषा एव, वेदेतिहासादिषु विद्यमाना इयं सामान्यजनानां कृते अप्राप्या, इयं कठिना, मातृभाषा एवमादि विरुद्धप्रचाराः दृश्यन्ते, तथापि सुघटिता, सुव्यक्ता सुमनोज्ञा च इयं अस्माकं संस्कृतभाषा सुशक्ता, प्रौढा च विलसन्ती अस्ति । आर्षभारतसंस्कारवाहिनी भवति इयम् भारतस्य अखण्डतायां अस्याः भाषायाः स्थानं अतुल्यमेव । संस्कृतभाषा सर्वेषां भारतीयानां अमूल्यसंपत्तिः भवति। अस्याः पठनाय सर्वे वयं उत्सुकाः भवेम, अत्र भेदभावनायाः आवश्यकता नास्ति ।

आधुनिककाले यत्र साहाय्येन गवेषणेन शास्त्रज्ञैः यानि कार्यणि उपज्ञातानि ततोप्यधिकानि अस्माकं पुरातनऋषिभिः उपज्ञातानि सन्ति । भारतीयचिकित्साशास्त्रस्य आयुर्वेदस्य योगायाः नाट्यकलायाः शिल्पशास्त्रस्य च लोके सर्वत्र अंगीकारः वर्धते। कूटियाट्टम् इति संस्कृतकलारूपस्य युनस्को इत्यस्य अङ्गीकारः लब्धः अस्ति ।

"यावत् भारतवर्षम् स्यात्, यावत् विन्ध्यहिमाचलयौ ।
यावत् गंगा च गोदा च तावदेव हि संस्कृतम्॥"

भारतीय संस्कृतिः द्रव्यं संस्कृतभाषा पात्रं च, पात्रं विना द्रव्यस्य उपस्थितिः कथं, कुत्र च साद्ध्या । एवं भारतीयविज्ञानं (दीपः) संस्कृतभाषा तैलं, तैलं विना दीपस्य ज्वलनं कथं साध्यं भवति । एवमेव चिरपुरातनी इयं संस्कृतभाषा अधुनापि नित्यनूतना विलसति। अतः सर्वभाषाणां सारभूतां संस्कृतभाषां पठितुं प्रयत्नं करिष्यामहे।

★★★★★

# यौनशिक्षा

**अतुल् श्रीराग् के आर्**

शिक्षाशास्त्रिद्वितीयवर्षम्

**उपोद्घातः**

कस्मिन्श्चित् विद्यालये अष्टमीकक्ष्यायां जीवशास्त्रविषये कश्चन अध्यापकः पाठयन् अस्ति । तदा केचन छात्राः शनैः हसन्तः सन्ति। अत्र जीवशास्त्रे अग्रिमान्वितिः प्रारभते, इयम् अन्वितिः तु मानवानां पुनरुत्पादनविषयेन सह सम्बन्धः अस्ति । अतः तु छात्राः हसन्तः शुश्रूषवः भवन्ति । तदा अध्यापकः अवोचत् -“इमां अन्वितिं स्वयमेव पठन्तु, स्वयं पठित्वा जानन्तु” इति ।

पूर्वं तु विद्यालयेषु इयं तु स्थितिः आसीत्। केवलं पुनरुद्पादनविषये पाठयितुम् अध्यापकाः पठितुं छात्राः च लज्जिताः अन्वभवन् । इदानीं सामूहिकमाध्यामानां प्रसरणेन स्थितिः तु परिवर्तिता चेदपि सर्वत्र परिवर्तनं न सञ्चातम्। केवलं पुनरुत्पादनविषये एवं स्थितिः वर्तते तर्हि यौनशिक्षणम् अत्र कथं प्रचलति। यौनशिक्षणं अस्माभिः गौरवरूपेण दर्शनीयमस्ति। प्रौढानामपि यौनशिक्षणविषये अन्यथा चिन्तनम् अथवा मूढचिन्तनं वर्तते।

**यौनशिक्षणस्य स्वरूपम्**

यौनशिक्षा नाम लैंगिकतायाः संवेदनात्मकशारीरिकसामाजिकज्ञानं वर्तते । तत्र तु यौवनविषये आर्तवगर्भनिरोधन-लैंगिकाक्रमणनिवारण-लैंगिकाभिविन्यास-लिङ्गज्ञानेत्यादिविषयेषु सुतरां चर्चाः क्रियन्ते । यौनशिक्षा स्वस्य परस्य च कल्याणाय भवति । किन्तु तस्य विषये तु इदानीमपि बहूनां जनानां भिन्नावधारणाः सन्ति। ते चिन्तयन्ति यौनशिक्षणं बालिकाबालकान् सम्भोगाय प्रेरयन्ति इति । एतत् तु सत्यं नास्ति ।

सम्भोगः स्वस्य इच्छा वर्तते, किन्तु तत्र किं करणीयम्? किं न करणीयम्? इत्यवगमनं स्यात् । तथा लैंगिकरोगावरोधः अज्ञातगर्भावरोधः च स्यात् । एतैः मूल्यैः ज्ञानैः बालिकाबालकेषु स्वास्थ्यविषये चिन्तनमपि स्यात् । तथा हितकरसामाजिकलैंगिकसंसर्गाः भवेयुः । सामान्यमानवविकासेन साकं यौनशिक्षणेन यौनविकासः च स्यात् । युवत्युवकानां स्वस्थजीवनाय समीचीनवातावरणनिर्माणाय यौनशिक्षणम् अत्यन्तप्रामुख्यम् अर्हति । यौनशिक्षणम् केवलं सम्भोगविषयष्वेव न परिसमाप्यते ।

**यौनशिक्षा आवश्यकता**

भारतजनसंख्यायाः षट् प्रतिशशतजनाः लैंगिकरोगेण पीडिताः सन्ति। प्रायः अष्टकोटिजनाः STD, HIV रोगिणः सन्ति । भारते गर्भवतीषु महिलासु ५०% महिलाः अज्ञातवशेन गर्भवत्यः जायन्ते, ताः मानसिकरूपेण सज्जाः न भवन्ति, गर्भनिरोधकविषयाज्ञानेन एवं सम्भवन्ति ।

भारते इदानीमपि अशास्त्रीयाः अस्वास्थ्यकराः आर्त्तवाचाराः प्रचल्यन्ते, एतेन महिलाः इदानीमपि वेदनाम् अवगणनां च सहमानाः वर्त्तन्ते । पुरुषाः PORN चलच्चित्राणि दृष्ट्वा तत्र यद् वर्तते तदनुकुर्वन्ति। ततः सम्भोगविषये मूढज्ञानमेव प्राप्नुवन्ति, तदेव बलात्काररूपेण परिवर्त्यते । प्रतिपञ्चदशनिमिषेषु एका महिला बलात्क्रियते, लघुबालिकाः अपि स्वस्य बन्धुजनेभ्यः पीडनम् अनुभवन्ति, ताः पीडिताः भूत्वापि समूहः न अङ्गीकरोति इति कारणेन तद्विषये बहिर्वक्तुं लज्जामनुभवन्ति । भारते भर्तृबलात्कारः अधिकः वर्तते, विवाहानन्तरं पुरुषाः स्व पत्न्याः उपरि अधिकारं स्थापयन्ति, तासां अननुमत्या सम्भोगे व्यवहरन्ति इति कारणेन तत् बलात्कारेण जायते । लिंगाभिज्ञानाय मानवाः बिभ्यति, यस्मिन् पुरुषे स्त्रीत्वं वर्तते , यस्यां स्त्रियां पुरुषत्वं वर्तते, तान् जनान् न

अङ्गीकुर्वन्ति इदानीमपि । तृतीयलिङ्गाः इदानीमपि समूहेन अवगण्यन्ते । LGBTQAI+ बन्धाः उत समलैंगिकविवाहः च अन्येषु इदानीमपि क्रोधं जुगुप्सां च जनयन्ति । इदानीमपि आर्तवसम्बन्धानि कार्याणि गोप्यानि सन्ति, मातापि स्वपुत्रं एतादृशानि कार्याणि उदितुम् ईर्ष्यते ।

एतादृश्यः बह्व्यः समस्याः समूहे इदानीं वर्तन्ते , अस्मिन् सन्दर्भे एव यौनशिक्षणस्य प्रसक्तिः।अत्र उक्ताः सर्वाः समस्याः यौनशिक्षणेन निवारयितुं शक्यन्ते । अनेन शिक्षणेन समस्याविषये मानवाः अभिजानन्तः भवन्ति। तासां निवारणोपायाः अपि प्राप्यन्ते।

**यौनशिक्षायाः प्राधान्यम्**

सर्वे बालिकाबालकाः जानीयुः, उत्तम स्पर्शः कः? अधमस्पर्शः कः? इति । यौवनकाले विद्यमानानि परिवर्तनानि न केवलं शारीरेण सह सम्बद्धः। अपि तु मानसा अपि सम्बद्धः । यौनशिक्षणम् एतन्निमित्तं सज्जी-करोति । यौनशिक्षा कदापि तेषु लैंगिकेच्छां न वर्धयति वस्तुतः तस्य विपरीतं करोति, ते परिपक्वाः भवन्ति, एतान् अंशान् गौरवेण अवलोकयन्ति । आर्त्तवविषये बालिकानां बालकानां च ज्ञानं स्यात् । बालकाः अपि Periods, Tampons, Sanitary Pads, Menstrual Cup इत्यस्मिन् विषयेषु अवजानीयुः। पुरुषाः सहमतेः संप्रत्ययं जानीयुः । लैङ्गिकातिक्रमप्रतिरोधाय बालिकाः सज्जीकुर्युः। लैंगिकरोगाः कथम् उद्पद्यन्ते तेषां निवारणं कथं भवेत् । गर्भनिरोधकविषये नियंत्रणविषये अधिकं ज्ञानम्। LGBTQAI+ जनाः अपि मानवाः तेषां अङ्गीकारः। अनेन सर्वप्रकारसमस्याः निवार्यन्ते।

**उपसंहारः**

अभिभावकाः चिन्तयन्ति एतान् अंशान् स्वपुत्राः प्रकृत्या अवजानन्ति , किन्तु ते अशुद्धज्ञानमेव प्राप्नुवन्ति, अतः यौनशिक्षणम् अभिभावकानामपि दायित्वमस्ति । अतः अध्यापकाभिभावकसहकरणेन यौनशिक्षा सर्वेषु विद्यालयेषु प्राथमिकस्तरादारभ्य अनिवार्यरूपेण भवेत् । अनेन स्वस्थशारिरिकमानसिकसमूहः निर्मीयते ।

★★★★★

## अनुसन्धानविधयः

**अरुन्धती चक्रवर्त्ती**

शिक्षाशास्त्रिद्वितीयवर्षम्

प्रत्येकमनुसन्धानं कस्याश्चिद् विशिष्टसमस्यायाः वैज्ञानिकमध्ययनं सम्पादयति । यदि समस्यायाः प्रकृतिः ऐतिहासिकी वर्तते तर्हि तस्मिन् अध्ययने ऐतिहासिकविधिः प्रयुज्यते । यदि समस्या वर्णनात्मिका वर्तते, तर्हि तदनुसन्धानं वर्णनात्मकमिति कथ्यते । यदि समस्या प्रयोगात्मिका अस्ति, तर्हि तदध्ययनं प्रयोगात्मकमित्युच्यते। अत एव अस्माभिः निगदितुं शक्यते यदनुसन्धानविधिः समस्याया उपरि आश्रितो भवति, अनुसन्धानविधीनां वर्गीकरणं विद्वभिः बहुप्रकारेण कृतमस्ति ।

शैक्षिकानुसन्धाने उत्तमविधेः चयनं महत्त्वपूर्णं भवति। शोधकर्तुः कृते समस्यायाः चयनात्परं तत्सम्बद्धप्रदत्तान् संकलयितुं समुचितविधिः अपेक्षितो भवति विषयानुगुणं परिशीलनमेव सफलं भवति विधीनां साहाय्यमाश्रित्य कस्मिंश्चित् अनुसन्धाने अग्रसरः भवितुमर्हति। अनुसन्धातुः अयमपेक्षितः यत् स्वीकृतसमस्यायाः

समाधानाय सफलफलितांशं सम्पादनाय च स्वीकृतविधिः वैज्ञानिक: तार्किकश्च भवेत्। अनुसन्धात्रा स्वीकृतसमस्यायाः अध्ययनाय परिशीलनाय च उत्तम: विधिः चेतव्यः । समस्याविध्योश्च मिथः घनिष्ठः सम्बन्धः वर्तते। अत एव समस्यायाः समाधानाय समुपयुक्तविधेः चयनं कर्तव्यम् । साम्प्रतं शैक्षिकानुसन्धानस्य क्षेत्रे बहवः विधयः उपयुज्यमानाः सन्ति। तद्यथा वर्णनात्मकविधि: (Descriptive Method), ऐतिहासिकविधि (Historical Method), प्रयोगात्मकविधिः (Experiment Method), व्यक्तिवृत्ताध्ययनविधिः (Case Study Method), चिकित्साविधिः (Clinical Method), सर्वेक्षणविधि: ( Survey Method) इति ।

वर्णनात्मकविधिः(Descriptive Method) - अयमनुसन्धानस्य एक: प्रमुख: विधिः वर्तते अस्य विधेः सम्बन्धः वर्तमानकालेन सह भवति विधिरयं किमस्ति एतस्य वर्णनं व्याख्याञ्च करोति अस्मिन् विधौ साम्प्रतिकविचाराः, विश्वासाः, अभिवृत्तयः, अनुभवाः, नवीनज्ञानादयश्च समाहिताः भवन्ति ।

ऐतिहासिकविधिः (Historical Method) - अयं विधिः ऐतिहासिकसमस्यानाम् अध्ययने अत्यन्तमुपकरोति अतीतकालमवगन्तुं मानवस्य स्वाभाविकरूचिः भवति सः भूतकालस्य ज्ञानमवाप्य वर्तमानेन साकं भाविजीवनं सुखमयं कर्तुं प्रयतते मानवसभ्यतायाः ऐतिह्यकालः कीदृशः आसीत् ? आदिसभ्यता कथं विकसिता? प्राचीनशिक्षाप्रणाल्या स्वरूपं किमासीत् ? प्राचीनभारतं कीदृक् आसीत् ? इत्यादीनां समस्यानामध्ययनमनेन विधिना सम्पाद्यते विधिरयं भविष्यं वर्तमानञ्चावगन्तुं भूतकालं विश्लेषयति ।

प्रयोगात्मकविधिः (Experiment Method) – भौतिकशास्त्रे रसायनशास्त्रे च प्रयोगशालायां विभिन्ननियन्त्रितपरिस्थितिषु पदार्थानां स्वभावस्य प्रायोगिकरीत्या अध्ययनं विधीयते। तथैव मनोविज्ञानशास्त्रेऽपि प्राणिनां व्यवहारस्य नियन्त्रितदशासु अध्ययनं क्रियते। अयं विधिः मनोविज्ञानस्य सर्वश्रेष्ठविधिः वर्तते । अनुसन्धानेष्वपि एतस्य विधेः अत्यन्तं महत्वपूर्णं स्थानमस्ति । प्रयोगात्मकविधौ अनुसन्धाता नियन्त्रितपरिस्थितौ अध्ययनं विदधाति अत्र शोधकर्ता द्वयोः चरयोः मध्ये कार्यकारणभावसम्बन्धं योजयति ।

स्टुवर्टचापिन्महोदयः- प्रयोगमित्थं परिभाषते - नियन्त्रितपरिस्थितिषु निरीक्षणमेव प्रयोगः इत्युच्यते प्रदत्तसमस्यायाः समाधानान्वेषणे केवलं निरीक्षणं निष्फलो भवति, तदा अनुसन्धाता प्रयोगम् आश्रयेत् ।

Experiment is simply observation under controlled conditions. When observation alone fails to disclose the factors that operate in a given problem, it is necessary for the scientist to resort to experiment- Stuart Chapin.

व्यक्तिवृत्ताध्ययनविधि: (Case Study Method) – विधिरयं मनोविज्ञानस्य एक: प्रमुखः विधिः वर्तते विद्यालये बालकानां बहव्यः समस्याः भवन्ति । काश्चन वैयक्तिकाः काश्चन सामूहिकाश्च भवन्ति तेषां व्यवहारस्य अध्ययनाय व्यक्तिवृत्ताध्ययनविधिः प्रयुज्यते अस्य विधेः समर्थकाः प्रतिपादयन्ति यत् बालकस्य व्यक्तेश्च व्यवहारः भौतिकपरिवेशेनपारिवारिकपरिवेशेन सामाजिकपरिवेशेन च प्रभावितो भवति । अतः कस्यचिद् विशिष्टबालकस्य व्यवहारं अवबोधयितुं तस्य समग्रपरिवेशस्य अध्ययनं करणीयम् । अत एव अस्मिन् विधौ बालकस्य व्यक्तेः वा समग्रव्यवहारस्य वैज्ञानिकरीत्या अध्ययन क्रियते ।

व्यक्तिवृत्ताध्ययनविधे: गुणाः - अनेन विधिना शिक्षक: समस्यायाः स्वरूपमवगन्तुं शक्नोति । मन्दबुद्धिमतां, मानसिकरूग्णानाञ्च बालकानामभिज्ञानं सरलतया सम्भवति । समस्यायाः गभीराध्ययनेन अधिगताः निष्कर्षाः प्रामाणिका: भवन्ति ।

सर्वेक्षणविधि:(Survey Method)- शैक्षिकक्षेत्रे शिक्षासम्बद्धसमस्यानां समाधानाय सर्वेक्षणविधिः अतीव उपयोगी विधिरस्ति। देवभाषायां तु सर्वेक्षणमेव। तत्र उपरिष्टात् ईक्षणं, दर्शनं निरीक्षणं वा इत्यर्थः। सर्वेक्षणविधिः कस्याश्चित् समस्यायाः वर्तमानस्वरूपं किमीप्सितम्, किंवा तात्पर्यमिति सर्वं विवृणोति । सर्वेक्षणमिति शब्दः आंग्लभाषाया: Survey इति शब्दस्य भाषान्तरः । सर्वेक्षणविधिः वर्तमानस्थिते: सूचको भवति पद्धतिरियं साम्प्रतिकं पूर्वस्थितिमनुसृत्य वर्तमानविषयं बोधयति। क्वचित् साक्षात् दृश्यमानानां सर्वेक्षणं विधाय दत्तांशानां सूचीन् प्रयच्छति। पद्धतिरियं शोधसम्बन्धिताभिः घटनाभिः परिस्थितिभिश्च सह सम्बन्धिता वर्तते। सर्वेक्षणविषये अनुसन्धानवेत्ता (गे ओग्रे) महोदय: एवमाह- "No category of Educational Research is more widely used than the types known variously as the survey, normative survey status & descriptive research. This broad classification comprises a variety of specific techniques and procedures.'

बेबस्टरकोशानुसारेण-"वास्तविकज्ञानस्योद्देश्यार्थं कृतमालोचनात्मकं निरीक्षणं सर्वेक्षणमिति कथ्यते।

**सर्वेक्षणविधेः विशेषता: -**

- सर्वेक्षणविधि अनुसन्धाने सामाजिकशैक्षिकतत्त्वानाम् अध्ययने अत्यन्तमुपकरोति।
- सर्वेक्षणविधिना सकृद् बहूनां जनानामभिमतानां ज्ञानं प्राप्तुं शक्यते।
- अनिवार्यरूपेणास्य प्रकृतिः प्रतिखण्डात्मिका भवति।
- अनया पद्धत्या विस्तृतं व्यापकञ्चाध्ययनं सम्पादयितुं शक्यते। अस्याः पद्धत्याः प्रयोगे धनस्य व्ययः अधिको न भवति।
- सर्वेक्षणपद्धतिः विश्वसनीयः वस्तुनिष्ठश्च तथ्यानां संकलने साहाय्यं प्रयच्छति।
- विधिरयं वैज्ञानिकसिद्धान्तानां संप्राप्तिः, ज्ञानस्य विकासे च उपयोगीति वर्तते।
- स्थानीयसमस्यानां समाधाने अपेक्षितसूचनां प्रददाति।

**सर्वेक्षणविधेः लाभा:-**

- अत्र बहूनां जनानां मतानि सकृत्काले ज्ञायन्ते। इदमेव च कारणम्, यदनेन विधिना प्राप्ताः परिणामाः मान्याः विश्वसनीयाश्च भवन्ति।
- अयं विधिः सामाजिक- शैक्षिक- नैतिकसंस्थानां समस्यां विज्ञाय समाधातुं मार्गं चिनोति।
- अयं कस्यापि विषयवस्तुनः घटनायाः वा वर्तमानदशां क्रमिकतया वर्णयितुं समर्थः।
- सर्वेक्षणविधिः मानवव्यवहारस्य बहुमूल्यं ज्ञानं विधातुमुत्तमं प्रत्यक्षसाधनभूतं वर्तते। सर्वेक्षणमिदं सामाजिक शैक्षणिक-नैतिककार्यक्रमाणां योजनानिर्माणे साहाय्यमाचरति।

★★★★★

# त्रिभाषासूत्रं संस्कृतञ्च

**सुवल कुमार मिश्र**
शिक्षाशास्त्रिद्वितीयवर्षम्

***त्रिभाषासूत्रम्*** —

भारतीयसर्वकारस्यादेशमनुसृत्य कैश्चिद्विद्वद्भिः त्रिभाषासूत्रं समर्थितम्। भारतसर्वकारेणापि समर्थितमनुमोदितं च तत् त्रिभाषासूत्रं भारतवर्षस्य सर्वेषु प्रान्तेषु प्रवर्तितम्। त्रिभाषासूत्रस्य ( Three language formula) किन्निमित्तं, कोऽत्र हेतुः, किमस्य प्रयोजनञ्च इति ज्ञातव्यम् । भारतवर्षे शिक्षाक्रमे भाषाणां पौर्वापर्यम्, उच्चावचत्वं, न्यूनाधिकत्वञ्चाश्रित्य विविधाः विवादाः प्रादुरभूवन् । तद्विवादशान्तये समरूपताऽऽकलनाय च त्रिभाषासूत्रस्य जनिरभूत् । त्रिभाषासूत्रप्रवर्तकानामभिमतमेतद् यत् शिक्षाक्रमे भाषाणां तथा समन्वयः सङ्कलनञ्च स्याद् यथा राष्ट्रहितसम्पादनेन सममेव अध्येतॄणां वैज्ञानिकी, भौतिकी चोन्नतिः संजायेत । एतद् विमृश्य राष्ट्रभाषारूपेण आर्यभाषाया हिन्दीभाषाया वा प्रथमस्थानं निर्दिश्यते । एवं हिन्दीभाषा सर्वोत्कृष्टत्वमाश्रयते । अन्ताराष्ट्रियज्ञानोपादानार्थं वैदेशिक्याः कस्याश्चन भाषायाः अनिवार्यरूपेणाध्ययनमन्वभूयत तत्राङ्ग्लभाषाया अन्ताराष्ट्रियख्यातिमुद्दिश्य पराधीनताकालिकीं च तत्प्रसृतिमाश्रित्य द्वितीयाऽनिवार्य - भाषारूपेणाङ्ग्लभाषा समर्थिता । सन्ति भारते विविधाः प्रादेशिकभाषाः, यासां साहित्यमपि प्रचुरं, प्रशस्तं, हृद्यं, लोकपयोगि, ज्ञानविज्ञानवर्धकञ्च । सर्वेषां भारतीयानां प्रादेशिकभाषाज्ञानमपि नितरामनिवार्यम् अनुदिनं तत्प्रयोगोपपत्तेः । एवं प्रान्तीया भाषा: तृतीयं स्थानमलभन्त । अत्र राष्ट्रभाषा - अन्ताराष्ट्रियभाषा - प्रान्तीयभाषाणां समाहारः समन्वयश्च अभीष्यते ।

***त्रिभाषासूत्रे संस्कृतम्*** —–

त्रिभाषासूत्रं सूक्ष्मेक्षिकया परीक्ष्यते विविच्यते चेत् संस्कृतभाषा भर्तृविरहिता नारीव, पुत्रादिपरित्यक्ता मातेव, निर्वसना, अवधूता, अवहेलितेव संदृश्यते। न भारतीयानामध्येतॄणां तादृशं श्रमाभिमुखत्वं विविधभाषाज्ञानाभिरुचित्वं च येन भाषात्रयाध्ययनानन्तरं तुरीयभाषाध्ययनं सम्भाव्येत यद्यपि विदेशेषु सन्ति तादृशाः प्रदेशाः जर्मनी - फ्रांस- स्विट्जरलैण्डप्रभृतयः यत्र भाषात्रयं भाषाचतुष्टयं वा सामान्यजनैरपि अधीयते, शिक्ष्यते, व्यवह्रियते च । परं न भारते वर्षे तादृशी भाषा- जिज्ञासा, अभिरुचिश्च अतः कृतेऽपि प्रयत्ने भारते चतुर्थभाषाध्ययनं सर्वथोपेक्ष्यते । येषां प्रदेशानां न प्रान्तीया भाषा हिन्दी-भाषा, ते स्वप्रान्तीयभाषाध्ययने प्रवर्तन्ते अन्ताराष्ट्रियभाषारूपेण सत्यपि जर्मन-फ्रेंच-रूसी-भाषाणां सङ्ग्रहे आङ्ग्लभाषैव सर्वकारस्याभिप्रेता, समर्थिता, प्रचारिता च। राष्ट्रभाषारूपेण हिन्दीभाषाध्ययनं तेषां कृते अनिवार्यम् एवम् अहिन्दीभाषिषु प्रान्तेषु संस्कृतस्य शिक्षाक्रमे स्थापनमध्यापनं च दुष्करमिव प्रतीयते । हिन्दीभाषिषु प्रदेशेषु राष्ट्रभाषा हिन्दी द्वितीयभाषारूपेण पाठ्यते तृतीयभाषारूपेण दाक्षिणात्य भाषा, संस्कृतभाषा वा वैकल्पिकरूपेण स्वीक्रियते यत्र कुत्रापि दाक्षिणात्य भाषाध्ययने दुराग्रहो निधीयते तत्र गीर्वाणवाण्याः कृते प्रवेशो निषिद्ध एवावगन्तव्यः । कियन्तः सन्ति तादृशाः संस्कृतानुरागिणो ये धर्मभावनया कर्तव्यबुद्ध्या तत्त्वार्थज्ञानाधिगमाय वा संस्कृभाषाध्ययने प्रवृत्ताः। एवं सुकरमेतद्वक्तुं यत् त्रिभाषासूत्रं संस्कृतभाषाध्ययने प्रत्यवायरूपमेव, न तु साधकम् । त्रिभाषासूत्रेणानेन आङ्ग्लभाषाप्रचारे महत्साहाय्यमदायि इति निर्विवादम् । राष्ट्रभाषायाः कृते प्रान्तीयभाषाणां च कृते मार्गः प्रशस्यते, परं संस्कृतस्य कृते मार्गावरोध एवाविर्भाव्यते ।

***शिक्षाक्रमे संस्कृतस्य स्थानम् –***

साम्प्रतिकः शिक्षाक्रमो भारतसर्वकारादेशानुसारं प्रवर्त्यते । यद्यपि त्रिभाषासूत्रानुसारं शिक्षाक्रमः प्रतिप्रदेशमायोज्यते प्रचार्यते च । सन्ति केचन प्रदेशाः यत्र संस्कृतस्य गौरवमनुरुध्य तत्संरक्षण - बुद्ध्या च हिन्दीभाषापाठ्यक्रमे एव न्यूनाधिकरूपेण संस्कृतस्य समावेशो विधीयते । एवं क्षतविक्षताया अपि देववाण्याः वाङ्मात्रोपचारः शुश्रूषणं च सम्पाद्यते । एवमेवोच्चकक्षास्वपि संस्कृतस्य यत्र तत्र समन्वय आधीयते परं सर्वमेतत् संस्कृतभाषाप्रचारदृष्ट्या न पर्याप्तम्, न च श्रेयोवहम् । हिन्दीभाषिषु प्रान्तेषु तृतीयभाषारूपेण संस्कृतस्य शिक्षाक्रमे स्थानमनिवार्यत्वेन सम्भाव्यते, - आशास्यते च । अहिन्दीभाषिषु प्रदेशेषु तथाविधो विधिविधेयः यथा अनिवार्यरूपेण संस्कृताध्ययनं सम्भाव्येत । तदर्थं हिन्दीभाषापाठ्यक्रमे प्रान्तीयभाषापाठ्यक्रमे वा न्यूनाधिकरूपेण संस्कृतस्य समाहारो विधेयः । संस्कृतं हि परमो निधिर्भारतस्य । कथमप्युपेक्षिता संस्कृतभाषा राष्ट्रस्य विनाशायैव भविता । यदा संस्कृतस्य गुणगौरवमुग्धाः पाश्चात्त्या अपि देशाः संस्कृताध्ययने प्रवर्तन्ते, विश्वविद्यालयादिषु संस्कृताध्ययनाध्यापनादेर्व्यवस्थामातिष्ठन्ते, तदा किं नैतद् दुःखावहं, खेदजनकं च यद् भारते संस्कृतभाषा उपेक्ष्येत । प्राचीनसंस्कृतिसंरक्षणार्थम्, भारत- वैभवज्ञानार्थम्, अध्यात्मतत्त्वावबोधाय विविधशास्त्रावगाहिज्ञानोपादानाय च, वीणापाणि- वाङ्मधुरं संस्कृतवाङ्मयं सर्वथा शिक्षाक्रमे प्रवेश्यम् आधेयं च ।

***संस्कृति संस्कृतञ्चच***

'भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा", सम् इत्युपसर्गपूर्वक कृञ्धातोः 'स्त्रियां क्तिन्' प्रत्यये सति 'संस्कृति:' इति शब्दः निष्पन्नो भवति । संस्कृतिमूलं संस्कृतम्। साहित्यं संस्कृतिवाहकमस्ति । एषा संस्कृतिः न केवलं भारतदेशस्य अपि तु समग्रविश्वस्य मुकुटायमानाऽस्ति । अधोभागे केचन श्लोकाः संस्कृतेः संस्कृतस्य च महत्वं प्रतिपादयन्ति -

सत्य अहिंसादि गुणैः श्रेष्ठा विश्वबन्धुत्वशिक्षिका ।
विश्वशान्ति सुखाधात्री भारतीया हि संस्कृतिः ॥
संस्कृते संस्कृतिर्ज्ञेया संस्कृते सकलाः कलाः ।
संस्कृते सकलं ज्ञानं संस्कृते किन्न विद्यते ॥
संस्कृतेन सुसम्पन्नं भारतं भारतमुच्यते ।
संस्कृतेन विना देशः केवलं चेण्डियोच्यते ॥

**अनुशीलितग्रन्थाः –**

1 – संस्कृतशिक्षणम् – नवीनप्रविधिश्च, लेखकः – डा. च.ल.ना. शर्मा - डा. फतेहसिंहः , प्रकाशकः – आदित्यप्रकाशनम् , जयपुरम्-2008 .

2 – संस्कृतशिक्षणम् – लेखकः -डा. उदय शङ्कर झा, प्रकाशकः – चौखम्बा सुरभारती प्रकाशन , वाराणासी – 2013 .

3 – संस्कृतनिवन्धशतकम् – लेखकः – डा. कपिलदेव द्विवेदी, प्रकाशकः – विश्वविद्यालय प्रकाशन, वाराणासी – 2021 .

4 – विकिपीडिया – Wikipedia.org

★★★★★

## आधुनिकवातावरणानुगुणं संस्कृतशिक्षणस्य पुनर्नवीकरणम्

***मुक्ता एम् वी***

शिक्षाशास्त्रिद्वितीयवर्षम्

***पृष्ठभूमिः***

संस्कृतं सर्वासां भारतीयभाषाणां जननी भवति चेदपि आधुनिकेऽस्मिन् काले संस्कृतपठितॄणां संख्या न्यूना जायमाना वर्तते । छात्राध्यापिका भूत्वा विद्यलयप्रशिक्षणसमये अस्माभिः बहवः प्रतिबन्धाः अनुभूताः । चाणक्यसूत्रेषु अन्यतमं वर्तते " **गतानुगतिको लोकः"** इति । अतः कालानुगुणं समाजः अपि परिवर्तते । नवीनसमाजे छात्रेषु भाषाविषयेषु तावती रुचिर्नदृश्यते । अस्य कारणानि विभिन्नानि वर्तन्ते।तेषु धार्मिक-राजनैतिक-सांस्कृतिकरूपेणापि प्रतिबन्धाः सन्ति । भाविभारतशिक्षकाः भूत्वा अस्माकं उत्तरदायित्वं किमिति चेत् अधुना शैक्षिकक्षेत्रे सामान्यजनानां कृते संस्कृतपठने अनुभूयमानान् क्लेशान् प्रतिबन्धान् च निवार्य संस्कृतस्य सामाजीकरणमेव । अतः संस्कृतक्षेत्रे विद्यमानान् केचन दोषान् च अत्र प्रतिपादयामि।प्राचीनकालात् वर्तमानकाले विश्वे समस्तसाहित्यक्षेत्रे बहूनि परिवर्तनानि आगतानि । तद्वत् समाजोऽपि परिवर्तते । आदौ तावत् साहित्यकृतिषु केवलं प्रकृतेः मानवविकाराणां च वर्णनमेव मुख्यम् आसीत् । परन्तु अधुना अत्यन्तप्राधान्ययुक्ताः विषयाः एव चलच्चित्रेष्वपि चित्रीकरोति । जनानां आस्वादनस्तरः परिवर्तितः । अतः विषयोपि परिवर्तनीयः । अस्मिन्नवसरे संस्कृतपाठ्यपुस्ताकानां विषये पुनर्विचिन्तनमनिवार्यमेव ।

**विषयः**

भारते प्रत्येकं राज्यमपि संस्कृत्यनुसारं विभिन्नं वर्तते । अस्माकं भारते **नानात्वे सति एकत्वरूपं** वैशिष्ट्यं वर्तते । एतत् वैविध्यं राज्यानां पाठ्यक्रमेषु अपि प्रतिफलति । केरलात् बहिः केचन विद्यालयप्रवेशनात् पूर्वं बाल्यादेव संस्कृतम् अभ्यसन्ति । परन्तु केरले तादृशपरम्परा अधिकतया न भवति । अतः छात्राणां कृते विद्यालयेषु अत्यन्तसरलमानकसंस्कृतेन एव पाठनीयम् । नो चेत्संस्कृते काठिन्यं अनुभवन्ति । विषयेषु अपि सारल्यम् आवश्यकम् । छात्राः सम्प्रति महाकाव्यानि चेदपि कालिदासादि कवीनां कृतयः नेच्छन्ति । काव्यानां प्रौढत्वं दीर्घत्वं च तत्र कारणं भवति । अतः प्राथमिकस्तरेषु केवलं कथारूपेण एव काव्यानि शाकुन्तलादिनाटकानि पाठनीयानि ।

**"प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते"** इति वाक्यं सर्वदा संस्कृतशिक्षकाणां मनसि भवेत् । भवन्तः संस्कृतं पठन्तु इति कथने सति झटिति जनाः पृच्छन्ति संस्कृतं पठित्वा कः लाभः इति। निर्भाग्यवशात् अस्माकं सविधे अपि अस्य प्रश्नस्य समुचितम् उत्तरं नास्ति । वयं इदानीमपि शतकेभ्यः पूर्वं संस्कृतं किम् आसीत् कथम् आसीत् तस्य वैशिष्ट्यं किम् आसीत् इति भूतकालिककार्याणि एव पठामः । एतादृशविषयेषु छात्राः रुचिं न प्रकटयन्ति। तेषां कृते अनेन आधुनिके काले किं प्रयोजनम् इति बोधनीयम् । संस्कृते विद्यमानवैज्ञानिकविषयाणां परिचयः दातव्यः । तेन छात्राः उत्सुकाः भवन्ति। साहित्यकृतयः प्रायः समाजस्य प्रतिबिम्बाः भवन्ति । संस्कृतग्रन्थाः प्रायः सर्वेपि बहुवर्षेभ्यः पूर्वं लिखिताः वर्तन्ते । अतः तदानीन्तनसमाजसम्मतविषयाः एव तत्र प्रतिपादिताः । तेषु बहवो विषयाः अधुनिकसमाजे अनपेक्षिताः भवन्ति । अतः पाठ्यक्रमात् तादृशविषयाणां तिरस्कारः कर्तव्यः ।

पुनः संस्कृतोत्सवादिषु स्पर्धासु अपि नवीनता आनेतव्या।आशुभाषणम् – उपन्यासरचना- भाषणम् इत्यादिषु स्पर्धासु समकालीनविषयाः एव भवेयुः । अधुना केरले युवजनोत्सवादिषु नाटकस्पर्धाः भवन्ति। तत्र संस्कृतसम्बन्धस्पर्धाः अपि भवति । परन्तु संस्कृतनाटकानां प्रेक्षकाः अङ्गुलीगण्याः भवन्ति । कारणं तु संस्कृते अवलम्बमानप्राचीनरीतिः एव । अस्मिन् एकविंशतिशतकेऽपि भासनाटकचक्रमेव प्रस्तौति । नूतननाटकानि रचनीयानि । बालानां कृते बालसाहित्यकृतयः अपेक्षन्ते । सङ्गणकादिप्रविधीनाम् उपयोगः कर्तव्यः । संस्कृतस्य विश्वव्याप्तिः ज्ञापनीया ।

अधुनापि जनानां मध्ये संस्कृतम् एकवर्गीयाणां एव भाषा इति मिथ्याधारणा वर्तते । विद्यालयेष्वपि प्रायः सैन्धवाः एव अधिकतया संस्कृतं पठन्ति । अन्येषां संख्या न्यूना भवति । तत्रापि अनुसूचितजनजातयः संस्कृतात् दूरे एव तिष्ठन्ति । तादृशमनोभावानां दूरीकरणाय प्रयत्नः विधेयः । पाठ्यक्रमेऽपि सर्वान् आकर्षयितुं योग्याः विषयाः स्थापनीयाः ।

आधुनिककैरलीभाषां संस्कृतात् पृथकीकर्तुं नैव शक्यते।यतः षोडशशतकात् आरभ्य कैरलीभाषायां संस्कृतीकरणमभवत्। अतः नवतिप्रतिशतमलयालशब्दाः संस्कृतशब्दाः एव भवन्ति। परन्तु तदानीमपि संस्कृतं निर्जीवावस्थातः जीवावस्थां प्रति आगच्छत् एव अस्ति। छात्राः अधुना स्वीयमातृभाषासु अपि व्याकरणाद्यंशान् न पठन्ति । विद्यालयसम्प्रदाये साम्प्रतं वैज्ञानिकविषयाणामेव प्रसक्तिः।अतः तस्मिन् सन्दर्भे संस्कृतव्याकरणपाठनं प्रभावपूर्णं न भवति । अतः छात्राणां स्तरानुगुणं व्याकरणं इति शीर्षकं विना व्याकरणनियमानां बोधनं स्यात्।

पुनः न्यायशास्त्रे विद्यमाननां “प्रर्वतो वह्निमान् धूमात्”इत्याद्युदाहरणानां, स्थालीपुलाकन्यायः इत्यादि लौकिकन्यायानां जपमनुप्रावर्षत् इत्याद्युदाहरणानां पाठनसमये शिक्षकाः अतीवजागरूकाः भवेयुः। यतः आधुनिकछात्राः सतर्काः चिन्तनशीलाश्च भवन्ति। तेषां पुरतः प्रस्तूयमानविषयाःयुक्तियुक्ताः भवेयुः।

***<u>निष्कर्षः</u>***

शिक्षया एव आधुनिकनागरिकाः उत्पद्यन्ते। अतः शिक्षाप्रदानमेव भवति सर्वश्रेष्ठं कार्यम्।भारतं तु संस्कृतेः कारणेन विशिष्टं वर्तते। सा संस्कृतिः संस्कृताश्रिता भवति। अतः संस्कृतेः पोषणाय संस्कृतस्य वर्धनाय नियुक्ताः भवन्ति संस्कृतशिक्षकाः।प्रत्येकस्मिन् काले तत्तत् समाजानुगुणपरिवर्तनानि विश्वे सर्वेषु विषयेष्वपि जायन्ते। संस्कृतक्षेत्रेऽपि तादृशपरिवर्तनानि अपेक्षितानि। संस्कृतस्य समाजे निर्जीवावस्थां त्यक्त्वा पुनः तस्य प्रौढत्वं प्रति आगन्तुं इमानि परिवर्तनानि अत्यन्तापेक्षितानि। संस्कृतं सार्वजनिकं कर्तुं परिवर्तनानि आवश्यकानि च भवन्ति। आधुनिकतया सह संस्कृतेन गन्तव्यं वर्तते। एतावता किम् आसीत् इति कथनापेक्षया अग्रे संस्कृतेन किं भविष्यति, किम् आवश्यकम् इति चिन्तनं एव अपेक्षते। लोकस्थाः अतिवेगेन धावन्तः सन्ति। तत्र वयम् अलसतां प्रकटयामः चेत् संस्कृतस्य उन्नतिः कदापि न भविष्यति।अतः समाजम् अङ्गीकृत्य अग्रे गन्तव्यम् इति संस्कृतज्ञानाम् आवशयकता वर्तते ।

★★★★★

## छात्राधिगमे विद्यालयातिरिक्तशिक्षणस्य प्रभावः

**अञ्जना. एस्.**

शिक्षाशास्त्रिद्वितीयवर्षम्

**सङ्ग्रहः**

इदानींतनकाले प्रायः सर्वे छात्राः विद्यालयगमनादपि प्राधान्यम् विद्यालयातिरिक्तशिक्षायां (Tution) प्रददति । इदं चिन्तनं समीचीनं वा तर्हि पुरातनकाले विद्यालयातिरिक्तशिक्षायाः प्रारूपं किमासीत्? सम्प्रति तस्याः गतिः कीदृशी वर्तते? तस्याः वैशिष्ट्यं किम्? दोषाः के? इत्यादयः विषयाः शोधप्रबन्धेऽस्मिन् समाकलिताः वर्तन्ते।

### मुख्यपदानि

- विद्यालयातिरिक्तशिक्षा - विद्यालयेतरस्थानेषु अर्थात् गृहेषु स्वायत्तशिक्षाकेन्द्रेषु वा पाठ्यक्रमस्य पुनश्शिक्षणरूपेण या शिक्षा प्रदीयते सा विद्यालयातिरिक्तशिक्षा भवति ।
- वैय्यक्तिकशिक्षकः- एकाधिकविषयान् जानाति तान् शिष्यं शिष्यान् वा बोधयति ।
- व्यावसायिकी- उपजीविकां कृत्वा मानवः स्वीयकौशलेन धनमर्जयति ।

### उपोद्घातः

पुरातनकाले विद्यालयशिक्षणं कुत्रापि नासीत् । तदानीम् अधुनातनकाले प्रचलिता गृहसम्बद्धशिक्षापि नासीत्। अन्यथा वदामश्चेत् शिक्षा तदा केषुचित् वरिष्ठजनेषु सीमिता आसीत्। पाश्चात्यलोके तदानीन्तन-वैय्यक्तिकशिक्षकाः दार्शनिकाः आसन्। यथा अलेक्साण्टर्चक्रवर्तिनः वैय्यक्तिकशिक्षकः आसीत् । अर्थात् तस्मिन्काले सर्वेषां कृते शिक्षा नासीत् तथा आढ्यानां पुत्रेभ्यः वैय्यक्तिकशिक्षकाः शिक्षामददत्, न तु विद्यालयः। पुरातनशिक्षकाः न केवलं छात्रेभ्यः ज्ञानं प्राददत् अपि तु जीवने तेषां दायित्वानि कानि, समूहे कथं व्यवहर्तव्यम् इत्यादीन् सर्वान् विषयानज्ञापयन्। शिष्याणां पालनम् अभिभावकेभ्योऽप्यधिकं शिक्षकाः एवाकुर्वन्। किन्तु सद्यःकाले अनाधिकारिकीशिक्षायाः स्वरूपमेव भिन्नं वर्तते।

### आधुनिककाले विद्यालयातिरिक्तशिक्षा

इदानीन्तनकाले विद्यालयातिरिक्तशिक्षा व्यावसायिकी अस्ति । येषां हस्ते धनम् अधिकं वर्तते ते बहुषु अनाधिकारिकीशिक्षाकेन्द्रेषु विभिन्नानां वैय्यक्तिकशिक्षकाणाञ्च पुरतः स्वीयापत्यान् प्रेषयन्ति। तद्दृष्ट्वा दरिद्राः अपि स्वपुत्रः शिक्षायां पृष्ठतः मा भवेदिति धिया कथञ्चित् तस्मै तादृशीं शिक्षां प्रददति।

**विद्यालयातिरिक्तशिक्षायाः वैशिष्ट्यम्**

विद्यालये पठितांशज्ञानस्य कौशलानाञ्च दृढीकरणं शिक्षायामस्यां सम्भवति। यत्र विद्यालयीयशिक्षा प्रभाविता नास्ति तत्र परीक्षासु उत्तमाङ्कान् प्राप्य जीवने अग्रे गन्तुं स्वपुत्रेभ्यः वैय्यक्तिकशिक्षणमवश्यं दातव्यमिति पितरः चिन्तयन्ति।

**विद्यालयातिरिक्तशिक्षायां न्यूनताः**

इदानींतनकाले अनया शिक्षया प्रातःकालादारभ्य रात्रिकालपर्यन्तं छात्राः प्रत्येकं विषयं पठितुं विभिन्न-शिक्षकाणां मिथः धावन्तः सन्ति । बहवः छात्राः अभिभावकाश्च विद्यालयस्य अपेक्षया एतादृशशिक्षायै प्राधान्यम् प्रददति । कुत्रचित् छात्राणां गृहकार्याणि वैय्यक्तिकशिक्षकाः विलिख्य ददति ।

**निष्कर्षः**

शैशवादारभ्य शिशून् गृहे न स्थापयित्वा जनाः शिक्षणाय पार्श्वस्थगृहे विद्यमानायाः भगिन्याः समीपं प्रेषयन्ति । अभिभावकाः शिशुना सह भाषणं न कुर्वन्ति । अन्ततो गत्वा शिशवः गृहजनानां वाक्यं न शृण्वन्तीति वदन्ति । छात्राणां मानसिकस्थितिः अविगणय्य अङ्कप्राप्त्यर्थं तान् पीडयन्ति । अतः यदि विद्यालये एव छात्रेभ्यः पर्याप्तशिक्षणं नूतनतन्त्रज्ञानानुसारेण प्रदीयते तर्हि अनाधिकारिकीशिक्षाभ्यः छात्रान् रक्षितुं शक्नुमः।

**परिशीलिततन्त्रांशसूची**


1. https://kosha.sanskrit.today
2. https://www.superprof.co.in
3. https://www.ashtadhyayi.com (तन्त्रांशः)
4. https://sanskritabhyas.in
5. प्रो. मदनमोहनझा, अमरकोशतन्त्रांशः।
6. प्रो. मदनमोहनझा, धातुरूपमालातन्त्रांशः।
7. प्रो. मदनमोहनझा, शब्दरूपमालातन्त्रांशः।


★★★★★

# ब्रह्मचर्यम्

**विवेक कुमार मिश्र**

शिक्षाशास्त्रिद्वितीयवर्षम्

उपोद्घात:

ब्रह्मवेद: तं चरति ,आचरति पठति वा स ब्रम्ह्चारी । अस्माकं महर्षिभिर्मनुष्याणां जीवनं चतुर्षु भागेषु विभक्तम् । तेषां प्रथमो ब्रह्मचर्य:, द्वितीयो गृहस्थाश्रम:, तृतीयो वानप्रस्थ:, चतुर्थश्च सन्यासो विद्यते। चतुराश्रमपरायणा भारतीया: ब्रह्मचर्यकाले अन्यान् व्यापारान् परित्यज्य विद्याभ्यासं कुर्वन्ति, ब्रह्मचर्यमपि पालयन्ति। ब्रह्मचर्यस्य पालनान्तरमेव विद्यार्थिन: गृहस्थाश्रमभजन्त। अत एव एकस्मिन् समये एकस्यैव कार्यस्य सम्पादनात् ते नैपुण्यं प्राप्नुवन् । केषाञ्चन् विदुषां मते वीर्यस्य रक्षणमेव ब्रह्मचर्यम् इति कथ्यते। अन्येषां विदुषां मतमिदं विद्यते यद् ब्रह्मणो ज्ञानमेव ब्रह्मचर्यमस्ति। वस्तुत:प्राचीनकाले वेदाध्ययनं, गङ्गास्नानं,इत्यादि कार्यं विद्यार्थिन: ब्रह्ममूहुर्तेव क्रियते ।

एक:शयीत सर्वत्र न रेत:स्कन्दयेत् क्वचित्।

कामाद्धि स्कन्दयन् रेतो हिनस्ति व्रतमात्मन:।। (मनुस्मृति:)

मनुना उक्तम् - ब्रह्मचारिणां कृते वीर्यस्य रक्षणमेव प्रथमं कर्तव्यं प्रतिपादितम्। अत एव स्पष्टमिदं प्रतिभाति यद् ब्रह्मचर्यकाले सर्वैरपि विद्यार्थिभि: स्ववीर्यस्य रक्षा विधातव्या वेदानाञ्च स्वाध्यायोऽवश्यमेव कर्तव्यः। ब्रह्मचर्यपालनस्यातीवाऽवश्यकता विद्यते। ब्रह्मचर्यविरहितो जनो लोकेऽस्मिन् न किमपि महत्त्वपूर्णं कार्यं प्रभवति। ब्रह्मचर्यवरणात् शरीरे बलं बुद्धिमयते उत्साहश्चाधिक्यमायाति। बलाधिक्येन मनुष्या:असाध्यमपि कार्यं सुसाध्यं कर्तुं पारयन्ति।

अक्षीणो वित्तत:क्षीणो वृतत्तस्तु हतो हत:

ब्रह्मचर्यस्य महिमाऽलौकिकी विद्यते। ये मानवा:अस्य पालनं कुर्वन्ति। ते मृत्युमपि जेतुं प्रभवन्ति, सांसारिकान् विषयान् ब्रह्मचर्यस्यैव बलेन देवा मृत्युमपि अजायन् । श्रुतिरपि तारस्वरेणोद्घोषयति यत् ब्रह्मचर्येण तपसा देवा मृत्युमपाघ्नत् ।

मरणं बिन्दुपातेन जीवनं बिन्धुधारणात्।

प्राचीनकाले ब्रह्मचर्यपरायणा एव मरणशीला अपि पुरुषा: अमृतत्वमभवन्। बालब्रह्मचारिणा भीष्मपितामहेन ब्रह्मचर्यस्यैव प्रतापात् मृत्युरपि जिता इति जानन्ति एव महाभारतपाठका:। प्राचीनसमये छात्रावस्थायां ब्रह्मचर्योपरि समधिकं महत्त्वं दीयते स्म। सर्वेषां छात्राणां कृते ब्रह्मचर्यपालनम् अतीव आवश्यकं चासीत्। पुन:चतुर्णां वेदानां गीतानां मनुस्मृतीनाञ्च स्वाध्यायं तेषां कृते ब्रह्मचर्यस्य महत्त्वमासीत् । तेषामाहारविहारनियमाः अतीव कठिनाः आसन्, ब्रह्मचारिर्नियमान् महर्षिमनुरित्थं प्रतिपादयति।

वर्जयेन्मधुमांसं च गन्धं माल्यं रसान् स्त्रिय: ।

सूक्तानि यानि सर्वाणि प्राणिनां चैव हिंसनम् ।। (मनुस्मृति:)

द्यूतं च जनवादं च परिवादं तथाऽनृतम् ।

स्त्रीणां च प्रेक्षणालम्भमुपघातं परस्य च ।। (मनुस्मृति:)

एतेषां कठोरनियमानामिदं फलमासीद् यद् विद्यार्थिनो भागेभ्य:पराङ्मुखा:सन्तो वेदशास्त्रानुशीलनमेव सम्यक् सम्पादयन्। ब्रह्मचर्यस्य रक्षार्थं छात्रै:सर्वदा सदाचारप्रतिपादकानां ग्रन्थानाम् अध्ययनं विधेयम्।

सत्सङ्गति:कथय किन्न करोति पुंसाम् इति सुभाषितम्। (नीतिशतकम् 23)

अत एव छात्रै:सर्वदा दुर्जनानां सङ्गं त्यक्तवा सत्सङ्गति:कर्तव्या।

छात्रै:ब्रह्मचर्यस्य पालनं सर्वदा सर्वथा च करणीयम्। यथा अस्माकं ऋषिमहर्षिणा प्राचीनकाले क्रियते स्म। तथैव वयमपि कुर्याम। अन्यानपि बोधयाम:, तेऽपि ब्रह्ममुहूर्तकाले उत्थाय अध्ययनाध्यापनञ्च कुर्यु:।

★★★★★

## आयुर्वेदस्य सिंहावलोकनम्

**वैष्णा**

शिक्षाशास्त्रिद्वितीयवर्षम्

प्राचीनकाले रोगाणां कारणम् अशुद्धचित्तमेव इति पण्डितैरमन्यत । अशुद्धचित्तेन दोषा: सम्वर्धन्ते, तैः शरीरं पीड्यते, तत् रोगाणां मूलकारणं भवेत्। आसक्त्या वातः द्वेषेण पित्तं मोहेन कफं च सम्बर्धते । वातपित्तकफानाम् असन्तुलनेन मृत्युः सम्भूयते।

रोगा: त्रिधाः कर्मजम् दोषजम् उभयजम् च । आयोग्यकर्मण: कर्मजरेगा: त्रिदोषाद् दोषजरोगा: । उभाभ्यां उमयजरांगा : सञ्जायन्ते। कर्मजरोगाय औषधं नास्ति, जपतपाद्यनुष्ठानेन अस्य निवारणम्। दोषजरोगाः औषधेन शम्यन्ते । उभयजम् औषधाधीनशमनं भवति चेदपि पुनरुत्पद्यते अतः अस्य परिहाराय औषधेन साकं सत्कर्मणि आपि करणीयानि ।

पुन: रोगान् चतुर्धा विभज्यते । शारीरिकं, मानसिकं, आगन्तुकं, स्वाभाविकं शरीरस्य शरीरिकस्य शारीरिकरोगा: , मनसः सामसिकोन्माद: अथवा (हिस्टोरिया) कामक्रोधशोकादीनां मानसिकम् इति कथ्यते । आगन्तुकाः इत्युक्ते दैविकजाः स्वाभाविकरोगा: इत्युक्ते जननतः विद्यमान भुभुक्षापिपसासम्बन्दपीडा ।

भैषज्यविज्ञानस्य विस्तृतोल्लेख अथर्ववेदे वर्तते । अतः अथर्ववेदस्य " भिषग् वेद: " इत्यपरं नाम वर्तते । अस्य भैषज्यविज्ञानस्य विस्तृतविवरणम् कौशिकगृहसूत्राद् प्राप्यते। अस्मिन् गृह्यसूत्रे भैषज्यस्य पृथग्ध्यायाः वर्तन्ते ।

धन्वन्तरिद्वारा प्रदत्तायुर्वेदे कापि न्यूनता न वर्तते। अतः एव पुर्वाविधानेन विधिविधानानुसारं न निमीयन्ते चेदपि प्रयोजनं कुरुते ।

आयुर्वेदशास्त्रे निर्दिष्टतिथ्यनुसारं निर्दिष्टमुहूर्तानुसारं पूर्णवधानं दत्वा उचितमन्त्रप्रयोगेन रक्षां कृत्वा शास्त्रविध्यनुसृत्य निष्ठया अर्षितमनसा निर्ममाय रोगनिर्णयं कृत्वा रोगिणाम् अवस्थां, शक्तिम्, क्षमताञ्च अवलोक्य प्रदतौषधानि कदापि रोगीणां कृते हानि: न क्रियते, सर्वदा लाभदायकानि च ।

आधुनिकवैद्यशास्त्र-आयुर्वेदयोर्मध्ये बहवः भेदा: सन्ति । स्वास्थ्यदर्शने रोगदर्शने चिकित्सादर्शने च तस्य भेद: वर्तते। बहव: समर्थका: आयुर्वेदं वैज्ञानिकचिकित्साव्यवस्थारूपेण न मन्यते । तस्य बहुरामम् आलोचनां च कुर्वन्ति । आयुर्वेदोपकरनेषु सीसा - पारा - आर्सैनिक - च पदार्थाः प्राप्ताः सन्ति ये आधुनिकचिकित्साशास्त्रस्य अनुसारं मनुष्याणां कृते हानिकारकाः एव। किन्तु अर्वाचीनकाले अपि आयुर्वेदस्य महती प्रसक्ति: वर्त्तते।

नाडीदर्पणे एक: श्लोक: वर्तते :-

“ कस्याङ्गुष्ठमूले या धमनी जीवसाक्षिणी ।
तच्चेष्टया सुखं दुःखं त्रेयं कायस्य पण्डितः ॥”

इति पूर्वमेव अस्माकं स्वास्थ्य हस्त एव वर्तते इत्युक्तम्।

सुश्रुतसंहितायां plastic Surgery विषये पूर्वमेव उपपादितं एवं Intestine Surgery testtube विषय सुवर्णस्य अयुसः वायो: च औषधगुणः इत्यादीनि कार्याणि यानि इदानीम् आधुनिकवैधशास्त्रे अनुसन्धानं कुर्वन्ति तत् पूर्वमेव आयुर्वेदः वर्तते इति।

★★★★★

## शास्त्रानुगुणदिनचर्या

**मणिरमण ठाकुर**
शिक्षाशास्त्रिद्वितीयवर्षम्

सर्वस्य लोकस्य सुखमभीप्सितम् शान्तिरिष्टा । परंन्तु शारीरिक-कष्टनिवारणार्थं स्वयं न प्रवृत्तिः भवति । यथा- आलस्यं, स्थूलता, तामसप्रियाहार:, एतादृशानि शारीरिककष्टानि निवारणार्थम् अस्माकं पूर्वजै: कृतम् आयूर्वेदशास्त्रम्।

आचाराल्लभते ह्यायुः आचारादीप्सिता: प्रजा: ।
आचाराद्धनमक्षयम् आचारो हन्त्यलक्षणम्न ॥

अर्थात् - सदाचारेण आयुः प्राप्नोति, सदाचारेण अभिलषितः संतानप्राप्ति: भवति, सदाचारेण अक्षयधनस्य प्राप्ति: भवति। सदाचारेण व्यथविचाराः नष्टं भवति । अतः वातावरणानुगुणं कालानुगुणं, देशानुगुणञ्च शरीरस्वास्थ्यर्थं कुत्र, कदा, किम् कर्तव्यम् इति विषये आयुर्वेदशास्त्रे दिनचर्या विषये उल्लिखता वर्तते ।

‘ ’ब्रह्ममुहूर्ते या निद्रा सा पुण्यक्षयकारिणी।’

अत: ब्रह्ममुहूर्ते निद्रा न कर्तव्या, ब्रह्ममुहूर्तस्य उत्थानं आरोग्याय सुखकरं भवति। सम्पूर्णदिने शरीरे स्फूर्ति: जागृत: भवति, शरीरं कमलवत् सुन्दरं भवति । तस्मिन् समये वहनवायु: अमृततुल्य भवति, शारिरिक-मानसिकरूपेण व्यक्तिः स्वस्थाः भवन्ति ।

‘प्रातरत्नं प्रातरिस्वा दधाति तं चिकित्वा प्रतिगृह्यनिधत्ते । तेन प्रजां वर्धयमान आयू रायस्पोषेण सचेत सुवीर: ।’

सूर्य: उदयात् प्राक् जागृतव्यक्ते: शारीरिक, मानसिक आरोग्यं सुखदं भवति, अत: बुद्धिमान मनुष्य: तादृशसमयं व्यर्थं न करोति प्रातः काले ये मनुष्या: जागरणं कुर्वन्ति ते स्वस्था, सुखय:,, दीर्घायु: भवन्ति इति ऋगवेद उच्यते।

तदनन्तरम् -

शरीरचेष्टा या चेष्टा स्थैर्यार्था बलवर्धिनी।
देहव्यायामसंख्याता मात्रया तां समाचरेत्॥

शरीरस्य या चेष्टा इष्टा ,स्थैर्य-अर्था, बलवर्धिनी च भवति, तस्याः देहव्यायामः इति संज्ञा भवति , तां चेष्टां मात्रया कर्तव्या।

इदानीं व्यायाम: किमर्थं करणीयः इति प्रश्न: आगतः तत्र उच्यते, यथा- मनुष्यजीवने जलम्, वायुः भोजनस्य आवश्यकता भवति, तदत् एव व्यायाम अत्यन्त आवश्यकं भवति, यतोहि ब्रम्हमुहूर्ते उत्थाय बाह्यशरीरस्यैव शुद्धी: भवति आन्तरिक शरीरस्य शुद्ध्यर्थं व्यायामः कर्तव्य:।

प्राणाः प्रणमृतामन्नं अन्नै लोकोऽभिधावति।
कर्मोपवर्गे यच्चोक्तं तच्चाप्यन्नो प्रतिष्ठितम्॥

देवधारणजीवानां अन्नं एव प्राणं भवति, अत: संसारे जीवा: प्राकृत्यानुसारेण अन्ननिमित्तं कार्यं कुर्वन्ति अन्नसेवनेन शरीरस्य वर्ण , स्वर: पुष्टि धारणाशक्ते: वर्धनं भवति , सर्वं अन्न एवं प्रतिष्ठितं भवति।

आयुर्वेदे भोजनकाल: प्रात: एवं सायं काल: अग्निहोत्रादिनन्तरं दिवारं वर्णितं भवति

परन्तु क्षुत्संभवति पक्वेषु रसदोषमलेषु च।
काले वा यदि वाऽकाले सोऽन्नकाल उदाहृत:॥

अर्थात् समयेव असमये वा वातादिदोषनास्ति चेत् बुभुक्षा भवति चेत् तस्मिन एव समये अन्नग्रहनकाल:।

भोजनाग्रे सदा पथ्यं लवणार्द्रकभक्षणम्।
पश्चाच्छेषान् रसान् वैद्यो भोजनेष्ववचारयेत्॥

भोजनप्रारम्भे स्वल्पलवणयुक्त आद्रकं भक्षयेत् मध्ये अम्ललवरसयुक्तअन्नं भक्षयेत् पश्चात् कटु कषाय भोज्यपदार्थानां भोजनं कुर्यात् अन्ते - मधुरसं भोज्यम्।

मानसिक तथा शारीरिक-इच्छा बाह्यविषयेषु यदा पूर्णं भवति तदा निद्रा उत्पद्यते। तदुक्तम्-

देह विश्रमते यस्मात् तस्यातनिद्रा प्रकीर्तिता।

योग्यसमये निद्रासेवनेन शरीरस्यशक्ते: अभिवृद्धिर्भवति । पाचकाग्नि प्रदीप्ता भवति, वात, पित्त एतयो: विनाशं करोति, कफवृद्धिं कृत्वा शरीरस्य विस्तारं करोति । एतादृशः आयुर्वेदानुसारं दैनिकदिनचर्या परिपालनेन शारीरिक, मानसिक, आरोग्यानां वृद्धि : भवति।

प्रयोजनं चास्य स्वस्थस्य स्वास्थ्यरक्षणं आतुरस्यविकारप्रशमनं च आयुर्वेदस्य उद्देश्यं द्वयं वर्तते स्वस्थ व्यक्तीनां स्वास्थ्यस्य रक्षा , रोगीणां विकारस्य दूरीकरणम्।

आयुर्वेदशब्दे एव अस्य निष्कर्ष: वर्तते - आयुषः + वेद इति शब्दद्वयमेलनेव अस्य उत्पत्ति: भवति आयुष इत्यस्य अर्थ : भवति जीवनं वेद: इत्यस्य अर्थ: भवति विज्ञानं अर्थात जीवनस्य विज्ञानम इति।

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः इति अस्य भावः एवं निष्कर्ष: भवति अत: आयुर्वेदपद्धत्या एव दैनिकदिनचर्याया: पालनं कर्तव्यम्।

★★★★★

## कक्षावातावरणनिर्माणे शैक्षिकप्रविधिशास्त्रम्

**नितुराणी राउत**

शिक्षाशास्त्रिद्वितीयवर्षम्

शिक्षा नाम काचित् गतिशीला प्रक्रिया। प्रक्रियायामस्यां छात्रः, शिक्षकः, पाठयवस्तु चेति त्रीणि तत्त्वानि प्रमुखानि भवन्ति। एतेषां तत्त्वानां सम्बन्धस्थापनेन शिक्षणप्रक्रिया सुष्ठु प्रचलति, छात्रेषु समुचिताधिगमश्च जायते। पाठयवस्तुमाध्यमेन छात्रशिक्षकयोर्मध्ये सम्बन्धस्थापनं भवति। उभयोर्मध्ये सम्बन्धस्थापनार्थं या क्रिया प्रचलति सा अन्तःक्रिया कक्षा सम्प्रेषणं इति नाम्ना ज्ञायते। कक्षासम्प्रेषणस्य कृते कक्षावातावरणस्य निर्माणमपरिहार्यम्। कक्षाशिक्षणेऽपि कक्षावातावरणस्यावश्यकता वर्तते। कक्षावातावरण निर्माणे शिक्षकस्य कार्यं सर्वादौ महत्त्वपूर्णं भवति। एतस्मिन् प्रविधिशास्त्रस्य भूमिका वरिवर्ति।

आधुनिककाले वैज्ञानिकज्ञानस्य प्रयोगः सवित्र परिदृश्यते। शिक्षाक्षेत्रेऽपि वैज्ञानिकज्ञानस्य दैनन्दिनप्रयोगः दरीदृश्यते। शिक्षाक्षेत्रे वैज्ञानिकज्ञानस्य क्रमबद्धप्रयोगविधिरेव शैक्षिकप्रविधिः इत्युच्यते। शिक्षणप्रविधेः अर्थं स्पष्टयितुं शिक्षाविद्भिः बह्व्यः परिभाषाः प्रदत्ताः। तासु काश्चन अधो निर्दिश्यन्ते-

**शैक्षिकप्रविधेःपरिभाषाः-**

1) जी.ओ.एम्.लीथ(G.O.M.Leeth) महोदयः स्पष्टयति- शिक्षणस्य प्रशिक्षणस्य च प्रभावं सुदृढं कर्तुम् अधिगमे अधिगमपरिस्थितिषु च प्रयुज्यमानं वैज्ञानिकज्ञानं शिक्षण प्रविधिरित्यभिधीयते।"
2) तक्शी साकामाटो (Takshi Sahamato) महोदयः कथयति- शैक्षिकप्रविधिः एकः प्रयोगात्मकाध्ययनं करोति। यस्य उद्देश्यं भवति शैक्षिकोद्देश्यानां, पाठ्यवस्तूनां, शैक्षिकविधानां, शिक्षणसामग्रीणां, शैक्षिक वातावरणस्य, छात्रव्यवहारस्य, अनुदेशकव्यवहारस्य तथा च छात्राध्यापयोर्मध्ये पारस्पारिकान्तः क्रियाश्च नियन्त्रणं कृत्वा सर्वाधिकं शैक्षिकप्रभावोत्पादनमिति।

**शैक्षिकप्रविधेः वैशिष्टयम्-**

शिक्षाशास्त्रिणां विविधपरिभाषाणामध्ययनेन शैक्षिकप्रविधेः अधोलिखितानि वैशिष्टयानि प्राप्तुं शक्यन्ते।

1. शैक्षिकप्रविधिः एकः प्रयोगात्मकाध्ययनरूपः भवति।
2. वेज्ञानिकज्ञानस्य क्रमबद्धप्रयोगः शैक्षिक व्यवहारेषु क्रियते।
3. मनोवैज्ञानिकसिद्धान्तानामाधारेण शैक्षिकोद्देश्यप्राप्तिः जायते।
4. कक्षायां समुचितशैक्षिकवातावरणस्य निर्माणे सहायतां विदधाति।
5. नूतनविधीनां प्रविधीनाम् उपकरणानां प्रयोगं कृत्वा शिक्षणप्रक्रियां प्रभावयति।
6. शैक्षिकसमस्यानां विश्लेषणं कृत्वा तेषां समाधानमपि क्रियते।

शैक्षिकप्रविधिः शिक्षणं सरलं, रुचिकरं प्रभावपूर्णं करोति, शिक्षणस्योद्देश्यप्राप्त्यर्थं शिक्षकं सर्वदा प्रेरयति च। शिक्षणप्रक्रियायां व्यवस्थापकरूपेण शिक्षकः बहूनि कार्याणि सम्पादयति। शिक्षकस्य कार्येषु चत्वारि कार्याणि प्रमुखानि भवन्ति- नियोजनं, व्यवस्थापनं, अभिप्रेरणं, मूल्याङ्कनञ्चेति। एतानि

चत्वारि शैक्षिकप्रविधिशास्त्रस्य मूलभूतानि तत्त्वानि भवन्ति । एतेषां तत्त्वानां सम्यक् ज्ञानं प्राप्य शिक्षकः समुचितकक्षावातावरणस्य निर्माणं कर्तुं प्रभवति। अत्र उपरोक्ततत्त्वानि क्रमशः आलोच्यन्ते ।

**1. नियोजनम् -**

शिक्षणस्य नियोजने उद्देश्यानां निर्धारणं क्रियते । शिक्षणात् पूर्वं शिक्षकः अधिगमस्योद्देश्यं प्रतिपाद्यति । कार्यस्य विश्लेषणं कृत्वा तस्य विभाजनमपि करोति । क्रमब द्धरुपेण तत्त्वानि व्यवस्थितानि करोति। उद्देश्यानां पारिभाषीकरणं कृत्वा तेषां व्यावहारिकरुपेण लेखनञ्च क्रियते । उद्देश्यमाधारीकृत्य पाठ्यक्रमस्य निर्माणं भवति, शिक्षणविधेः निर्धारणमपि जायते ।

शिक्षणोद्देश्यद्वारा शैक्षिकोद्देश्यस्य प्राप्तिः भवति। शिक्षणोद्देश्यानि त्रिविधानि भवन्ति :-

1. ज्ञानात्मकोद्देश्यानि
2. भावात्मकोद्देश्यानि
3. क्रियात्मकोद्देश्यानि च ।

1) 1. छात्राणां ज्ञानप्राप्तिः यथा अधिका भवेत् तदर्थं ज्ञानात्मकोद्देश्यानामुपरि अधिकं बलं दीयते । 2. ज्ञानात्मक-उद्देश्यद्वारा निम्नप्रकारस्य ज्ञानस्य बोधः भवति । 3. विशिष्टतथ्यानां ज्ञानम् 4. विधीनां प्रविधीनाञ्च ज्ञानम् 5. प्रक्रियाणां घटनानां गतिविधीनाञ्च ज्ञानम् ।

2) भावात्मकोददेश्यानां सम्बन्धः छात्राणां रुचि- संवेग- मनोवृत्ति- मूल्य इत्यादिभिः सह भवति । भावात्मकपक्षस्य विकासकरणम् अतीव कठिनकार्यं भवति। यतोऽहि रुचयः, संवेगाः, मनोवृत्तयः, स्थायीभावाश्च व्यैयक्तिकविशेषस्य दशाः भवन्ति। एतेषां स्थानं शिक्षणे महत्त्वपूर्णं वर्तते । भावात्मकपक्षस्य उन्नतये एतानि भावात्मकोद्देश्यानि अत्यावश्यकानि भवन्ति। तानि यथा-1. ग्रहणम् 2. अनुक्रिया 3. अनुमूलनम् 4.विचारविमर्शः 5. व्यवस्था 6.मूल्य-समूहस्य चारित्रीकरणम् च ।

३. क्रियात्मकोददेश्यस्य सम्बन्धः शारीरिकक्रियाणां प्रशिक्षणस्य कौशलस्य च विकासेन सह भवति। क्रियात्मकपक्षे 1. प्रत्यक्षीकरणम् 2. व्यवस्थापनम् 3. निर्देशात्मिका अनुक्रिया 4. कार्यप्रणाली 5.जटिल-प्रत्यक्षानुक्रियादितत्वानि सम्मिलितानि भवन्ति ।

**2. व्यवस्था -**

शिक्षकः सम्यक् रुपेण उद्देश्यनिर्धारणं कृत्वा उद्देश्यानां व्यावहारिकदृष्ट्या लेखनं कृत्वा शिक्षणस्य समुचित-व्यवस्थां करोति । आधुनिककाले पाठं प्रति छात्राणां ध्यानस्य आकर्षणं कर्तुं रुचिञ्च उत्पादयितुं शिक्षणे नूतन-विधीनां प्रविधीनाञ्च प्रयोगः क्रियते। शिक्षणोद्देश्यप्राप्त्यर्थं समुचिताधिगमपरिस्थितेः निर्माणं कर्तुं च शिक्षकानां सहाय्यतां कुवन्ति । शिक्षण सहायकोपकरणानि त्रिविधानि भवन्ति ।

1. श्रव्यसहायकोपकरणानि यथा- क)आकाशवाणी, ख) ध्वनिपञ्जिका ग) वर्त्तुलपञ्जिका घ) भाषापञ्जिका च। एतान्युपकरणानि पाठाभ्यासं, पाठस्यावृत्तिं च कर्तुं शिक्षकाय सौविध्यं कल्पयन्ति ।

2. दृश्यसहायकोपकरणानि-क) श्यामपट्टः ख) प्रतिकृतिः ग) चित्राणि घ) रेखाचित्राणि, मानचित्राणि च ङ)चित्रविस्तारकयन्त्रम् च) चित्रप्रकाशकः च भवन्ति। एतेषामुपकरणानां प्रत्यक्षीकरणेन प्रकृतवस्तुनः ज्ञानं प्राप्यते।
3. श्रव्यदृश्यसहायकोपकरणानि-क) चलचित्रम् ख ) दूरदर्शनम् ग) नाटकम् घ) वार्ताचित्रम् ङ) सङ्गणकम् च) ध्वनिचित्रपञ्जिका इत्यादीनि भवन्ति। एतानि साधनानि कक्षावातावरणनिर्माणे दृश्योश्रव्येन्द्रियाणि उत्तेजितं कृत्वा शिक्षकसहाय्यतां जनयन्ति ।

**अभिप्रेरणम् -** पाठयस्य विकासकरणाय अभिप्रेरणम् अत्यन्तमावश्यकम् । मिल्टन महोदयस्य मते " अभिप्रेरणं शिक्षणस्यानिवार्यं तत्वमस्ति" इति । Hilgard महोदयस्यानुसारं अभिप्रेरणस्य त्रीणि तत्वानि भवन्ति । तद्यथा- आवश्यकता, प्रणोदनम्, उद्दीपनमञ्चेति ।

**आवश्यकता -** बुभुक्षायां भोजनस्य, तृषायां जलस्य च आवश्यकता वर्तते। आवश्यकतानां पूर्तिः न भवति चेत् मनुष्यशरीरे असन्तुलनमुत्पद्यते ।

**प्रणोदनम् -** भोजनाभावात् क्षुधेति प्रणोदनस्य उत्पत्तिर्जायते। प्रणोदनं शारीरिकावश्यकानां पूर्तये प्राणिनं प्रेरयति।

**उद्दीपनम् -** वातावरणे समुपलब्धानि सर्वाणि वस्तुनि उद्दीपनमित्युच्यन्ते। क्षुधार्तजनः क्षुधाप्रणोदनस्य तृप्त्यर्थं भोजनं प्रति आकर्षितं भवति। एवम् अभिप्रेरणं शिक्षणप्रक्रियां दृढीकरोति।

**3)मूल्याङ्कनम् -**

मूल्याङ्कनं शिक्षणप्रक्रियाः अभिन्नमङ्गमिति स्वीक्रियते। मूल्यांकनेन सम्पूर्णशिक्षणप्रक्रियायाः नियन्त्रणं कर्तुं शक्यते। छात्राणां व्यवहारेषु परिवर्तनं जातं न वा। कोठरीआयोगस्यमते-" मूल्याङ्कनमेका निरन्तरप्रचाल्यमाना प्रक्रिया अस्ति। एषा सम्पूर्णशैक्षिकव्यवस्थायाः महत्त्वपूर्णः अंशो अस्ति। या शैक्षिकोददेश्यैः सह घनिष्ठतया सम्बन्धिता भवति।" अतएव मूल्याङ्कनं काचित् व्यापकप्रक्रिया भवति या निरन्तरं प्रचलति। मूल्याङ्कनेन छात्राणां दोषाणां निदानं कृत्वा उपचारात्मकानुदेशस्य व्यवस्था क्रियते।

**निष्कर्षः -** अन्ते एवं वक्तुं शक्यते यत् एतेषां तत्त्वानां समभिव्याहरेण शैक्षिकप्रविधिशास्त्रं सम्पूर्णशिक्षणप्रक्रियां प्रभावयितुं शक्नोति। एतस्मिन् कार्ये शिक्षकस्य भूमिका महत्त्वपूर्णा वर्तते। कक्षाशिक्षणे कक्षावातावरणनिर्माणे शिक्षकेन एतानि कार्याणि अवश्यमेव आचरितव्यानि येन शिक्षणं सरलं रुचिकरं बोध गम्यञ्च स्यात् ।

अभिप्रेरणस्य प्रविधीनाम् उपयुक्तचयनं कृत्वा छात्रेषु रुचिमुत्पादयितुं विषयं प्रति तेषां ध्यानाकर्षणं च कर्तुं शक्यते। प्रविधिद्वारा कक्षाव्यवहारस्य अध्ययनं, विश्लेषणं च कर्तुं शक्यते। एतेषां तत्वानामाधारेण शैक्षिकप्रविधि शास्त्रं सम्पूर्णशिक्षणप्रक्रियां प्रभावयतीति नास्ति सन्देहस्यावसरः।

**सन्दर्भग्रन्थाः -**

1. शर्मा.अ.र.ए. - "शिक्षातकनीकी," इन्टरनेशनल पब्लिशिङ्ग, हाउस, मेरठ ।
2. भूषण, एस्. तथा वार्ष्णेय,ए.के - " शैक्षिकतकनीकी" विनोदपुस्तकमन्दिर, आगरा ।
3. डा. रमाकान्त मिश्रः - " शैक्षिकप्रविधिः" चौखम्बा सुरभारती प्रकाशन, वाराणसी ।

★★★★★

## मर्मणां प्राधान्यम्

**अञ्जना के के**

शिक्षाशास्त्रिद्वितीयवर्षम्

मनुष्यजीवने स्वास्थ्यस्य महनीयभूमिका वर्तते । स्वस्थशरीरं हि आद्यं धर्मसाधनं कथ्यते । भारतीयजीवनपद्धतौ कर्मपरस्य मनुष्यस्य अत्यन्तं प्राचीनकालात् काम्यते । आयुषो वेदः आयुर्वेदः इति कथ्यते । आयुर्वेदो हि स्वस्थस्य स्वास्थ्यरक्षणं आतुरस्य च विकारप्रशमनमभिलषति । आर्युवेदे मर्म चिकित्सायाः अतीव प्राधान्यं वर्तते । आयुर्वेदः आनादिरस्ति ब्रह्मणो मुखात् मुखरितः आयुर्वेदः सृष्ट्या साकं चलन् आत्मनो अक्षुण्ण-परम्परां रक्षति । भारतीयवाङमयस्य प्राचीनतमग्रन्थे ऋवेदे तथा चान्यवेदेषु आयुर्वेदीयतत्वानां प्राप्तिः अस्य प्रमाणमस्ति । अथर्ववेदस्य कालं यावत् आयुर्वेदस्य सैद्धान्तिकस्य क्रियात्मकस्य च पक्षस्य सूत्ररूपे पर्याप्तः विकासः जातः। यमाधृत्यपरवर्तिसंहितानां रचना अजायत । आयुर्वेदावतरणाख्याने ब्रह्मणः इन्द्रं यावत् कालः वस्तुतः वैदिककाल: एवास्ति । तदनन्तरं त्रेतायां द्वापरे च स्थितायनां ऋषीणां संहितानं च कालः प्रारभ्यते । आयुर्वेदस्य अष्टाङ्गविभागः इन्द्रानन्तरं एव पृथक्शः प्रकटितो अभूत् । आयुर्वेदे मर्मचिकित्सायाः अतीव प्राधान्यं वर्तते । मृङ् मारणे इत्यस्मात् मर्मशब्दः निष्पन्नः । शरीरस्य सुप्रदानस्थाने इद्धं बाधते मर्म स्थानेषु किमपि क्षतं जायते चेत् अतीव प्रत्याख्यातयः सम्भवन्ति । मरणस्यापि हेतुः भवितुमर्हति । अत्र उच्यते –

**"तत्र हस्तान्गुल्यो मध्ये क्षिप्रं नाम मर्म तत्र विद्यास्याक्षेपकेन मरणम्" ।**

मर्मणः एते प्राणवाहि मर्मणां केन्द्रो भवति । देहे मर्मणां भेदः सन्धिमर्म, शिरोमर्म, स्नायुमर्म इत्येवं त्रिप्रकारकं विद्यते । एवं कालान्तरप्राणहरणम् , सद्यप्राणहरम्, वैकल्यकरम् , वैशल्यकरम् , रुचाकरम् इत्येते मर्मणां भदान्तरं वर्तते । पञ्चभूतादयः अपि एतेषु भवितुमर्हति । चरकाचार्यस्य मतानुसारं 107 मर्मणाः सन्ति । वस्ति , हृदयम् , शिरः इत्यादि मर्म त्रयं अतीव प्राधान्यं कल्पयते । एते दशसु प्राणायतनेषु अर्न्तभवन्ति । अति काठिन्य - रोगाणां कारणहेतवः दोषादयः बाधते चेत् चिकित्सां अति प्रधानत्वेन कल्पयते। अष्टाङ्गहृदयस्य चतुर्थे अध्याये प्रथम श्लोके एवं उक्तं वर्तते " **म्रियतेऽस्मिन्नङ्गं उपहत** इति मर्म । मनुष्यशरीरं सम्पूर्णं वीक्ष्यते चेत् सम्पूर्णं सविशेषतां ज्ञातुं शक्यते । मर्मादयः मनुष्यशरीरस्य व्याधीनां प्रदिविधिरस्ति । मर्म ज्ञात्वा वैद्यानां प्रयोग: शीघ्रं रोगशमनार्थं साहाय्यं करोति । अधुनापि आयुर्वेदे पञ्चकर्म चिकित्सा सम्पूर्णं मर्म स्थानं आधारीकृत्य वर्तते । मर्म ज्ञानेनैव शस्त्रक्रियादयः कर्तुं शक्यते । अतः तदर्थं आयुर्वेदग्रन्थे विद्यमानविषयादयः अधुनाऽपि वैद्यशास्त्रस्य साहाय्यं करोति । अनेन आधुनिके काले अपि मर्म चिकित्सायाः अतीव प्राधान्यं वर्तते ।१०७ मर्मस्थानेषु प्रत्यैकं रूपेण सर्म्मदनं क्रियते चेत् ततः शक्तिः आयान्ति। तत्रापि ६४ मृतस्थानानि अपि वर्तन्ते ।

तैलचिकित्सा मर्म चिकित्सायाः सुप्रधानचिकित्सा कार्यक्रमः वर्तते। मर्म चिकित्सा द्वारा सम्यक् रोग शमनं प्राप्तुं शक्यते । अनेन अस्माभिः अवगन्तुं शक्यते अधुनातनकाले अपि मर्म चिकित्सायाः अत्यन्तं प्राधान्यं वर्तते । १.अवभासिनी, २.लोहितः, ३.स्वेथः, ४.थम्रा, ५.वेदिणी, ६.रोहिणी, ७.ममसाधरः इत्येवं ये आयुर्वेदग्रन्थेषु वर्णिताः, तस्य अनुरूपाः पाश्चात्यशरीरविज्ञानस्य अनुसारं सूक्ष्मस्तराः। ततः परं केषुचित् पक्षेषु आयुर्वेदः आधुनिकवैज्ञानिकैः ज्ञानस्य स्रोतः अभवत्, यस्य उपयोगः कृतः । अत्र उल्लेखः भवितुं शक्नोति, यत् एतावता शताब्दपूर्वं आयुर्वैदिकशरीरविज्ञानेन आरम्भार्थं भ्रूणविज्ञानस्य वर्णनं कृतम्, यदा तु अयं विषयः आधुनिकशरीरविज्ञानेन सह अधुना संयोगः अभवत् । शरीरे मर्माः अपि समाविष्टाः, यतः पृष्ठीयशरीरविज्ञानानुसारं

तस्यैव स्थानं चिकित्साशास्त्रे शल्यक्रियायां च व्यावहारिकचिकित्सायां आवश्यकं ज्ञातम् । आयुर्वेदे विद्यमानं मर्मविज्ञानम्  आयुर्वेदसाहित्यस्य अन्येषां बहूनां शाखानाम् इव कलारूपेण तस्य व्यावहारिकप्रयोगं मत्वा चिरकालात् विस्मृतौ पतितम् आसीत् ।

सुश्रुतः मर्मं निरूपयति यत्र ममसा, सिरा, स्नायुः, अस्थी, सन्धिः च सन्ति । ते प्राणिकधाराणाम् एकाग्रतायाः आसनानि सन्ति । दल्हणस्य मतं यत् मर्मायां सर्वाणि उपर्युक्तानि संरचनानाम् स्थानानि अन्वेष्टव्यानि, एतेभ्यः प्रधानसंरचनाद्वारा मर्मणः नाम निर्धारितं भवति। परन्तु हरणचन्द्रचक्रवर्तिना उक्तं यत् उपर्युक्तानां एकस्य वा अधिकस्य वा संरचनायाः उपस्थित्या मर्मणः निर्माणं कर्तुं शक्यते। मर्मणः उत्पत्तिं व्यावहारिकं च उपयोगिताम् अवलोक्य चरकः १०७ मर्मसु अस्थि, हृदयः, सिरः (शिरः) इति त्रयः मर्माः महत् महत्त्वं ददाति तथा च एते दश प्राणायतनेषु (जीवनस्य आसनेषु) समाविष्टाः सन्ति। सः तान् चिकित्सादृष्ट्या सर्वोपरि महत्त्वं मन्यते स्म, यथा विकृतदोषाः मर्मान् प्रभावयन्ति, घातकाः सिद्धाः भवितुम् अर्हन्ति रोगान् जनयन्ति च तथा  शल्यक्रियाद्वारा तस्य अधिकव्यावहारिकप्रयोगः भवति । यतोहि मर्मसु कस्यापि क्षतस्य परिणामः तत्क्षणमेव वा पश्चात् वा जटिलताभिः मृत्युः भवितुम् अर्हति । अथवा शरीरस्य कस्यचित् भागविशेषस्य विकृतिः भवितुं शक्नोति  शरीरस्य कस्मिन्चित् भागे क्षतः भवतिचेदपि तत् मर्मभागे न बाधते चेत् क्लेषो नास्ति ।  प्राचीनभारतस्य शल्यचिकित्सकाः नियमं निर्धारितवन्तः यत् शल्यक्रियायाः सन्दर्भे प्रथमं प्रत्येकस्य स्थानीयमर्मणः स्थितिं परिमाणं च सम्यक् अध्ययनं करणीयम्, शल्यक्रियायाः कृते चिरं च एतादृशेन प्रकारेण करणीयम् यत् तस्य आधारः अपि परिहृतः भवेत् ।  अतः सर्वासु शल्यक्रियासु सर्वाणि मर्मस्थानानि सावधानतया परिहर्तव्यास्य आवश्यकता नास्ति ।

मर्मणां ज्ञानं प्राचीनयुद्धेषु, वन्यजन्तुमृगयायां च व्यावहारिकरूपेण क्रमशः शत्रुं वा पशुं वा प्रहारं कृत्वा बाणैः मार्मान् लक्ष्यं कृत्वा उपयुज्यते स्म ।  भारतस्य जापानस्य च केषुचित् भागेषु (Ji Ju Stu) मल्लयुद्धकलायां अपि एतत् विज्ञानं प्रचलति ।  मर्मणः विज्ञानं तस्य व्यावहारिकप्रयोगः च दक्षिणभारते गजादिषु पशुसु अपि प्रयतितः अस्ति, तेषां नियन्त्रणम् अतीव सारल्यं वर्तते । अतः भारते आयुर्वेदे मर्मणः विषये ज्ञानं दत्तं वर्तते ।

★★★★★

## ओडिशाराज्ये महिलासशक्तिकरणम्

## (WOMEN EMPOWERMENT IN ODISHA)

**बैशाखी कुन्डु**

शिक्षाशास्त्रिद्वितीयवर्षम्

समाजस्य व्यवस्थितप्रबन्धने महिलानां भूमिका अतीव महत्त्वपूर्णा अस्ति । यदि महिलाः प्रगतिम् कुर्वन्ति तर्हि समाजस्य प्रगतिः भविष्यति । समाजे सा अग्रपूज्या इति । न स्त्रियः पुरुषाणाम् कथञ्चित् न्यूनाः भवन्ति । लौकिककर्तव्यैः सह अद्यतननारी सर्वविधसामाजिकदायित्वं अपि निर्वहति ।अद्यत्वे उद्यमशीलता, कृषिः,

नवीनता, समाजसेवा, कला, शिक्षा इत्यादिषु सर्वेषु क्षेत्रेषु महिलाः अग्रणीः सन्ति। स्त्रीणां शक्तिः देशस्य शक्तिः राज्यस्य च शक्तिः अस्ति। अधुना महिलाः समाजस्य राष्ट्रस्य च प्रेरणास्रोतः सन्ति।

**महिला सशक्तिकरणस्य अर्थः**

महिलासशक्तिकरणस्य अर्थः भवति महिलानां प्रतिभानाम् उपयोगेन सामाजिकप्रगतिः। स्त्रियः बहुप्रतिभावत्यः सन्ति चेदपि पुरुषप्रधानसमाजे तासां प्रतिभायाः उपयोगस्य अवसरः न प्राप्यते।महिलासशक्तिकरणस्य मुख्यं उद्देश्यं महिलानां सामर्थ्यस्य च आदरं दर्शयित्वा तेषां मध्ये जागरणस्य आयोजनं, निर्माणं च भवति।

**ओडिशाराज्ये सर्वकारस्य योगदानम्**

न गृहं, न कोऽपि समाजः, न किमपि राज्यम्, न कोऽपि देशः स्त्रिणां सशक्तिकरणं विना प्रगतिं प्राप्तुं शक्नोति।राज्यसर्वकारः राज्ये महिलानाम् आर्थिकसशक्तिकरणाय प्रतिबद्धः अस्ति। मिशनशक्तिः योजनारूपेण २००१ तमे वर्षे मार्च मासस्य अष्टमदिनाङ्के आरब्धा अभवत्। अद्य एकः पृथक् विभागः अभवत्। राज्यसर्वकारस्य प्रयत्नेन मिशनशक्तिद्वारा प्रत्येकस्मिन् ग्रामे SHG (Self help group)-संस्थाः निर्मिताः सन्ति। तेभ्यः सर्वविधं समर्थनं च प्रदत्तं भवति। २० वर्षेषु ७० लक्षाधिकाः महिलाः अस्मिन् कार्ये सम्मिलिताः सन्ति। अद्यत्वे यन्त्रशक्तिद्वारा राज्ये महिलाः स्वनिर्भराः अभवन्। यन्त्रशक्तिद्वारा स्वसहायता समूहानां सदस्याः मत्स्यपालनम्, कुक्कुटपालनम्, बकपालनम्, तण्डुलविपणयः चालयितुम्, मध्यानभोजनवितरणम्, चिकित्सालयेषु रोगिणां भोजनवितरणम् च इत्यादीनां कार्याणि सा स्वयमेव कुर्वती अस्ति। महिलानां हिताय राज्यसर्वकारेण अधुना SHG महिलानां कृते स्वस्य द्रव्य विक्रयणं लब्धसंपर्करुपेण सम्भवम् कृतम् अस्ति। यथा ते प्रत्यक्षतया विपण्याम् स्वस्य उत्पादनं विक्रयणं कृत्वा लाभं प्राप्तुम् शक्नुवन्ति। संपूर्णराज्ये अधुना Covid महामारी विरुद्धे युद्धे महिलानां स्वसहायकसमुहानां कार्यं दृष्टम्। स्वावलम्बित्वं विहाय ते राज्यस्य विकासे भगभाजः अभवन्। महिलाः न केवलं ओडिशा नगरे एव सीमिताः सन्ति अपितु ते स्व द्रव्यं नीत्वा ओडिशाराज्यात् बहिः गच्छन्ति। नवीन सर्वकारस्य 21 वर्षीयशासनकाले राज्ये मातृबालमृत्युः न्युनिकृतः अस्ति। ममतायोजना 2011 तः मातृबालानां रक्षणार्थं प्रचलति। येन मातृबालमृत्युः महती न्यूनिकृता अस्ति। पञ्चायतिराजसंस्थासु महिलानां कृते 50% आसनानि आरक्षितानि वर्तते।

ओडिशासर्वकारः महिलानां सामाजिक-आर्थिक-स्थितौ बृहत् परिवर्तनं कृतवन्तः। विधानसभायां लोकसभायां च महिलानां कृते 33% आसनानि आरक्षितानि सन्ति। एतेषु विषयेषु ओडिशा नगरस्य वृद्धिः स्पष्टतया दृश्यते यः माननीयः मुख्यमन्त्री नवीनं पट्टनायकस्य कृते सम्भवः अभवत्। ओड़िया महिलाः दिने दिने आत्मनिर्भराः भवन्ति। राज्यसर्वकारस्य यन्त्रशक्तिः अन्याः योजनाः तासां स्वपदेषु स्थातुं साहाय्यं कुर्वन्ति। ओडिशा देशस्य मुख्यमन्त्री महिलानां सम्माननाय राज्यस्य सम्मानाय च महत्त्वं ददाति।

★★★★★

## भारतीयसंस्कृतौ नारीणां स्थानम्

**गीता राणी मिश्र**

शिक्षाशास्त्रिद्वितीयवर्षम्

'सम' उपसर्गपूर्वकात् कृ धातोः क्तिन् प्रत्यये 'संस्कृति' शब्दो निष्पद्यते। कस्यापि देशस्य राष्ट्रस्य वा जनैः योऽपि व्यवहारः आकारश्च क्रियते, तत् सर्वं तस्यदेशस्य संस्कृतिः इति कथ्यते। विश्वस्य सर्वासु संस्कृतिषु भारतीयसंस्कृतिः सर्वाधिकप्राचीना उत्कृष्टा च वर्तते। अस्याः भारतीयसंस्कृतेः नारीणां स्थानम् अतीवमहत्त्वपूर्णं वर्तते। महामानवेन मनुना उक्तं यत् समाजे नारीणां स्थानं तथैव वर्तते यथा देवालये देवानाम्। स्त्रीपुरुषसामञ्जस्य रुपेण भावेन जीवनमपि सुखकरं करणीयम् इत्येवम एव अस्माकं समाजस्य सदुन्नतिं भवितुं शक्यते। देशस्य सत्यतायाः संस्कृत्याः च मूल्याङ्कनं नारीवर्गं दृष्ट्वैव क्रियते। पितृदेवो भव, मातृदेवो भव इत्यादिभिः उक्तिभिः नारीणां स्थानं वैदिककाले स्पष्टमेव आभाति। शङ्कराचार्याद् प्रारम्भ स्वामिविवेकानन्दं यावत् सर्वैः महापुरुषैः मातृभक्तिः संस्तुता। महाकवि कालिदासस्य धर्मपत्नी विद्योत्तमा एवं निरक्षरं पतिं विलोक्य गृहान् निर्मापयामास। तस्या प्रभावेण कालिदासः संस्कृतसाहित्यस्य महाकविरुपे प्रतिष्ठितः बभूव। स्वतन्त्रेऽपि भारते 'पूर्वप्रधानमन्त्री इन्दिरागान्धिमहाभागायाः' नाम कस्य मनसि न वर्तते। तदनन्तरं राष्ट्रपतिः श्रीमती प्रतिभापाटील महाभागाः एवं इदानीं राष्ट्रपतिः श्रीमती द्रौपदी मुर्मु महाभागायाः नाम सर्वैः ज्ञायते। अर्थात् नारी अपि राज्यसंचालने कुशलाः सन्ति। अतः अनेन पर्यालोचनेन स्पष्टमेतत् यत् भारतीयसंस्कृतौ नारीणां स्थानं प्रशंसनीया पूजनीया च अस्ति।

**प्रस्तावना** –

प्राचीनकाले स्त्रिणां महत्त्वम् अधिकम् आसीत्। सृजनात्मक शक्त्याः प्रतीका अस्ति एवं परम्पराणां संवाहिका अस्ति। नारी देवीरुपेण सर्वेः मानिता। न केवलं प्राचीनकाले आधुनिककाले अपि नारीणां सम्मानं सर्वेषां कर्तव्यम्। यस्मिन् देशे नारीणां सम्मानं भवति, सः देशः उन्नतिं गच्छति। वेदे, ब्राह्मणग्रन्थे, स्मृतिग्रन्थे, रामायणमहाभारतकाले एवं महाकाव्यकाले च नारीणां स्थानं महत्त्वपूर्णम् आसीत्।

**विषयवर्णना** –

वैदिककालाद् आरभ्यते इदानीं यावत् समाजे स्त्रीणां स्थानम् अतीव गौरवास्पदं विद्यते। नारीशब्दस्यार्थ व्युत्पत्तिः – 'न अरिः इति नारी', शब्दकोशग्रन्थेषु नुः नस्य वा धर्म्यात्, इत्यपि व्युत्पत्तिः समुपलभ्यते। एवं सिध्यति यत् पुरुषाणां कृते नारी सर्वथा मित्रवत् कार्यं करोति। नारी गृहिणी, गृहस्वामिनी, सहधर्मिणी इत्यादिभिः विशेषणैः सम्बोध्यते स्म। जन्मतः विवाहकालं यावत् पितुः गृहे 'कन्या' इति शब्देन वाच्यायाः अस्याः समाजे अस्माकं महत्त्वं परममस्ति। पत्नीरुपेण सा गृहस्वामिनीपदम् अलमकरोत्। वेदे यथोच्यते–

**"जायेदस्तम्' जाया एव अस्तं गृहमित्यर्थः"**, इति। (**ऋग्वेदः**)

**स्मृतिग्रन्थेषु नारीणां स्थानम्** –

गृहेषु यत्र नार्याः सम्माननं भवति। गृहस्य सर्वैः जनैः नारीणां सुखस्य प्रसन्नतायाश्च चिन्तनं क्रियते तत्र सदैव लक्ष्म्या वासो भवति। एतादृशेषु गृहेषु देवानां महती कृता भवति। अस्मिन् विषये उक्तं मनुना –

**"यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।**

**यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रिया"॥ ( मनुस्मृतिः)**

नारी सर्जनात्मिका शक्तिरुपा विद्यते । अस्माकं धर्मशास्त्रैः अपि स्त्रियः समस्तास्तव देवि भेदाः इति वचनानुसारेण सर्वाः स्त्रियः महद्मायायाः आद्यशक्तेः स्वरुपेणैव प्रतिपादिताः ।

**वेदेषु नारीणां स्थानम्–**

वैदिकसाहित्यस्यानुशीलनेन ज्ञायते यत् वैदिककाले स्त्रीणां स्थानम् अतीव गैरवास्पदम् आसीत् । ऋग्वेदे बहवो मन्त्रदर्शिका ऋषिकाः सन्ति । यथा – शाचि, योमि, इन्द्राणी, सावित्री प्रभृतयः । वैदिककाले नारी पुरुषैः सह यज्ञादीकर्माणि सम्पादयति स्म। यथा-

**"इद्राण्येतु प्रथमाजीतामूषिता पुरः" । (अथर्वणवेदः)**

प्राचीनकाले नारीणां शिक्षाविषये अपि समाजः अतीव जागरुकः आसीत् । अस्मिन् विषये अनसूया-देवहूति-उर्वशी-गार्गी-सीता-तारा अहल्यादीनां नारीणां नामानि उदाहरणरूपेण दरीदृश्यन्ते ।

**ब्राह्मणग्रन्थेषु नारीणां स्थानम् –**

ब्राह्मणसाहित्य नारीविषये काश्चन विशिष्टता निर्दिश्यन्ते । तत्र स्त्री सावित्रीरुपेण गौरवास्पदं प्रतिपाद्यते । स्त्रीणां पतिरेव गतिः । पतेः मार्गानुसरणं तासां कर्तव्यम् । ताः कोमलाङ्गत्वा अबलाः न तास्याडनियाः सन्ति । यथा–

**"पतयो ह्यै स्त्रीयै प्रतिष्ठा" । (शतपथब्राह्मणम्)**

ब्राह्मणग्रन्थानुसारं पत्नीमन्त्रेण यज्ञस्य पूर्णत्वं स्वीक्रियते । जाया तु गार्हपत्यो

**रामायण- महाभारतकाले नारीणां स्थानम् –**

रामायण महाभारते च स्त्रीणां शिक्षायाः सुव्यवस्था अवलोक्यते । रामायणे कौसल्या तारा च "मन्त्रवदौ" कथ्यते । रामायणे उत्तररामचरिते च आत्रेयी वेदान्तविद्यानिष्ठारुपेण वर्णिता ।

तथैव महाभारते द्रौपदी "पण्डिता" वर्तते । तत्र स्त्रीणां संगीतनृत्यादिकलानां शिक्षणं वर्तते ।

**महाकाव्यकाले नारीणां स्थानम् –**

महाकाव्यकाले स्त्रीणां गौरवं प्रतिष्ठितम् आसीत् । महाकाव्येषु स्त्रियः पुरुषात् च अनन्यरुपत्वं निर्दिश्यते। पुनश्च सा स्त्री अध्दांगरुपेणी प्रियतमा सखी च गण्यते । पुनः मातारुपेण सा नारी भूमेरपि गुरुतरा आसीत् । एवं विज्ञायते यत् प्राचीनभारते नारीणां स्थानं महत्त्वपूर्णम् आसीत् ।

**निष्कर्षः –**

वैदिकयुगे स्त्रीणां स्थितिः सुदृढा आसीत्, परिवार तथा संस्कृतेः सा सम्मानं प्राप्नोति । एतत् स्पष्टम् अस्ति वैदिककाले अपि नारीः हिन्दुजीवनस्य प्रत्येक क्षेत्रे समानरुपे सा आदरणीया एवं प्रतिष्ठिता आसीत् । शिक्षा, धर्म, व्यक्तित्व एवं सामाजिक विकासे नारीणां महद् योगदानम् आसीत् ।

★★★★★

## शिक्षणकर्माणि अन्तर्जालस्य विनियोगः

**झरणा साहु**

शिक्षाशास्त्रिद्वितीयवर्षम्

**उपक्रमः –**

नवनवोन्मेषशालीनि प्रज्ञा प्रतिभा इति आर्षवचनम्। जिज्ञास विना प्रतिभा नागच्छति । ज्ञातुमिच्छा जिज्ञासा । प्रश्नस्योपशमनं नाम ज्ञानम् जीवनचक्रे नानाविधाः प्रश्नाः समायान्ति । प्रश्नानामुपशमनं कदाचित् गुरुमुखात् , कदाचित् वृध्दा नां साङ्गत्येन, कदाचित् सहपाठिभिः, कदाचित् कालक्रमेण च भवति । उत्कञ्च सुभाषिते - आचार्यात् पादमादत्ते पादं शिष्यः स्वमेधया । पादं सब्रह्मचारिभ्यः पादं कालक्रमेण च ॥

शिक्षायाः ग्रहणं त्रिविधम् – औपचारिकम्, अनौपचारिकम्, निरौपचारिकमिति । परिवर्तिते संसारे शिक्षायामपि परिवर्तनं जायते । यतो हि समाजानुगुणं शिक्षायां, शिक्षा नुगुणं समाजे च निरन्तरं परिवर्तनं जायते । शिक्षाक्षेत्रे प्रसारमाध्यमानां बहूपयोगः वर्तते । तासु अन्तजलस्य स्थानम् अन्यतमम् । अनया नूतनपध्दत्या विद्यार्जनं कारयितुं सुलभतमं जातम् । सञ्चा२माध्यमैः अध्यापनं रुचिकरम्, आकर्षकम्, उत्साहवर्धकञ्च भवति । अत्र निरन्तरप्रयत्नशीलाः अध्य।पकाः, भाषाविशेषज्ञाश्च । स्वस्थाने उपविश्य एव वयं विना श्रमं, क्षणकाले नैव स्व विषयानुगुणं पाठ्यांशं प्राप्तुं शक्नुमः । सर्वेपि संस्कृतं नी२सम्, अरुचिक२ञ्च आमनन्ति । परन्तु शिक्षकाः तद्विरुध्दमिति निरुपयन्ति । संस्कृतशिक्षकाः संस्कृतमेव न पाठयन्ति अपि तु अन्तर्जालस्य उपयोगमपि सुष्ठु कुर्वन्तीति स्वशिक्षणद्वारा निरुप्यति ।

**अन्तर्जालस्योऽपयोगः -**

आबालवृध्दाः सर्वेऽपि अन्तर्जा विश्वकोशो ल विनियोगे सक्रियाः सन्ति । ते स्व – स्वरुच्यनुगुणम् अन्तर्जालस्य विनियोगं कुर्वन्ति । केचन शिशुगीतानाम् अवलोकने, केचन चित्रकथानां (Cartoon) दर्शने, अन्ये केचन विद्यालयस्य गृहकार्यकरणे युञ्जते । तथैव यूनाः स्व विषयानुगुणं गवेषणं कुर्वन्ति ।

**संस्कृतविकिपीडिया -**

स्वविषयाऽवगाहनाय सन्देहनिवारणाय च बहूपयोगी भवति संस्कृतविकिपीडिया । मुक्तविश्वकोशोऽयम् । अस्य निर्माणाय सम्पूर्णविश्वतः स्वयंसेवकाः त्रिंशदधिकभाषासु स्वयोगदानं कृतवन्तः, कुर्वन्त्यपि । अत्र न केवलं . सन्देहनिवृत्तिरेव भवति अपि तु नूतनपदप्रयोगज्ञानं, ज्येष्ठानां शैल्यवगाहनमपि भवति । प्रतिदिनमेकैकमंशमादृत्य तत्र शास्त्रीयं वा भवतु अथवा आधुनिकविषयं वा भवतु अथवा सुभाषितं वा, तद्विषयकं साराशं मुख्यपुटे स्तौति । अत्र केवलं गवेक्षणकार्यमेकमेव न, अपि तु स्वयोगदानमपि कर्तुं शक्यते । अत्रापि विविधांशाः सन्ति ।

- **विकिपीडिया (Wikipedia)**
- **विकिस्त्रोतः (Wiki Source)**
- **विकिसूक्तयः (Wiki Quote)**
- **विकिशब्दकोशः (Wiki Dictionary)**
- **विकिपुस्तकानि (Wiki Books)**
- **मेटाविकि (Meta Wiki)**
- **विकिकामन्स् (Wikimedia Commons)**

उपर्युत्कात् कमपि अंशं चित्वा स्वसन्देह निवा २णं कर्तु शक्नुवन्ति शिक्षकाः शोधार्थिनश्च । एतत् संस्कृतजगतः वरमिव प्रतिभाति । यतोहि सर्वास्वपि भाषासु गवे क्षणविषये अनेकानि गवेक्षकाणि सन्ति ।परन्तु गीर्वार्याः कृते अद्वितीयोऽयम् । अस्य प्रचार प्रसाराय ये कार्यं कुर्वन्ति ते ज्येष्टाः विद्वाशः एव न, अपि तु संस्कृत शोधार्थिनः, सरकृत रसिकाः अपि निरन्तरं योगदानं कुर्वन्ति ।

**संस्कृतभारती –**

1981 तमे वर्षे तिरुपतौ इयम् आरब्धा । अस्याः उद्यमस्तु निरन्तरं संस्कृतभाषायाः, साहित्यस्य, परम्परायाः, संस्कृतेः निहित ज्ञानभण्डारस्य च संरक्षणं विकासः प्रचारः च । अत्र शिक्षार्थिनां वयसः अनुगुणं, शैक्षिक पृष्ठभूम्यनुसारं, वत्त्यनुसारं च विभिन्नानि पुस्तकानि सन्ति । तथा विविधशास्त्रीयपुस्तकानि, शास्त्रीयाधारितसान्द्रमुद्रिकाः, ध्वनिपुस्तकानि इत्यादीनि उपलभ्यन्ते ।

**शोधगङ्गा -**

अत्र विविधसंस्थासु एवं विविधभाषासु क्रियमाणानि शोधकार्यणि उपलभ्यन्ते । अत्र शोधचयनविषयकज्ञानं तथा शोधलेखनविषय कज्ञानश्च वर्तते । प्रान्तीयभाषासु विषयाः उपलभ्यन्ते इति विशेषः । एवं शोधशीर्षकस्य पुनरुत्किरपि न भवति ।

**संस्कृतसंसाधनी -**

हैदरावादविश्वविद्यालयस्य संस्कृतविभागेन संस्कृतसंसाधनी नामक (A Sanskrit Computational Toolkit) संसाधनस्य निर्माणं कृतम् । ते च –

साधनानि (Tools), कोशाः (Dictionaries), कार्पास्(Corpus), प्रकाशनानि (Publication) शोधकार्याणि (Thesis), गवेषिका (Search Engine), अनुरसारकम् MT (Skt - Hnd), सविश्लेषण - ई-ग्रन्थः (E – Reader)

यदपेक्षितं तदन्वेष्टुं शक्यते । बहुसुलभतया अपेक्षितकार्यं कर्तुं शक्यते ।

**उपसंहारः -**

अनेन ज्ञायते यत् विना अन्तर्जालमाध्यमेन वयं किमपि कर्तुं न शक्नुमः। यथा स्वशरीरपोषणाय आहारमपेक्षते तथैव स्वज्ञानवर्धनाय सन्देह निवारणाय च अन्तर्जालमपेक्षते। कक्षायाः अध्यापनात् पूर्वं अध्यापकस्य पूर्वसज्जता अनीवार्या भवति।यदि तमेव अंशरूपेण स्वीकृत्य PPT माध्यमेन वा दृश्यश्रव्यसामग्र्याणां माध्येन वा पाठयामश्चेत् सा कक्षा न केवलं रूचिकरं अपि तु चिरस्मरणीयमपि भवति। स्वस्थाने उपविश्य एव वयम् अन्तर्जालस्य विनियोगेन तानि सर्वाण्यपि अपेक्षितांशानि प्राप्तुं शक्नुमः।

**अनुशीलिताः ग्रन्थाः-**

1. https://www. inflibnet.ac.in/ hindi / about / mission. Php.
2. https://sanskrit . uohyd. ac in / scl/

★★★★★

## स्मृतिशास्त्रेषु दायभागनिर्णयः

**कान्हुचरण मिश्रः**

शिक्षाशास्त्रिद्वितीयवर्षम्

**प्रस्तावना -**

श्रीमत्याः सरस्वत्या: शास्त्रोद्यने यानि यानि शास्त्रकुसुमानि रराजन्ते तेषु शास्त्रकुसुमनिचयेषु धर्मशास्त्रं ललामभूतं स्थानं संधारयति । यदपि दृश्यमानेऽस्मिन् संसारे बहूनि शास्त्राणि दरीदृश्यन्ते तथापि शास्त्रास्य धर्मशास्त्रस्य प्राधान्यं नितरां च विराजते। धर्मार्थकाममोक्षेषु यथा धर्मस्य प्राथम्यं प्राधान्यं च स्वीक्रियते , तथैव शास्त्रस्यास्य मन्वादिप्रणीततत्वात् सर्वमान्यत्वं सर्वग्राह्यत्वं च विद्यत एवेति न कापि विचिकित्सा। " सामान्येन व्यपदेशाः भवन्ती" न्यायेन धर्मस्य तथा धर्मशास्त्रस्य प्राधान्यम् अंगीक्रियते। भवगन्निश्वासभूतः वेदः यथा प्रामाण्यं धत्ते तथैव शास्त्रमिदं वेदानुयायित्वात् च नूनमेव वेदसमं प्रामाण्यं स्वीकरोति। अत एव शास्त्रकारै: प्रोक्तं -

**"श्रुतिस्मृत्युदितं धर्ममनुतिष्ठन् हि मानवः॥**[1] "इति।

तथैव कालिदासेनापि रघुवंशमहाकाव्यस्य द्वितीये सर्गे प्रथमे श्लोके स्मृतेः (धर्मशास्त्रस्य ) प्रामाण्यं प्रदर्शितं, यथा -

**तस्याः खुरन्यासपवित्रपांशुपांसुतानां धुरि कीत्तनीया।**
**मार्गं मनुष्येश्वरधर्मपत्नी श्रुतेरिवार्थं स्मृतिरन्वगच्छत्॥**[2] इति।

धर्मशास्त्रस्यास्य विषयविवेचने त्रय एव मुख्यविषया: समालोकनां दृष्टिपथमाकर्षयन्ति । ते च त्रय विषया: यथा - आचार - व्यवहार - प्रायश्चित्ताख्याः। एतेषु त्रिषु विषयेषु व्यवहारस्य प्राधान्यं राजकर्तृकत्वात् सर्वजनविदितं विद्यते। अत एव व्यवहारस्य उपरि बहूनि कर्माणि बहवः निबन्धा: बहुसंस्काराश्च प्राप्यन्ते। यतो हि

स्वाधीनोत्तर – भारतवर्षेऽपि भारतीय - संविधानमेव प्राचीनभारतवर्षस्य धर्मशास्त्रान्तर्गत - व्यवहारभागस्य नवीनमेव प्रारूपम् ।

ये तावत् प्राचीन धर्मशास्त्रमनुशीलयन्ति ते अनुभवन्ति अर्वाचिनकालेऽपि प्रतिक्षेत्रं कथं धर्मशास्त्रस्य आवश्यकता विद्यते । एतेन अधुना उग्रे आधुनिके पाश्चात्यसभ्यतागरजर्जरिते कलिकलंककलंकिते समाजेऽपि यदा यदा विवाह - पितृदोहजाताश्च हिन्दुपरम्परायां परिपाल्यते । तदा तदा प्राचीनस्यास्य धर्मशास्त्रस्य अनुसरणं क्रियते एव , अन्यथा आत्मसन्तोष: नेवास्वाद्यते । अतः धर्मशास्त्रमस्माकमस्थिमज्जागतं च विद्यते । यावत् तिष्ठति भारतं यावच्च चन्द्रतारकं , तावत् धर्मशास्त्रं भाति इति ।

धर्मशास्त्रस्य व्यवहारभागे दायभागप्रकरणे दायग्रहणे पुत्राणामधिकार प्रसंगमुद्धृत्य पुत्राणां भेदं शास्त्रकारा: निबन्धकाराश्च पर्यालोचयन्ति । यद्यपि शास्त्रेषु द्वादशप्रकारका: पुत्राः वर्णिताः विद्यन्ते त एव न सर्वेऽपि दायहारिणः भवन्ति । षट्पुत्राः दायादाः षट् च अदायदाः भवन्तीति शास्त्रपरामर्शः ।

**दायभागस्य स्वरूपम् -**

मनुप्रोक्ताष्टादशव्यवहारपदेषु दायभागः अन्यतमः । व्यवहारपदेषु अस्य प्रधान्यं सर्वे: स्मृतिकारैः स्वीक्रियते । धनस्वामिनो मरणात् परं तस्य धने अधिकारप्रतिपादनमेव अस्य प्रमुखो प्रतिपाद्य: विषय: । दायरूपं द्रव्यं तस्य विभागश्चात्र परिकल्पितो विद्यते । अस्य व्यवहारपदस्य स्वरूपं धर्मशास्त्रकारैः बहुधा प्रतिपादितम्। तत्रादौ भगवता मनुना उक्तं यत् -

**एष स्त्रीपुंसयोरूक्तो धर्मो वो रतिसहिंत: ।**

**आपद्यपत्यप्रप्तिश्च दायभागं निबोधत ॥[3] इति ।**

अन्यत्रापि - **" मनुः पुत्रेभ्यः दायं व्यभजत "** इति श्रूयते । भगवता नारदेन उक्तं यत् -

**विभागोऽर्थस्य पित्र्यस्य पुत्रैर्यत्र प्रकल्प्यते ।**

**दायभाग इति प्रोक्तं तद्विवादपदं बुधैः ॥[4] इति ।**

**दायलक्षणम् -**

निघण्टुकारेण यथा - **विभक्तं पितृद्रव्यं दायमाहुर्मनीषिण:॥[5] इति ।**

बृहस्पतिरपि - **ददाति दीयते पित्रा पुत्रेभ्यः स्वस्य यद्धनम् ॥[6]**

दायभागे जीमूतवाहनः दायलक्षणं प्रस्तौति यथा -

“दीयत इति व्युत्पत्त्या दायशब्दः,ददाति प्रयोगश्च गौणः । मृतप्रव्रजितादि-स्वत्वनिवृत्तिपूर्वक-परस्वत्वोत्पत्तिरूप-फलसाम्यत् । न तु मृतदिनां तत्र त्यागोऽस्ति । ततश्च पूर्वद्रव्यस्वामिसम्बन्धाधीनं तत्स्वाम्योपरमे यत्र दुव्येऽन्यस्वत्वं तत्र निरुढो दायशब्दः । ” [7]

दायशब्देन यद्धनं स्वामिसम्बन्धदेव निमात्तादन्यस्य स्वं भवति तदुच्यते । स च दायः द्विविधः अप्रतिबन्धदायः , सप्रतिबन्धदायश्चेति । तत्र पुत्राणां पौत्राणाञ्च पुत्रत्वेन पौत्रत्वेन च पितृधनं पितामहधनं स्वं भवति इति अप्रतिबन्धदायः । पितृव्यभात्रादिनां तु पुत्राभावे स्वम्याभावे च स्वं भवतीति सप्रतिबन्धदायः ।

**विभागलक्षणम् -**

अस्मिन् दायभागे दायरूपस्य धनस्य विभागमभिप्रेत्य एव इदं विवादपदं प्रवर्त्तते । दायरूपस्य धनस्य सर्वथा यद्यपि विभागो न सम्भाव्यते तथापि बहुषु पुत्रेषु विद्यमानेषु बहुषु धनाधिकारिषु वा वर्त्तमानेषु अयं विभागः उक्तः । विभागविषये वेदेष्वपि सूचना उपलभ्यते। यथा ऋक्संहितायामुक्तम्-

**"प्रजाभ्यः पुष्टिं विभजन्त आसते रयिमिव पृष्ठं प्रभवन्तमायते ।**

**असिन्वन्द्रष्ट्रैः पितुरत्तिं भोजनं यस्ताकृणोः प्रथमं सास्युक्थ्यः ।।**[8]

एतद्वैदिकं प्रमाणमुपजीव्य धर्मशास्त्रकाराः बहुविधविभाग- लक्षणमपि उपस्थापयन्ति । दायविभागप्रकरणे दायशब्दनिरुपणानन्तरं विभागलक्षणमपि प्रस्तुवन्ति ।

गौतमेन- **विभागे तु धर्मवृद्धिः ।** [9]

यथोक्तं मनुना- **एवं सह वसेयुर्वा पृथग्वा धर्मकाम्यया ।**

**पृथग्विवर्धते धर्मस्तस्माद्धर्म्या पृथक्क्रिया ।।**[10] **इति ।**

मिताक्षराटीकायां विज्ञानेश्वरेणोक्तं यत् -

**विभागो नाम द्रव्यसमुदायविषयाणामनेकस्वाम्यानां तदेकदेशेषु व्यवस्थापनम् ।।**[11]

**विभागस्य कालः -**

विभागस्य कालविषये भगवता याज्ञवलक्येन उक्तं यत् –

**विभाग चेत्पिता कुर्यादिच्छया विभजेत्सुतान् ।।**[12]

अर्थात् पितुः इच्छया विभागं कुर्यात् एषः प्रथमः कालः । अनन्तरं द्वितीयकालविषये भगवता मनुना उक्तं यत् -

**ऊर्ध्वं पितुश्च मातुश्च समेत्य भ्रातरःसमम् ।।**[13] **इति ।**

अर्थात् पितृमात्रो: उभयोः मरणानन्तरं पुत्राः मिलित्वा पितृधनं विभागं कुर्यात् ।

**पितृकृतविभागप्रकार :-**

जीवति पितरि पितुरिच्छया यदानीं तेन विभागः क्रियते तदानीं स विभागः समो विसमश्चेति द्विविधो भवति। समविभागो नाम भ्रातरः मिलित्वा पैतृकधनं विभागं कृत्वा नयति चेत् तदुच्यते ।अनन्तरं विषमविभागविषये भगवता मनुनोक्तं यत् -

**ज्येष्ठस्य विंश उद्धारः सर्वद्रव्याच्च यद्वरम् ।**

**ततोऽर्धं मध्यमस्य स्यात्तुरीयं तु यवीयसः ।।**[14] **इति ।**

अर्थात् ज्येष्ठाय ज्येष्ठभागेन , मध्यमाय मध्यमभागेन , कनिष्ठाय कनिष्ठभागेन पैतृकधनस्य विभागं कुर्युः।

**अविभाज्यधनानि -**

यानि धनानि विभाजनं कर्तुं न शक्यते तानि धनान्यविभाज्यधनानि इत्युच्चन्ते। भगवता शङ्खेनोक्तं यत् -

**शौर्यभार्याधने चोभे यच्च विद्याधनं भवेत्।**

**त्रीण्येतान्यविभाज्यानि प्रसादो यश्च पैतृकः ॥**

अस्माद्वचनात् युद्धेन, भार्याग्रहणेन, विद्यया वेदार्थव्याख्यानेनार्जितानि धनान्यविभाजानीति सुष्पष्टम्। एतत्सर्वं पितृद्रव्यानुपघातात् ज्ञेयम्।

***पादटीप्पणी***

1- मनु. स्मृ. – 2/9

2- रघु. – 2/1

3- मनु. स्मृ. – 9/13

4- ना. स्मृ – 13/1

5- व्य.प्र.पृ – 411

6- स.वि.पृ – 344

7- दा.भा.पृ – 02

8- ऋ.सं – 2/13/04

9- गौ.ध.सू. – 28/04

10- मनु. स्मृ. – 9/111

11- मिता. पृ - 216

12 - मनु. स्मृ. – 9/112

13- याज्ञ. स्मृ. – 2/114

14- मनु. स्मृ. – 9/104

★★★★★

## किं संस्कृतं राष्ट्रभाषा भवितुमर्हति ?

**मधुस्मिता पाणिग्राही**

शिक्षाशास्त्रिद्वितीयवर्षम्

**अभिनवभारते संस्कृतम्-**

अभिनवभारते यद्यपि गीर्वाणवाण्याः न तादृशी समुन्नतिः प्रगतिर्वा तथापि निश्चप्रचम् एतत् सुकरं यत् संस्कृतवाङ्मयं साम्प्रतमपि जीवति जिजीविषति च । यद्यपि न विक्रमादित्य-भोजादिवत् राजाश्रयित्वम् तथापि तपःपूताः संस्कृतरक्षणैकचेतसः नानाविधाधिव्याधिक्लेशैः सम्पीडिताः, वृत्त्यभावादिदोष-विषण्णाः, स्वाभिमानैकधनाः सन्ति तादृशाः ब्रह्मऋणानृण्यलब्धुकामाः, बलिदानभावोद्दीप्त-मानसाः विपश्चितः, बेऽनवरतं संस्कृतकाव्यादिनिर्माणतत्पराः पत्रपत्रिकादिसम्पादनसंलग्नाः संदृश्यन्ते। समासतोऽत्र वर्तमानसमये क्रियमाणं कार्यं वित्रियते प्रस्तूयते च-

**संस्कृतकाव्यकाराः –**

वर्तमानसमयेऽपि केचन विद्वत्तल्लजाः काव्यरसलिप्सवो दृश्यन्ते यथा-यतीन्द्रजीवनचरितकारः शिवकुमारशास्त्री भारतपारिजात पारिजातापहार- पारिजातसौरभादिकारो भगवदाचार्यः, दयानन्ददिग्विजयकारो

अखिलानन्द शर्मा, मुनि- चरितामृतकारी दिलीपदत्तशर्मोपाध्याय, भारतानुवर्णनकारी रामावतार शर्मा, अलिविलास- संतापकारी गङ्गाधरशास्त्री तैलङ्ग, दयानन्ददिग्विजयकारो मेधाविन चन्द्रोपालम्भवर्णनकारी रघुनाथ शास्त्री, प्रतापविजयकारो मथुराप्रसाद शास्त्री, स्वराज्यविजयकारो द्विजेन्द्रनाथ शास्त्री बोधिसत्यचरित- गुरुगोविन्दसिंह महाकाव्यकारो डॉ० सत्राास्त्री राष्ट्रगीताञ्जलि-भक्तिकुसुमांजलि- आत्मविज्ञान महाकाव्यकारी डॉ० कपिलदेव द्विवेदी, सीता चरितकारो डॉ० रेवाप्रसाद द्विवेदी, गांधीगौरव- - लालबहादुरशास्त्रिचरित- बंगलादेशादिकारी रमेशचन्द्र शुक्ल प्रभृतयो विशेषतोऽत्र उल्लेखमर्हन्ति ।

**संस्कृतनाटककाराः** -

वर्तमाननाटककृत्सु प्राधान्येन उल्लेख्याः सन्ति- सावित्रीचरित ध्रुवाभ्युदय पार्वतीपरिणयादिकारः शङ्करलालमहामहोपाध्यायः छत्रपति साम्राज्य-प्रतापविजय-संयोगितास्वयंवरकारो मूलशङ्कर- माणिकलालयाज्ञिकः, सामवतादिकारो अम्बिकादत्त-व्यासः बङ्गीयप्रताप शिवाजीचरितादिकारो हरिदास- सिद्धान्तवागीशः, वीरप्रताप गांधीविजय भारतविजयादिकारो मथुराप्रसाद दीक्षितः, यां चिन्तयामि प्राणाहुतीकारो वेलणकरः परिवर्तनकारी डॉ० कपिलदेव द्विवेदिप्रभृतयः।

**गद्यकाव्यकाराः** –

गद्यकाव्यपरम्पराऽपि अविच्छिन्नाऽवलोक्यते। तत्र प्राधान्येनोल्लेख्या गद्यकृतः सन्ति मन्दारमञ्जरीकारो विश्वेश्वरपाण्डेय, शिवराज- विजयकारो अम्बिकादत्तव्यासः, प्रबन्धमञ्जरीकारो हृषीकेशभट्टाचार्यः, कथापञ्चक- ग्रामज्योतिः कथामुकावली प्रभूतिकृत् पण्डितक्षमाराव, कौमुदी कथाकल्लोलिनीकारो रामशरणत्रिपाठी, विद्वच्चरितका नारायणशास्त्री खिस्ते कुमुदिनीचन्द्रकारो मेधानाचार्य, लोकमान्यतिलक चरितका वामनकृष्ण चित्तले प्रतापचम्पूकारी दिलीपदत्तशर्मा, गांधीचरितकारो भागवताचार्यः, सेतुयात्रानुवर्णनकारो गणपतिशास्त्री, कलाकौमुदीकारो रामावतारशर्मा, गांधीचरितकारः चारुदेवशास्त्री च ।

**पत्रपत्रिकाः-**

संस्कृतभाषायामद्यत्वेऽपि काश्चन साप्ताहिक पाक्षिक मासिक- त्रैमासिक- पाण्मासिक वार्षिक-पत्रपत्रिकाः प्रकाश्यन्ते ताश्च प्रचुरप्रचाराः। तद्यथा- भवितव्यम् (नागपुरम्), गाण्डीवम् (वाराणसी), संस्कृतमञ्जूषा (कलिकाता), गुरुकुल- पत्रिका (कांगड़ी, हरिद्वार), भारतीय विद्या ( बम्बई), भारतोदयः (गुरुकुल म० वि०, ज्वालापुरम्), सङ्गमनी (प्रयाग), ब्रह्मविद्या (औडियार), सरस्वती- सुषमा (संस्कृत वि०वि०, वाराणसी), सागरिका (सागर वि०वि०), पुराणम्, (वाराणसी), संस्कृतप्रतिभा (नई दिल्ली) ।

**शोधसंस्थानानि** –

संस्कृते प्राच्य पाश्चात्त्य वैज्ञानिक पद्धतिमाश्रित्व प्रायः सर्वेषु विश्वविद्यालयेष्वनुसन्धानकार्य प्रवर्तते प्रतिवर्ष बहवो शोधच्छात्राः डॉक्टरोपाधिभिर्विभूष्यन्ते । एतदतिरिक्तं भण्डारकर - शोधसंस्थानम् (पूरा), विश्वेश्वरानन्द-शेधसंस्थानम् (होशियारपुर), काशिराज-शोधसंस्थानम् (वाराणसी), गङ्गानाथ झा शोध संस्थानम् (प्रयाग), इत्यादीनि संस्थानानि शोधकार्य प्रसारयन्ति, प्रोत्साहयन्ति च। निर्णयसागर - वेङ्कटेश्वर - स्वाध्यायमण्डल - आर्यसाहित्यमण्डल- वेदवाणी - गीताप्रेस-प्रभृतयः संस्कृत वाङ्मय प्रसारकार्ये बहुमूल्यं साहाय्यमाचरन्ति ।

**भारतीय भाषासु संस्कृतस्य योगदानम् –**

नास्ति कापि भारतीय भाषा या संस्कृतवाङ्मयमुपेक्ष्य जीवितुं क्षमा प्रायशः सर्वा अपि संस्कृतनिष्ठब्राह्मीलिपिसमुद्गता एवं भारतीयभाषालिपयः। आर्यभाषाणां व्याकरणमपि संस्कृतभाषाव्याकरणाश्रयत्वं द्योतयते । सर्वास्वपि आर्य द्रविड परिवारभाषासु संस्कृतशब्दानां बाहुल्यमवलोक्यते। क्वचित् षष्टिप्रतिशतं क्वचिच्चाशीतिप्रतिशतं संस्कृतशब्दप्रयोगाः प्रवर्तन्ते । भाषाणां तुलनात्मकाध्ययनेऽपि संस्कृतस्यैव प्राधान्यम् अवगम्यते । संस्कृतवाङ्मयं सम्यगनुशीलितं चेत् न तादृशी काप्यन्या भारतीयाऽऽर्यभाषा या स्वल्पेनैव कालेनाधिगन्तु न पार्येत । हिन्दीभाषा तु संस्कृतभाषायाः एवं आत्मजा । सा सर्वथा मातृऋणात् उन्मुक्ता भवितुं न पारयति। हिन्दीभाषाया समग्रमपि काव्यशास्त्रं, दर्शनशास्त्रं, साहित्यं च संस्कृतभाषाश्रयि ।

**संस्कृतसाहित्यं तत्प्रवृत्तवश्च –**

वैदिककालादारभ्य संस्कृतवाङ्मयं सर्वतोदिक्कं प्रवर्तते प्रवर्धते च जीवनोपयोग न तत् किमप्य यात्र गवेषितं परिशीलितं विवेचितं च वेदाः, उपनिषदः, दर्शनानि साहित्यशास्त्रम् व्याकरणायुर्वेद-धुनर्वेद- धर्मशास्त्र गणित ज्योतिष वास्तुशास्त्रादिकं संस्कृतवाङ्मयस्य सर्वाङ्गीणत्वं समर्थयन्ते। वैदिकं साहित्यं, पद्य-पद्य गीतिप्रभेदेन त्रिधा विभज्यते। लौकिकं साहित्यं गद्य-गद्य- चम्पूभेदेन त्रिविधमुपलभ्यते। पद्यात्मकं काव्यं गुरुलघुभेदेन महाकाव्य काव्य- गीतिकाव्यादिभेदमश्नुते गद्यात्मकं काव्यं कथाख्यायिकाभेदेन द्विविधम्। दृश्य-श्रव्यत्व- भेदेन काव्यं द्विविधम् काव्य-महाकाव्यादिकं श्रव्यम्। दृश्यन्तु रूपकम् नाटक-प्रकरण- भाण-व्यायोग समवकार- प्रहसनादिभेदेन तद्दशधा विभज्यते उपरूपकाणाम् अष्टादश भेदाः । वैदिक-साहित्ये श्रौतसूत्रं धर्मसूत्रं गृह्यसूत्रं सर्वमपि पाणिनीयमन्यच्च व्याकरणं, सर्वाणि च दर्शनानि, सूत्रपद्धतिमाश्रित्यैवावतिष्ठन्ते सूत्रपद्धतेः विशदीकरणार्थं भाष्याणां भाष्योपभाष्याणां महती परम्परा, या अनुदिनं प्रवर्धत एव।

**संस्कृतं राष्ट्रभाषा भवितुमर्हति —**

पूर्वोक्तेन विवेचनेन स्फुटमेतत् प्रतीयते यत् सर्वा अपि भारतीया भाषा : संस्कृतनिष्ठाः संस्कृतसम्पृक्ताश्च समग्रे भारतवर्षे निखिले च देशजवाङ्मये संस्कृतस्यैव प्राधान्यं प्रचुरप्रवृत्तित्वं च नास्ति देशस्य कोऽपि भागो यत्र संस्कृतवाङ्मयं नाधीयते, नावगम्यते, न श्रूयते, न चाद्रियते च विधानादिसम्पादने भाषायाः विशदत्वं स्थिरत्वं गूढभावाभिव्यञ्जनसामर्थ्यं चाश्यते राष्ट्रभाषापदलाभाव लोकप्रियत्वं, सरसत्वं, सम्मानास्पदत्वम्, अक्षयवाङ्मयसम्पत्तिमत्त्वम्, अविवादग्रस्तत्वं च भाषाया नितरामपेक्ष्यते। तदत्र व्यस्तं समस्तं च सर्वथा सुलभम्। संस्कृतवाङ्मयज्ञानमपि सारल्येन स्वल्पेन कालेन च सम्भाव्यते। एवं विचारदृशा विवक्ष्यते चेत् संस्कृतं राष्ट्रभाषापदम् अलङ्कर्तुं सर्वथा समर्था, योग्योपयुक्ता च ।

**अनुशीलितग्रन्थाः –**


1. संस्कृतशिक्षणम् – लेखकः -डा. उदय शङ्कर झा, चौखम्बा सुरभारती प्रकाशन , वाराणासी – 2013 .
2. संस्कृतनिवन्धशतकम् – लेखकः – डा. कपिलदेव द्विवेदी, विश्वविद्यालय प्रकाशन, वाराणासी – 2021 .
3. संस्कृत साहित्य का अभिनव इतिहास – लेखकः – डा. राधावल्लभ त्रिपाठी, विश्वविद्यालय प्रकाशन, वाराणासी – 2007 .


★★★★★

**वयं संस्कृतच्छात्राः**

**मनोरञ्जन् पाणि**
शिक्षाशास्त्रिद्वितीयवर्षम्

सर्वासां भाषाणां जननी संस्कृतम् ।
भारतस्य आशैव संस्कृतम् ।
तपस्वी जनानां कथनं संस्कृतम् ।
देवाःश्रोतुं इच्छन्ति संस्कृतम् ।
इयं भाषा संपूर्ण विश्वयोजिता ।
तादृशी भाषा अस्माकं संस्कृतभाषा ।
यां विना विश्वं स्तब्धं भवति ।
इयं गौरवशाली भाषा संस्कृतम् ।
एतादृशी कालविजयी भाषा संस्कृतम् ।
सरलवाक्येन कथ्यते चेत् संपूर्ण जीवनस्य
परिभाषा संस्कृतम् ।

यद्यपि अस्माकं संसारे बह्वयः भाषाः सन्ति । तथापि देवतानां भाषा, वेदानां भाषा, आद्या भाषा संस्कृतम् इति । अतः वयं धैर्येण कथयामो यत् वयं संस्कृताच्छात्राः इति ।

★★★★★

**संस्कृतभाषाशिक्षकस्य व्यक्तित्वं कार्याणि च**

**पद्मिनी प्रियदर्शिनी रणसिंह**

शिक्षाशास्त्रिद्वितीयवर्षम्

संस्कृतभाषा -

इयं सर्वासां भाषाणाम् जननी । संस्कृतभाषा विश्वस्य सर्वासु प्राचेनतरूपा भाषा अस्ति । संस्कृतभाषायामेव विश्वसहित्यसर्वप्राचीनग्रन्थाः चत्वारो वेदाः सन्ति । येषां महत्त्वं सर्वोपरि भवति । संस्कृतभाषा परिशुद्धा भवति । इयं भाषा देववाणी । इयं भाषा अतीव रमणीया मधुरा च अस्ति । रामायणमहाभारतकालेषु संस्कृतभाषा एव प्रचलिता आसीत् । इयं भाषा सर्वसम्पन्ना अस्ति ।

संस्कृतभाषाशिक्षकः –

संस्कृतशिक्षकः संस्कृतभाषायाः शिक्षकः अस्ति । संस्कृतशिक्षकः आचारे व्यवहारे विचारे अन्येभ्यः शिक्षकेभ्यः भिन्नः भवति । सः न केवलं कस्यचित् भाषाविशेषस्य अध्यापकः किन्तु महत्त्वपूर्णविषयस्य

अध्यापकः। अपि च संस्कृतभाषया ज्ञानाप्रदनेन छात्राणां चारित्रिकसद्गुणान् वर्धयितुं प्रेरयति। शिक्षकः इति शब्दस्य अनेके पर्यायवाचकशब्दाः सन्ति। यथा- आचार्यः, कुलगुरुः, दीक्षागुरुः, इत्यादयः।

संस्कृतस्य व्यक्तित्वम् -

इदं सद्गुणानां समन्वितरुपं व्यक्तित्वं भवति। यथा :- क्षमाशीलत्वम्, छात्रवत्सलत्वम्, आचारवत्वम्, परोपोकारत्वम्, भावयुक्तत्वम्, न्यायप्रियत्वम्, समायानुवर्त्तित्वम्, अनुशासनप्रियत्वम्, शास्त्रानुरागित्वम् इत्यादि। संस्कृतस्य प्रतिविषये समुचितं ज्ञानसम्पादनम् अध्यापाकस्य भूषणं भवति। संस्कृतभाषायाः प्रचारप्रसारः संस्कृताध्यापकानां प्रमुखभूमिका वर्तते। सः संस्कृतसाहित्यस्य अनुरागी स्यात्। सः संस्कृतभाषाशिक्षणे नवीनतमविधीनां प्रयोगे निपुणः कुशलश्च स्यात्।

★★★★★

## अध्यापकप्रशिक्षणे शिक्षणाभ्यासः

**प्रतिक्षा राउतराय**
शिक्षाशास्त्रिद्वितीयवर्षम्

**उपक्रमः-**

शिक्षाक्षेत्रे प्रशिक्षणं मुख्यं महत्त्वपूर्णं च भवति। प्रशिक्षणस्य तात्पर्यम् अस्ति पुनः पुनः अभ्यासेन अनुभवात्मकशिक्षणप्रदानम्। यत् शिक्षणं प्राभावपूर्णं, रुचिकरं सुग्राह्यं च करोति। कौशलपूर्णशिक्षणं छात्राणां कृते सरलबोधगम्यं भवति। विविधेषु विषयेषु दक्षतां प्राप्य कौशलानां प्रयोगेण शिक्षणप्रदानमेव कष्टकरः विषयः। अभ्यासं विना मानवानां कृते किमपि साध्यं न भवति, अतः भगवता श्रीकृष्णेन उक्तम्-"अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते" इति।

यथा लघुबालः अभ्यासद्वारा स्वपादमुत्थाय अग्रे गच्छति, पुनः पतति, किञ्चित् उपविशति च तद्वत् शिक्षणकलां प्राप्तुमभ्यासः आवश्यकः। प्रशिक्षणे छात्राध्यापकः कदाचित् अधः पतेत्, प्रयासेन उतिष्टेच्च। सर्वान् विषयान् सम्यगभ्यस्य दक्षो भवति चेद् अध्यापकः प्रभावपूर्णतया अध्यापयितुं शक्नोति।

**विषयवस्तुः-**

शिक्षणाभ्यासः शिक्षकप्रशिक्षणस्य महत्त्वपूर्णमङ्गं भवति। शिक्षणाभ्यासं विना प्रशिक्षणकार्यक्रमः पूर्णत्तां न याति। अतः प्रशिक्षणे शिक्षणाभ्यासस्य उपादेयता न कदाऽपि हेया। शिक्षकप्रशिक्षणेन छात्राध्यापकाः परम्परानुसारेण त्रिंशत् चत्वारिंशत् वा पाठान् शिक्षणाभ्यासविद्यालयेषु वास्तविक-कक्षासु पाठयन्ति। एतेषु पाठेषु छात्राध्यापकाः अनेकान् शिक्षणविषयान् पाठयन्तः प्रायोगिकशिक्षणं सम्पादयन्ति। प्रत्येकं पाठः प्रायः पञ्चचत्वारिंशत् निमेषात्मको भवति। अस्मिन्नवधौ छात्राध्यापकः विद्यालयस्य वास्तविकाध्यपकरुपेण भूमिकां निर्वहति। छात्रान् अनुशासयति। प्रस्तावनामुखादनेकान् विषयांञ्च सम्पादयति।स्व अध्यापनकाले छात्राध्यापकः विविधाः क्रियाः सम्पादयति। एवं यथाकथञ्चित् चत्वारिंशत् निमेषात्मकं समयं निर्वहति।परमेतेन क्रमेण असौ लक्षितमुद्देश्यं पूर्वतया अधिगन्तुं न शक्नोति। निरीक्षकाः अपि अध्याप्यमानान् पाठान् निरीक्ष्य प्रायः प्रचलिताभिः टिप्पणीभिः छात्राध्यापकानां मार्गदर्शनं कर्तुं प्रयतन्ते। चिरकालादियं व्यवस्था वरीवर्ति।एवं क्रमेण

प्रायोगिकशिक्षणाभ्यासेन छात्राध्यापकः शिक्षणस्य अनेकानि वैशिष्ट्यानि सम्यगभ्यस्य तेषां वैशिष्ट्यानां सम्मेलनेन स्वीयमध्यापनं सम्यक् सम्पादयितुं सक्षमः स्यात्।

शिक्षणाभ्यासः शिक्षकप्रशिक्षणकार्यक्रमस्य महत्वपूर्णः प्रयोगात्मकः पक्षः। येन कञ्चन छात्राध्यापकः कुशलाध्यापकत्वेन परिणमते।अनेन छात्राध्यापकः पाठ्ययोजनां निर्माय कक्षायां शिक्षणं ददाति । अत्र विषयद्वयं स्वीकरणीयम् । प्रत्येकस्य विषयस्य विंशतिः पाठाः भवन्ति।एवमाहत्य सम्पूर्णं चत्वारिंशत् पाठाः पिठनीयाः । पाठ्ययोजना कक्षायां शिक्षणात् प्राक् प्रशिक्षकेण निरीक्ष्यते। पाठनवेलायाञ्च निरीक्षणपुस्तिकायाम् उचितानुचितटिप्पण्यः प्रदीयन्ते। Prof.S.K.Dubey मतानुसार "शिक्षणाभ्यासः शिक्षकप्रशिक्षणकार्यक्रमस्य एकः महत्वपूर्ण-प्रयोगात्मकः पक्षः, येन छात्राध्यापकः वास्तविकशिक्षणप्रक्रियाणां, कक्षापरिस्थितीनां, शिक्षणविधिनां, शिक्षणस्योपयुक्त स्वरूपाणाञ्च विषये ज्ञानं प्राप्नोति" । तथैव Prof.R.K.Sharma मतानुसारं "शिक्षणाभ्यासेन छात्राध्यापकः प्रभावपूर्णशिक्षणस्य वास्तविक- परिस्थितिं स्वरूपञ्च ज्ञात्वा कुशलाध्यापकत्वमाधगच्छति" । अस्य शिक्षणाभ्यासस्य मुख्यविशेषताः निम्नलिखिताः वर्तन्ते।

1. शिक्षणाभ्यासप्रक्रिया क्रमबद्धः सन् सुसंघटितरूपेण सम्पाद्यते।
2. सैद्धान्तिकरूपेण प्राप्तज्ञानानां,सिद्धान्तानां,शिक्षणविधिनाञ्च व्यावहारिकप्रयोग एव शिक्षणाभ्यासः।
3. शिक्षणाभ्यासस्य सम्बन्धः प्रभावपूर्णशिक्षणप्रक्रियायाः विकासेन सह वर्तते।
4. सैद्धान्तिकरूपेण प्राप्तज्ञानानां, सिद्धान्तानां,शिक्षणविधिनाञ्च व्यवहारिकप्रयोग एव शिक्षणाभ्यासः।
5. शिक्षणाभ्यासप्रक्रिया प्रशिक्षणकार्यक्रमस्य प्रयोगात्मकपक्षो भवति। अयं पक्षः शिक्षकप्रशिक्षणस्य प्रमुखमङ्गं भवति।

शिक्षणाभ्यासे तु बह्वीनां क्रियाणां सम्पादनं भवति । तासां च क्रियाणां सम्पादनाय निर्धारितानि उद्येश्यानि वर्तन्ते। यथा-

1. शिक्षणाभ्यासेन सैद्धान्तिकज्ञानेन सह व्यावहारिकप्रयोगज्ञानमपि सम्पाद्यते।
2. शिक्षणाभ्यासकार्यक्रमः शिक्षकप्रशिक्षणकार्यक्रमस्य अपरिहार्यपक्षः, यस्याभावे कुशलशिक्षकाणां निर्माणम् असम्भवम्।
3. शिक्षणाभ्यासद्वारा छात्राध्यापकः छात्राणां मनोवैज्ञानिकपक्षस्य अध्ययनं कुर्वन् तेषां शिक्षणाधिगमप्रक्रियायाः प्रकृतस्वरूपं जानाति।
4. शिक्षणमिव महत्वपूर्णं तथा रचनात्मककार्याणि प्रतिछात्राध्यापकानामात्मविश्वासः, कार्यकुशलक्षमता च वर्द्धते।
5. छात्रैः, इतराध्यापकैः,कर्मचारिभिः आत्मीयतापूर्णावश्यकसम्बन्धस्थापन स्य योग्यता प्राप्तिः।
6. शिक्षणक्रियायां समागतसमस्यानां ज्ञानम्,तासां समाधानार्थं क्षमतोत्पादनञ्च।
7. शिक्षणाभ्यासेन कक्षाकक्षयोग्यतायाः विकासमस्पादनम्।
8. शिक्षणकाले उचितारोहावरोहक्रमेण वाचनं,सार्थककथनम् ,उपयुक्तप्रश्नकरणादि-योग्यतानां विकासः।
9. शिक्षणव्यवसाये सफलताप्राप्त्यर्थमावश्यकविशेषतानां विकासः।
10. छात्राध्यापकेषु व्यावसायिकदायित्वनिर्वहणस्य क्षमतोत्पादनम्।
11. छात्राणां स्तरानुगुणं योग्यतानुगुणञ्च शिक्षणविधिनां प्रयोगक्षमतायाः विकासः।

12. प्रभावात्मकाधिगमार्थं सम्प्रेषणक्षमतायाः विकासः।
13. शिक्षणाधिगमप्रक्रियां सरलीकर्तुं बोधगम्यञ्च कर्तुं छात्राध्यापके तादृशयोग्यतायाः अभिवृद्धिः।
14. शिक्षणाधिगमसामग्रीणां निर्माणं,तेषाञ्चोचितप्रयोगक्षमताप्राप्तिः।
15. छात्राध्यापकेषु मूल्याङ्कनयोग्यतायाः विकासम्पादनम्।

शिक्षणाभ्यासकाले छात्राध्यापकैः विभिन्नाः समस्याः अनुभूयन्ते। तद्यथा-

1. प्रायोगिकशिक्षणाभ्यासार्थं विद्यालयानामुपलब्धिः दुष्करा वर्तते।
2. ते अनुशासनहीनतायाः अपूर्तेः पाठ्यक्रमस्य च कारणं प्रदर्श्य शिक्षणाभ्यासार्थम् आगतान् छात्राध्यापकान् तान् एव पाठान् पाठयितुमादिशन्ति।
3. प्रधानाचार्याः विद्यालयान् दत्त्वाऽपि असहयोगं कुर्वन्ति।
4. छात्राध्यापकोऽपि मयाऽत्र चत्वारिंशत् पाठानामध्यापनं कर्तव्यमिति मनसि निधाय स्वीयं समयं यापयितुं प्रयतते।
5. विद्यालयीयच्छात्रा अपि जानन्ति यद् एते प्रशिक्षणार्थिनः छात्राध्यापकाः अस्माकं नियमिताध्यापकाः न सन्ति। अतः ते अनुशासने न तिष्ठन्ति,अध्ययने च रुचिं न प्रदर्शयन्ति।
6. पारम्परिकशिक्षणाभ्यासे निरीक्षकाः एककालमेव द्व्यधिकान् त्र्यधिकान् वा छात्रान् निरीक्षन्ते।
7. पाठः सम्यक् वर्तते, छात्राः अनुशासिताः सन्ति, प्रश्नाः कक्ष्यायां सुवितारिताः स्युः इत्येतादृशी या प्रतिपुष्टिः प्रशिक्षकैः शिक्षणाभ्यासकाले दीयते सा छात्राध्यापकानां गुणदोषविमर्शनपर्यन्तमेव सीमिता भवति, न तु कक्ष्या काठिन्यानां दूरीकरणाय सक्षमा भवति।
8. अपि च कदाचित् प्रशिक्षकैः दत्तानां सुचारुटिप्पणीनामनुपालनाय छात्राध्यापकैः विलम्बेन अवसरः लभ्यते।
9. शिक्षणाभ्यासस्य प्रारम्भिकदशायां छात्राध्यापकस्य शिक्ष्यमाणच्छात्रैरपरिचितत्वात् छात्राणां संख्याधिक्याश्च सः तेषां नियन्त्रणे असमर्थो भवति। अत्र छात्रनियन्त्रणं पाठ्यांशस्याध्यापनमिति कार्यद्वयं समकालमेव सम्पादनीयम्। अतः शिक्षणाभ्यासात् प्राक् सौद्धान्तिकरुपेण अधीतशिक्षासिद्धान्तादयः सहजकक्षाशिक्षणपरिस्थितिषु कथं प्रयोक्तव्याः? इत्येतादृशं कौशलं शिक्षणीयम्।

प्रायः अध्यापकशिक्षासंस्थायाः छात्राध्यापकाः शिक्षणाभ्यासस‌म्पादनाया विभिन्नेषु विद्यालयेषु प्रविशन्ति। तत्र तैः चत्वारिंशत् पाठाः पाठनीयाः भवन्ति। परन्तु,यमेव विद्यालयं प्रति ते गच्छन्ति तत्रस्थेन परिवेशेन सह एतेषां परिचयः न भवति। छात्राः अपरिचिताः भवन्ति।प्राध्यापकः सहकारको भवति उत न तदपि चिन्तायाः कारणम्। तस्मादधोलिखितरीत्या छात्राध्यापकानां पूर्वसिद्धता भवेत्- शिक्षणं काचित् सूक्ष्मातिसूक्ष्मा मानवान्तर्निहिता वैभवपूर्णा कला। कस्मिन् जने सा कला वर्तते कस्मिन् च न वर्तते तत् गणयितुं न शक्यते। यस्मिन् निहिता वर्तते,स्वत एव तस्याः परिस्फुटनं भवति। यत्र लेशोऽपि न विद्यते तत्र प्रशिक्षमेव कार्यं सम्पादयति। प्रशिक्षणेन शिक्षणकौशलानि वर्द्धन्ते।शिक्षणप्रदानाय कानि तत्त्वानि अनुकुर्वन्ति? तत्र च के विशेषोपायाः अवलम्बनीयाः? का पद्धतयः अनुसरणीयाः? इत्येते प्रश्नाः शिक्षणप्रदानात् प्राक् मनसि समायान्ति। तस्मात् शिक्षणात् प्राक् तादृशी पूर्वसिद्धता अपेक्षिता।

1. शिक्षणाभ्यासे अध्यापनाय निश्चीयमानाः पाठ्यपुस्तकस्य पाठ्यांशविशेषा अपि सन्ध्यलङ्कारादिभाषातत्वभूयिष्ठा भवन्ति एतेषां विषयाणां पाठनाय उपकुरुतां शिक्षणकौशलानाम् अभ्यासः आवश्यकः।
2. पाठ्ययोजनानिर्माणाय सोपानानामाधारेण कथं कक्षाशिक्षणं प्रदातव्यमिति तदर्थं पूर्वसिद्धता सम्पादनीया।
3. कक्षायां कोलाहलरतच्छात्राय प्रश्नकरणद्वारा पाठोन्मुखीकरणीयम्।
4. बहुतत्त्वभूयिष्ठस्य पाठ्यांशस्य योजनाबद्धक्रमेण तदन्तर्गतांशानां सक्रमस्मरणपूर्वक-मध्यापनमित्यप्यंशः छात्राध्यापकस्य कृते क्लेशकरः,तदर्थं बहुजागरुकतया पाठ्यांशस्य स्मरणपूर्वकं विषयः पाठनीयः। अन्ततो गत्वा अध्यापनं प्रभावपूर्णं भवति चेत् छात्राः छात्राध्यापकस्य आयत्ताः अवश्यमेव भवन्तीति नास्ति संशयः।
5. यदि विभिन्नकौशलानामभ्यासाय अनुकूला उपयुक्ताश्च तत्तत् कौशलानुरुपाः पाठ्यांशाः सुनियोजितरुपेण न पाठ्येरन् तर्हि तत्तत्कौशलानि पर्याप्तरुपेण न विकसेयुः। तस्मात् छात्राध्यापकेन कौशलानुगुणं पाठ्यांशानां चयनं कृत्वा पाठनीयाः।
6. शिक्षणाभ्यासार्थं गमनात् प्राक् शिक्षणसिद्धान्तानां, सूत्राणां, विधिप्रविधिनाञ्च ग्रहनाध्ययनं कृत्वा कार्ये तस्य प्रयोगार्थं सम्पूर्णसिद्धता आवश्यकी।
7. कक्षायां पाठनाय शिक्षणवस्तूनां सुनियोजनं,कक्षायाः कठिनतानां दूरीकरणाय उचितव्यवस्थापनं च करणीयम्।
8. कक्षायां प्रविष्टः छात्राध्यापकः कदाचित् शिक्षणबिन्दून् स्मर्तुं प्रयतमानः, छात्रान् विस्मरति, कदाचिच्च अनवधानच्छात्रान् अनुशासितुं प्रयतमानस्सन् प्रदर्शनार्थमानीतं शिक्षणोपकरणं विस्मरेत् । यदि शिक्षणोपकरणं स्मरेत् तर्हि आत्मना संरचितप्रश्नानां क्रमं विस्मरेत्।अतः सक्रमं पाठनाय पूर्वं योजनाबद्धप्रस्तूतिः कुर्यात्।
9. नूतनपरिस्थितौ सामञ्जस्यं संस्थापयितुं सौहार्दपूर्णव्यवहारः प्रदर्शनीयः।
10. छात्राणां विषये अमनयोग्यदूरीकरणाय पाठ्यमानविषयस्य तलस्पर्शी अध्ययनमावश्यकम्।
11. केषुचित् विद्यालयेषु प्रधानाध्यापकाः सहयोगं नैव कुर्वन्ति।एतस्याः समस्यायाः समाधानाय छात्राध्यापकस्य स्वप्रतिभाप्रदर्शनपूर्वकं छात्रेष्वध्यापनप्रभावं संस्थाप्य प्रधानाध्यापकाय प्रत्येकस्मिन् क्षेत्रे/कर्माणि सहयोगप्रदानाय मानसिकी सिद्धता आवश्यकी।छात्राध्यापकाः विद्यालयस्य उन्नतये प्रयतमानाः भवेयुश्चेत्तर्हि प्रधानाध्यापकः अवश्यमेव सहकारकः स्यात्।

विविधैः कलाकौशलैः दीयमानं प्रकृष्टशिक्षणं प्रशिक्षणम्।प्रशिक्षकैः यत् शिक्ष्यते तदपि प्रशिक्षणमिति वक्तुं शक्यते । कस्यापि प्रदत्तकार्यस्य सम्पादनाय कस्याप्येकस्य व्यक्तिविशेषस्य अभिवृत्तेः ज्ञानस्य, अवबोधस्य, कौशलस्य, व्यवहारस्य च क्रमबद्धविकासस्य नामैव प्रशिक्षणमिति । प्रशिक्षणे विविधानां शिक्षणकौशलानां ज्ञानं, तेषाञ्च अभ्यासः क्रियते। प्रविधेः उपयोगेन कार्ये गुणवत्तायाः विकासः निरन्तरं सञ्जायते।

**उपसंहारः-**

प्रशिक्षणकार्यक्रमे शिक्षणाभ्यासः प्रमुखमङ्गम्। शिक्षणाभ्यासं विना प्रशिक्षणं पूर्णतां न याति । छात्राध्यापकाः विभिन्नेषु विद्यालयेषु गत्वा तत्र प्रायः चत्वारिंशत् पाठान् पाठयन्ति । पाठानां पाठनसमये सैद्धान्तिकरूपेण

अधीतकौशलानां प्रयोगः क्रियते छात्राध्यापकैः । परन्तु अधीतसिद्धान्तस्य क्रियायां प्रयोगः समीचीनः भवति न वा इत्येतत् प्रशिक्षकः सूचयति । छात्राध्यापकस्य कक्षायामान्तमुपविश्य प्रशिक्षकेण तस्य सर्वेऽपि व्यवहारः निरीक्ष्यते। कुत्र दोषान्नाचरति? कुत्र साधु व्यवहरति? प्रभावपूर्णं सम्प्रेषणं सम्पादयति वा? कौशलानि उपयुज्यन्ते वा? इत्यादीन् बहून् विषयान् प्रशिक्षकः कक्ष्यायाः पृष्टे उपविश्य अवलोकयति, छात्राध्यापकस्य खातिकायाः टिप्पणीं च लिखति। मौखिकरूपेण स्वीयदोषाः  अन्येन केनापि उच्यन्ते चेत् सः दुःखं लज्जाञ्चानुभवति। अतः निरीक्षकैः छात्राध्यापकानां शिक्षणव्यवहारान् समीचीनदिश परिवर्तयितुं प्रकृष्टसूचनाः लिखितरूपेण प्रदीयन्ते । प्रायोगिकशिक्षणाभ्यासे प्रदत्तया अनया प्रतिपुष्ट्याः छात्राध्यापकाः स्वयमाचरितानां गुणदोषाणां विमर्शनं कर्तुं प्रभवन्ति। प्रशिक्षकस्य लिखितप्रति-पुष्ट्याधारेण ते गुणानां सम्बर्द्धनेन सह दोषाणां निराकरणाय यतन्ते। एवं क्रमेण छात्राध्यापकस्य कौशलविकासो भवति, प्रथमकालांशे सः यान् दोषान् आचरितवान् , तत्क्षणमेव अध्यापकेन ते दोषाः सूचिता इति कृत्वा क्रमशः त एव दोषाः निराकृताः, एवं रूपेण प्रथमकालांशे यदि नवतिः प्रतिशतं दोषमाचरितं, कौशलानां सिद्धान्तानां प्रयोगश्च सुष्ठु नैव कृतश्चेत् ,तर्हि चत्वारिंशत्तमे कालांशे छात्राध्यापकः प्रशिक्षकाणां प्रतिपुष्टेः प्रभावेण अवश्यमेव कौशलवान् सञ्जायते इति ।

**सन्दर्भग्रन्थसूची:-**


1. जोशी,प्रह्लाद, आर - अध्यापकशिक्षा,राष्टियसंस्कृतविद्यापीठम् , तिरूपतिः, २००७ .
2. पात्र,वृन्दावन- शिक्षणस्य वैज्ञानिकधारा, तिरतरङ्गप्रकाशन,भुवनेश्वर,२००८.
3. मिश्र, रमाकान्त- शैक्षिकप्रविधिः, चौखम्भाप्रकाशन,२००६.
4. Pandey.K.P- Advanced Educational Psychology for Teacher, Amitash Prakashn, New Delhi, 1983.
5. Pandey, Ram shakal- principles of Education, vinod Pustak Bhavan, Agra, 1979.


★★★★★

## अभिज्ञानशाकुन्तले तात्कालीनं सामाजिकचित्रम्


**पुजाराणी राऊत**

शिक्षाशास्त्रिद्वितीयवर्षम्


समाजस्य दर्पणः भवति साहित्यम् । समाजस्य सकलं तथ्यं तदानीन्तनसमये साहित्ये प्रतिफलितं भवति । अतः 'अभिज्ञानशाकुन्तलम्' इति नाटके तदानीन्तनसमयस्य सामाजिकचित्रं प्रतिफलितं स्वाभाविकम् । अभिज्ञानशाकुन्तलम् इति नाटके तदानीन्तनसमाजस्य वर्णव्यवस्था, आश्रमव्यवस्था, वैवाहिकावस्था, शिक्षाव्यवस्था, करव्यवस्था इत्यादिविषयाः लभ्यन्ते । यथा -

**वर्णव्यवस्था** -

तदानीन्तनसमये समाजे वर्णव्यवस्था प्रचलिता आसीत्। वर्णाश्रमस्य रक्षणं राज्ञः  कर्तव्यमासीत् । अतः नाटकस्य पञ्चमांके पुरोहितेन उक्तम् -

**असावत्र भवान् वर्णाश्रमाणां रक्षिता।**

**प्रागेव मुक्तासना वः प्रतिपालयति ।।**

ब्राह्मणवर्णस्य जनाः सर्वदा पौरोहित्यकर्मणि लिप्ताः अभवन् । वेदाध्ययनमध्यापना तथा यज्ञानुष्ठानं ब्राह्मणानां प्रमुखानि कार्याणि आसन् । महर्षिकण्वः मारीचः च अस्य प्रतीकौ भवतः । क्षत्रियाणां प्रमुख कर्तव्यम् अन्येषां रक्षाकारणम् । राजा दुष्यन्तः क्षत्रियत्वात् आश्रमस्य तथा तपोवनप्रभृतीनां रक्षाम् अकरोत् । तत्कालीनसमये वैश्याः जलयात्रां कृत्वा अन्यदेशैः सार्द्धं वाणिज्यं कृतवन्तः । षष्ठाङ्के राजा दुष्यन्तः धनमित्रनामकः वणिकस्य विषये उक्तं यथा -

**"समुद्रव्यवहारी सार्थवाहो धनमित्रो नाम नौ व्यसने विपन्नः ॥**

तथैव शूद्रवर्णस्य जनाः समाजस्य सेवां कृत्वा समाजस्य समुन्नतिं कृतवन्तः। प्रजाः सुखसमृद्धेन कालं यापयन्ति स्म । उच्चनीचयोः भावना नासीत् । जात्यनुसारं कुलधर्मी निन्दितौऽपि कुलधर्मी केऽपि न त्यक्तवन्तः। एतादृशप्रकारेण वर्णव्यवस्थाविषये पञ्चमाङ्के उल्लिखितमस्ति यत्-

**सहजं किल यद्विनिन्दितं न खलु तत्कर्मे विवर्जनीयम् ।**

**पशुमारण कर्म दारुणं अनुकम्पामृदुकोऽपि श्रोत्रियः ॥"**

**आश्रमव्यवस्था-**

अभिज्ञानशाकुन्तलनाटके आश्रमव्यवस्थायाः सम्यक् वर्णना दृश्यते । मुख्यतः समाजे आश्रमः चतुर्धा भवति । यथा – ब्रह्मचर्याश्रमः, ग्राहस्थ्याश्रमः, वानप्रस्थाश्रमः, सन्यासाश्रमः । तदानीन्तनसमाजे ब्रह्मचर्यपालनात्परं संतानप्राप्त्यार्थं गृहस्थधर्मं पालितवन्तः । गृहस्थजिवनात्परं पत्न्या सह अथवा एकाकी तपस्यार्थं वनं गतवन्तः। तद्वदेव नाटके चतुर्थाङ्के शकुन्तला कण्वं पृष्टवती यत् तपोवनमिदं पुनः कदा द्रक्ष्यामि ?
तदा मुनिना कण्वेन उक्तम् –

**“भूत्वा चिराय चतुरन्त महीसपत्नी,**
**दौष्यन्तिमप्रतिरथं तनयं निवेश्य।**
**भर्त्रा तदर्पितकुटुम्बभरेण सार्धम्,**
**शान्ते करिष्यसि पदं पुनराश्रमेऽस्मिन्॥”**

अर्थात् महर्षि काण्व उक्तवान् शकुन्तले! भवति दुष्यन्तस्य पत्नी भूत्वा एकं विरं पुत्रं उत्पाद्य तं जौवनावस्थायां रज्यभारं दत्वा पत्या सह पुनः अस्मिन् तपोवने निवासः करिष्यति । अस्मात् श्लोकात् ज्ञायते यत् वानप्रथाश्रम अनन्तरं तपस्याकरणं तदानिन्तनसमाजस्य परम्परा आसीत् ।

**विवाहप्रथा -**

साधारणतः समाजे अष्टप्रकारकाः विवाहः लभ्यन्ते। यथा – ब्रह्मविवाहः, दैवविवाहः, आर्यविवाहः, प्रजापत्यविवाहः, असुरविवाहः, गान्धर्वविवाहः, राक्षसविवाहः, पिशाचविवाहः । अस्मिन् नाटके गान्धर्वविवाह-प्रथायाः सूचना लभ्यते । दुष्यन्त शकुन्तलायाः विवाहः गान्धर्वविवाहप्रथायाः उदाहरणम् वर्तते ।

**शिक्षाव्यवस्था** –

तत्कालीनसमाजे शिष्याः गुरोः आश्रमे शिक्षां लब्धवन्तः । कण्वाश्रमे सार्गरावः सारद्वदः आदि इयं शिक्षायाः प्रमाणं भवतः । राजा शीक्षाव्यवस्थां सुचारुरूपेण परीचालयितुं चेष्टितवान् । प्रजानां शिक्षार्थं राजा बहुप्रयत्नम् कृतवान् । प्रजानां बुद्धिं योग्यतां च ज्ञात्वा तेषां आग्रहविषयेषु शिक्षा प्रदत्तवान् ।

**करव्यवस्था** -

तत्कालीनसमाजे प्रजाः स्वार्जनात् षष्ठांशं कररूपेण राज्ञे प्रदत्तवत्यः। अतः पञ्चमांके उक्तम् यत् -

**भानु सकदयुक्ततुरङ्गं एव रत्रिन्दिव गन्धबहः मयाति ।**

**शेषः सदैवहितभूमिभारः षष्ठांशबृत्तिरपि धर्म एव** ॥

अर्थात् राजा प्रजाभ्यः एकषष्ठांशं कररूपेण नीत्वा सकलं राज्यं तथा स्वजिविकां सञ्चालयति अतः राजा सूर्यः वायुः शेषनागवत् समग्रं राज्यं सञ्चालयति।

**पादटीप्पणी** -

1. असावत्र भवान्... - अ.शा.- ५/१२
2. समुद्रव्यवहारी... - अ.शा.-६/१४
3. भूत्वा चिराय... - अ.शा.-३/२२
4. असंशयं क्षत्रपरिग्रहक्षमा...- अ.शा.-१/२३
5. भानु सकृद् ... - अ.शा.-५/४

★★★★★

## भारते अध्यापकशिक्षा

**पूर्णिमा महान्ति**

शिक्षाशास्त्रिद्वितीयवर्षम्

***अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम्***

***आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः ॥***

अध्यापकस्य गुरुत्वं स्पष्टयितुं विद्वज्जनाः स्वाभिमतं प्रकटयन्ति । तद्यथा-

**क) डॉ. सर्वपल्ली राधाकृष्णन् -**

"समाजे अध्यापकस्य स्थानमत्यन्तमहत्त्वपूर्णं वर्तते । स एकसमसामयिकसमाजात् अग्रिमसमसामयिकसमाजं प्रति बौद्धिकपरम्पराणां प्राविधिककौशलानाञ्च हस्तान्तरस्य साधनरूपे कार्यकरोति । एतेन सह सभ्यतायाः ज्योतिं प्रज्वलयितुं सहायतां प्रददाति ।

**ख) माध्यमिकशिक्षायोगः (१९५२-५३) –**

शैक्षिकपुनर्निर्माणे अध्यापकस्य गुणावली, व्यावसायिक प्रशिक्षणं, प्रदत्तं समाजस्य विद्यालयस्य च स्थानं सर्वाधिकमहत्त्वपूर्णमिति माध्यमिकशिक्षायोगः प्रतिपादयति ।

**(ग) कोठरी-आयोगः (१९६४-६६) -**

राष्ट्रियविकासं प्रभावयितुं शिक्षायाः योगदानं यदस्ति, तत्राध्यापकस्य गुण-क्षमता-चरित्रादीनि सर्वाधिकमहत्त्वपूर्णानि साधनान्युपकुर्वन्ति ।

परन्तु मनसि शङ्का जायते यत् जनसंख्यायाः विस्फोटसमये सुगुणयुक्ताः सुयोग्याः अध्यापकाः कुतः आगमिष्यन्ति ? यद्यपि प्राचीनाः वदन्ति शिक्षणं एका कला । तर्हि येषां पार्श्वे सा कला वर्तते, ते एवोत्तमाध्यपकाः भविष्यन्ति, नान्ये । परन्तु समाजे एतादृशानां संख्या न्यूना । उत्तमशिक्षकः समाजस्याग्रगतिरपि भवितुं नार्हति । तर्हि शिक्षणकार्यं कथं वा सुचारुरूपेण चालयितुं शक्यते ?

एतस्याः समस्यायाः समाधानार्थं शिक्षाविदः शिक्षकप्रशिक्षणस्य विषये चिन्तितवन्तः । प्रशिक्षणमाध्यमेन सुयोग्याध्यापकानां निर्माणं कर्तुं शक्यते इति विचिन्त्य "अध्यापकशिक्षा" पाठ्यक्रमस्य प्रारम्भाभवत्।

**अध्यापकशिक्षायाः ऐतिहासिकविवरणम् - ( शिक्षायाः कालभेदेन)**

वैदिकशिक्षायाः प्रारम्भ इत्युक्ते विश्वशिक्षायाः प्रारम्भ इति सर्वजनाशयः अत एव वैदिककालादारभ्य अध्यापकशिक्षायाः संरचनाव्यवस्था कथमासीदिति सिंहावलोकनेन जानीमः ।

**वैदिककालः-**

६०० ख्रीष्टपूर्वात् प्रागयं काल इति ऐतिहासिकाः प्रमाणयन्ति । अस्मिन् काले अध्यापनकार्यमाध्यात्मिककार्यमिति आमनन्ति जनाः । गुरु आचार्य-उपाचार्यादिनामभिः अध्यापकः प्रसिद्धः आसीत् । अध्यापकः सर्वेषामादर्शाणां जनकः । परन्तु तस्मिन् काले अध्यापकानां प्रशिक्षणव्यवस्था नासीत् । न वा प्रमाणपत्रस्य । उत्तमाध्यापकस्य पार्श्वे स्थित्वा अध्यापनकलां गृह्णाति शिष्यः परवर्ति समये सः अध्यापकरूपेण कार्यं सम्पादयति स्म । परन्तु वैदिकशिक्षायाः अन्तिमपर्याये अध्यापनं पैतृककार्यमभवत् । ब्राह्मणः एव तस्याधिकारी एवं कालक्रमेण अध्यापनं ब्राह्मणानां पैतृकसम्पत्तिरिति आमनत् ।

**बौद्धकालः-**

६०० ख्रीष्टपूर्वात् १२०० ख्रीष्टशब्दपर्यन्तकालः बौद्धशिक्षायाः कालः । बौद्धशिक्षायाः व्यवस्था वैदिकशिक्षावदासीत् । सामान्यावलोकनेन पार्थक्यं केवलं धर्मस्य इति ज्ञातुं शक्यते । अन्यत् सर्वं नामान्तरमात्रम् ।

**मध्यकालः (मुस्लिमशिक्षा)-**

१२०० ख्रीष्टाब्दात् १८०० ख्रीष्टाब्दपर्यन्तं कालः शिक्षायाः मध्यकालः । मध्यकाले मुस्लिमजनानां शासनमासीत् । अतः शिक्षायाः मध्यकाल इत्युक्ते मुस्लिमशिक्षायाः कालः । अस्मिन् काले "मौलवी" (अध्यापकस्य नाम) अपाठयत् । यदि सम्यगवलोकयामः तर्हि स्पष्टीयते यत् तस्मिन् कालेऽपि अध्यापकानां कृते विशेषप्रशिक्षणव्यवस्था नासीत् । धनं स्वीकृत्य मौलवी मदरसासु मकतबेषु च पाठयति स्म ।

**ब्रिटिशकाल:-**

१८०० ख्रीष्टाब्दात् १९४७ ख्रीष्टाब्दपर्यन्तमयं कालः । आङ्गलजनानामागमनादनन्तरं ब्रिटिशशिक्षायाः समुद्भवः अभवत् । अस्मिन् काले शिक्षाव्यवस्था पूर्णरूपेण परिवर्तिताभवत् । आङ्ग्लेयानां प्रभावात् भारते शिक्षणशैल्यां क्रान्तिरागता पाश्चात्यविषयाणामध्यापनं, पाश्चात्यभाषयाध्यापनं, पाश्चात्यशैल्याश्चाध्यापनं भारतीयानां कृते कष्टकरमभवत् । यद्यपि केचन पाठयन्तः आसन्, तत्रापि जनसंख्यायाः वृद्धिकारणात् अध्यापकानां न्यूनता अनुभूता । प्रशिक्षणेन योग्याध्यापकानां निर्माणं कर्तुं शक्यते इति विचिन्त्य अस्मिन् काले एव अध्यापकशिक्षायाः प्रारम्भं कृतवन्तः । अस्मात् कालादेवभारते अध्यापनकार्यं वृत्तिरूपेण विकसितमभवत् ।

**परिशीलितग्रन्था:-**

1) के. जी. रस्तोगी - भारतीय शिक्षा का इतिहास एवं समस्याएँ, विनोद पुस्तक मन्दिर, आगरा ।

2) दिनेशचन्द्र जोशी, चतर सिंह मेहता - शिक्षकप्रशिक्षण के सिद्धान्त और समस्याएँ, राजस्थान हिन्दी ग्रन्थ अकादमी, जयपुर ।

3) रवीन्द्र अग्निहोत्री - आधुनिकभारतीयशिक्षा, समस्याएँ और समाधान, राजस्थान हिन्दी ग्रन्थ अकादमी, जयपुर।

4) पी. डी. पाठक - भारतीय शिक्षा और उसकी समस्याएँ - श्री विनोद पुस्तकमन्दिर, आगरा - २ ।

5) रामशकल पाण्डेय भारतीय शिक्षा की समस्यायें श्री विनोद पुस्तकमन्दिर, आगरा।

6) टीचर ऐजुकेशन करीकुलम फ्रेमवर्क- १९७८

7) शिक्षाशास्त्र (UGC-NET), दैनिक पब्लिसिंग कम्पनी, नई दिल्ली।

8) शिक्षाशास्त्र (UGC-NET), श्रीविनोद पुस्तक मन्दिर, आगरा ।

★★★★★

## नवशिक्षानीतिः शिक्षागुणवत्ता च

**शिल्पा आर्. एस्.**

शिक्षाशास्त्रिद्वितीयवर्षम्

चतुस्त्रिंशत् वर्षानन्तरं आगता शिक्षानीतिः अस्ति राष्ट्रीय शिक्षानीतिः2020। अनया शिक्षानीत्या 10+2 इति रूपेण विद्यमानां शिक्षाव्यवस्थां 5+3+3+4 इति रूपेण परिवर्तितम्। इदानीं तु शिक्षकशिक्षायां गुणवत्तासङ्घटनं अस्ति। तस्य निवारणार्थमपि अयं शिक्षानीतिः बहु उपकरोति। केन्द्रीय-परामर्श-शिक्षायोगः राष्ट्रीय शिक्षायोगः इति रूपेण परिवर्तितम्। डीम्ड् विश्वविद्यालयः, केन्द्रसम्बद्धविश्वविद्यालयः, केन्द्रसंबद्धप्रविधिविश्वविद्यालयः इत्यादीनां नियन्त्रणं 2025 तमवर्षात् केन्द्रीयविश्वविद्यालयरूपेण परिणामं प्राप्स्यति। पूर्वं तु अध्यापक – छात्राणां अनुपातः 1:30 आसीत्। इदानीं तु 1:10, 1:20 इति वा अध्यापक – छात्राणां अनुपातः स्वीकृतमस्ति। एतेन किम् भविष्यति इत्युक्ते अध्यापनवसराः वर्धन्ते। भाविनिकालशिक्षकाः तु आभासी वास्तविकता AR (Augemented Reality), सम्वर्धितवास्तविकता VR (Virtual Reality) इत्यादीन् उपयुज्य पाठयति चेत् छात्राणां रुचिः अपि वर्धते।

बहुविषयक-स्नातक-पाठयक्रमाः (Multidisciplinary Undergraduate Course), बहुप्रविष्ट बहुनिर्गमनकार्यक्रमाः (Multiple Entry and Multiple Exit Programs), अकादमिक् बैक् ओफ् क्रेडिट (ABC), शास्त्रि चतुर्वर्षीयपद्धतिः, एवं शास्त्रि चतुर्थ वर्षे शोध कार्ये शोधे प्रवृत्तिः इत्यादि नूतन छात्रकेन्द्रित - परिवर्तनानि अत्र विशिष्टपरिवर्तनानि भवन्ति। यदा कश्चन छात्रः शास्त्रि चत्वारि वर्षाणि पूर्तिं करिष्यति तदनन्तरम् अनुसन्धानं कर्तुं शक्यते आचार्यनन्तरमपि अनुसन्धानं कर्तुं शक्यते इति अत्र विशेषः।

Justice J.S.Verma आयोगेन 2012 निरूपितं यत् दशसहस्र-शिक्षकशिक्षासंस्थाभिः गुणवत्ताशिक्षकशिक्षा न प्रदत्ता। केवलं धनं स्वीकृत्य प्रमाणपत्राणि यच्छन्तीति। अतः अस्यां शिक्षानीत्यां अन्तर्गतानि उद्देश्यानि अत्र प्रस्तूयन्ते।

- समग्र-बहुविषयक-संस्थानस्यान्तर्गते एव सर्वे शिक्षकशिक्षा कार्यक्रमाः प्रचलन्ति।
- नवीन तथा व्यापकराष्ट्रीयकार्यक्रमस्य प्रारूपं शिक्षकशिक्षायाः कृते अनिवार्या वर्तते।
- राष्ट्रीय परीक्षण एजन्सि (NTA) द्वारा शिक्षाशास्त्र्याः प्रवेशपरीक्ष भविष्यति।
- केवलं शैक्षिक दृष्ट्या एव बहुविषयकः तथा एकीकृत शिक्षकशिक्षा कार्यक्रमाः उपलभ्यन्ते।
- मार्गदर्शनार्थं राष्ट्रीय मिशन इत्यस्य संस्थापनम्।
- सर्वेषु चरणेषु शिक्षकयोग्यता परीक्षा सुदृढा भविष्यति।

★★★★★

## संस्कृतभाषायाः महत्त्वम्

**शुभश्री ज्योतिषी**

शिक्षाशास्त्रिद्वितीयवर्षम्

संस्कृतं जगतः अतिप्राचीना, समृद्धा, शास्त्रीया भाषासु प्राचीनतमा च अस्ति। संस्कृतावाक्,भारती, सुरवाणी, गीर्वाणवाणी, देववाणी, देवभाषा, देवीवाक् इत्यादिभिः नामभिः इयं भाषा प्रसिद्धा। भारतीयभाषासु बाहुल्येन संस्कृतशब्दाः उपयुक्ताः। संस्कृतात् एव अधिकाः भारतीयभाषाः उद्भूताः। व्याकरणेन सुसंस्कृता भाषा जनानां संस्कारप्रदायिनी भवति। अष्टाध्यायी इति नाम्नि महर्षिपाणिनेः विरचना जगतः सर्वासां भाषाणां व्याकरणग्रन्थेषु अन्यतमा। वैयाकरणानां भाषाविदां भाषाविज्ञानिनां च प्रेरणास्थानं इवास्ति। प्राचीनकाले सर्वे एव भारतीयाः संस्कृतभाषया व्यवहारं कुर्वन्ति स्म। कालान्तरे विविधाः प्रान्तीयाः भाषाः प्रचलिताः अभवन्। किन्तु संस्कृतस्य महत्त्वम् अद्यापि दृढं वर्तते। संस्कृतभाषायाः महत्त्वम् पूर्वरुपेण वैज्ञानिकम् अस्ति। आचार्येण दण्डिना उक्तम् –

**"भाषासु मधुरा मुख्या दिव्या गीर्वाणभारती।"**

**उपक्रमः-** संस्कृतभाषा अस्माकं देशस्य प्राचीनतमा भाषा अस्ति। प्राचीनकाले सर्वे एव भारतीयाः संस्कृतभाषायाम् एव व्यवहारं कुर्वन्ति स्म। कालान्तरे विविधाः प्रान्तीयाः भाषाः प्रचलिताः अभवन् , किंतु संस्कृतस्य महत्वं अद्यापि अक्षुण्णं वर्तते। सर्वे प्राचीनग्रन्थाः चत्वारो वेदाश्च संस्कृतभाषायामेव सन्ति। संस्कृत भाषा भारतराष्ट्रस्य एकतायाः आधारः अस्ति। संस्कृतभाषायाः स्वरूपं पूर्णरुपेण वैज्ञानिकम् अस्ति। अस्य व्याकरणं पूर्णतः तर्कसम्मतं सुनिश्चितं च अस्ति।

**संस्कृतभाषायाः स्वरूपम्** – संस्कृत भाषा निखिलविश्वस्य वांग्मयेषु प्राचीनतमा वर्तते। एषा हि सुरभारतीति कथ्यते। अस्या व्याकरणं पाणिसूत्राणि जगतः सर्वातिशयम् आश्चर्यम्। परिष्कृतं, परिशुद्धं, व्याकरणादिदोषरहितं यत् तत् संस्कृतम्। अस्यां भाषायाम् एव व्यास-वाल्मीकि-कलिदास-भवभूतिप्रभृतीनां कविनां वाणी संरक्षिता वर्तते।

**संस्कृतसाहित्यम्**– संस्कृतभाषा अतीव वैज्ञानिकी विद्यते। भारतवर्षस्य समस्तमपि प्राचीनं वाङ्मयं संस्कृतभाषामाश्रित्यैव तिष्ठति। अस्यामेव भाषायाम् उपनिबद्धाः वैदिकवाङ्मयम्, रामायणम्, महाभारतम्, पुराणानि, स्मृतिग्रन्थाः, काव्यानि, महाकव्यानि, नीतिग्रन्थादयश्च उपलभ्न्ते। न केवलम् एतदेव व्याकरणं , साहित्यशास्त्रम् , गणितम्, ज्योतिषम्, आयुर्वेदः, अर्थशास्त्रम्, कोशग्रन्थाश्च संस्कृतभाषाया गौरवम् वर्धयन्ति। संस्कृतसाहित्येतिहासे (१) वैदिक संस्कृतसाहित्यम् (२) लौकिक संस्कृतसाहित्यम् इति भागद्वयमुपलभ्यते। वैदिकसंस्कृतस्य स्वरूपं वेदेषु तस्मिन काले रचितेषु अन्येषु ग्रन्थेषु चोपलभ्यते। लौकिक संस्कृतं प्रायः पाणिनीय-व्याकरण-नियमानुसारं भवति। प्राचीनकले संस्कृतं न केवलं साहित्यिकभाषा अपितु साधारणजनानां व्यावहरिकीभाषाप्यासीत्। कालान्तरे उत्पन्नाः स्थानीयाभाषा संस्कृतसाहित्येन च अत्यन्तं प्रभाविताः अभवन्। धर्मस्य संरक्षणेन प्रोत्साहनेन च संस्कृतं देवभाषापदमलभत्।

**"धर्मार्थकाममोक्षाणाम् उपदेशसमन्वितम्।**
**पूर्ववृत्तं कथायुक्तम् इतिहासं प्रचक्षते ॥"**

**संस्कृतस्य पुरा लोकव्यवहारः** – संस्कृतभाषा विश्वस्य प्राचीनतमा प्राचीनतमासु भाषासु अन्यतमा वा भाषा विद्यते। प्राचीनभारतीयसाहित्यानुशीलनेन स्फुटम् एतद् अवगम्यते यत् ईसवीयसंवत्सरात् पूर्वम् इयं

संस्कृतभाषा जनसाधारणे व्यवहृताभूत् । निरूक्तकारो यास्कः संस्कृतभाषां निरूपयति । अष्टाध्यायीस्थसूत्राण्यपि एतदेव समर्थयन्ते । पाणिनिना वैदिक – लौकिकभाषयोः विभेदो छन्दस् – भाषा – शब्दयोः प्रयोगेण विधीयते । एतेन व्यवहृतभाषारूपेण संस्कृतस्य प्रयोगो लक्ष्यते ।

संस्कृतस्य साहित्यम् अतिविशालम् अस्ति । अस्यां भाषायां काव्यानां माधुर्यं विश्वप्रसिद्धम् अस्ति । पुरा आदिकविः वाल्मीकिः संस्कृतभाषायामेव रामस्य चरितम् अलिखत् । हनुमान् अशोकवाटिकायां सीतां प्राप्य संस्कृतम् आश्रित्यैव विवक्षति –

**“यदि वाचं प्रदास्यामि द्विजातिरिव संस्कृतम्**
**रावण मन्यमाना मां सीता भीता भविष्यति ।।”**

कालिदास – भारवि – माघ – श्रीहर्षादयः अनेके महाकवयः संस्कृते सुंदराणि काव्यानि अलिखन् । द्वितीयशताब्दी – ईशवीयाद् आरभ्य एकोनविंशतितमशताब्धिं यावत् सर्वेपि शिलालेखाः प्रायेण संस्कृतभाषाश्रया एव।

**नवीनभाषारूपेण संस्कृतम् -** अद्यत्वे कंप्यूटरस्य युगोस्ति । अस्मिन युगे ‘ कंप्यूटर ’ नाम यन्त्रस्य महत्त्वं सुविदितमेव । वैज्ञानिकैश्च अस्य यन्त्रस्य कृते संस्कृतभाषायाः आनुकूल्यं सर्वथा उद्धोषितम् । अतः भविष्ये कंप्यूटरयन्त्र चालनाय अस्याः भाषायाः महत्वम् अस्ति इति मन्यते । संस्कृतम् एका वैज्ञानिकी भाषा , अतः विज्ञानवत् अस्याम् अंगानि उपलभ्यन्ते छात्रैः ।

**भाषासु मधुरा मुख्या दिव्या गीर्वाणभारती -** संस्कृतभाषायाम् एव चत्वारः वेदाः सन्ति । अस्याः माध्यमेनैव आर्याणाम् अद्यपि सर्वे संस्काराः सम्पन्नाः भवन्ति । अतएव इदम् उच्यते – “संस्कृतं नाम दैवी वागन्वाख्याता महर्षिभिः” । कालिदास – माघ – श्रीहर्ष – जयदेवादीनां काव्यानि प्रतिपदं माधुर्ययुतानि, संगीतात्मकानि च सन्ति । इदानीं तु भारतीयैः इदं घोष्यते च यत् तेषां वेदवाङ्गमयं विश्वस्य उपलब्धं प्राचीनतमं वाङ्मयम् अस्ति , यदाधारेण च इदं वक्तुं शक्यते यत् तेषां संस्कृतिः सभ्तता च अतीव प्राचीना वर्तते ।

**उपसंहारः -** संस्कृतभाषया एव भारतस्य एकता भवितुं शक्नोति । संस्कृतभाषा सर्वेषां धर्माणां धात्री इव, लोककल्याणसम्पादने एषा अग्रणी, विश्वबन्धुत्वादिभावानाम् उद्धावयत्री । हर्षस्य विषयोयं यत् अद्यत्वेपि संस्कृतसाहित्ये, काव्यानि, नाटकानि, गीतिकाव्यानि, गद्यसाहित्यम्, विविधाः पत्र-पत्रिकाः च प्रतिवर्षं प्रकाश्यन्ते । अक्षयोयं निधिः सर्वथा सर्वदा च अध्येयानुशीलनीयः सम्मान्यो विकासनीयश्च । अतः वर्तमाने वैज्ञानिके युगे अस्याः भाषायाः महत्त्वम् अतीव वर्तते ।

★★★★★

## रक्षाकवचो धर्मः

**स्मरणिका दास्**

शिक्षाशास्त्रिद्वितीयवर्षम्

अस्मिन् ब्रह्माण्डे यत्किञ्चिद्पि विद्यते तस्य सर्वोत्तमोपयोगः केन प्रकारेण कर्तव्यः इति धर्मशास्त्रस्य प्रमुखविचारविषयः । धर्मशास्त्रानुसारं मानवजीवनमेकान्तो नास्ति। पूर्वमपि जीवनमासीत्, प्रायशः पश्चादपि जीवनं

भविष्यति। अस्यां स्थितौ वर्तमानजीवने तथा व्यवहर्तव्यं येन मानजीवनेऽपि सुखं भवेत् । ततो मुक्तिर्नाम मरणानन्तरं सर्वोच्चाभ्युदयः । तदधिकृत्य धर्मस्य परिभाषा मीमांसकैः कृता- यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः । धर्म एव जीवनस्य सारः । तदर्थं मनुना धर्मलक्षणं निर्दिष्टं यत् –

**वेदः स्मृतिः सदाचारः स्वस्य च प्रीयमात्मनः ।**

**एतच्चतुर्विधं प्राहुः साक्षाद्द्धर्मस्य लक्षणम् ।। इति ।**

चतुर्विधधर्म वेद- स्मृत्यनन्तरं सदाचारोऽपि धर्म उदिर्यते । सदाचारेणैव जीवने सर्वार्थसिद्धिरित्यत्र न काचन विप्रतिपत्तिः ।

**उक्तञ्च- आचारः परमो धर्मः श्रुत्युक्तः स्मार्त्त एव च।**

**तस्मादस्मिन्सदा युक्तो नित्यं श्यादात्मवान द्विजः ।। इति ।**

परार्थसाधनं परहितचिन्तनं च जीवने सुखम् अनुप्राणयति । एवं रक्षितो धर्मोऽपि धर्मवृद्धेरनर्थवारणपुरः सरं रक्षामातनुते । अतो जगति धर्म एव सर्वोत्कृष्टं मित्रम् । सम्पदि विपदि च सुखे दःखे चाजस्त्रं साहय्याचरणेन धर्मः परमः सुहृत् । न केवलं जीवदशायां, परत्रापि सुखसाधनेन धर्मस्य परममित्रत्वं च व्यदिश्यते । एतदर्थमुच्यते मनुना –

**एक एव सुहृद्धर्मो निधनेऽप्यनुयाति यः ।**

**शरीरेण समं नाशं सर्वमन्यत्तु गच्छति ।। इति।**

जगति धर्म एव पारस्परिकविश्वाससंघानात् प्रजानां रक्षकः । एवमेवलोक्यते यद् जीवने धर्मस्य सर्वदा चानिवार्यत्वं वर्तते । तस्याश्रयेनैव ऐहिकम् आमुष्मिकं च सुखमवप्यते ।

भगवत्गीतायामस्ति – स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् । अर्थात्कृतः सामान्यतमो धर्मोऽपि यथासमयं प्राणिनं सुमहन्मृत्युभयादपि रक्षति। तर्हि एष धर्मः कः ? महाभारतवनपर्वाणि यक्षस्य प्रश्नस्य (कः पन्थाः) उत्तरे युधिष्टिरः कथितवान् – नानामुनीनां मतयो भिन्नाः । तथैव वेदोऽपि नैकः। विभिन्नस्थानेषु भिन्नतया धर्मतत्वं प्रतिपादितम् । तर्केण कस्यापि सत्यस्य प्रतिष्ठा नैव सम्भवपरा । धर्मस्य तत्त्वं गोपनीयम्, केवलम् अनुभवगम्यम्। अतो महाजनः येन मार्गेण गच्छति, स एव अनुसरणीयः। यत्र युधिष्ठिरेण तत्कालीनपुरुषोत्तमं भगवन्तं लक्ष्यीकृत्य महज्जनशव्दः प्रयुक्तः ।

धर्म इत्युक्ते हिन्दु – मुसलमान् –शिख–वौद्धप्रभृतिसम्प्रदायाः नैवावबोध्यन्ते । ‘ धारणाद्धर्म इत्याहुः ’ अर्थात् या नीतिः यो विधिर्वा समाजं, संसारं मानवञ्च जीवितुं वर्धितुञ्च धरति धारयति च स एव धर्मवाच्यः । समाजे सहावस्थानं नाम धर्मः। शारीरिक एव धर्मपदवाच्यः । समाजे सहावस्थानं नाम धर्मः। शारीरिकशक्त्यां धने च यो दुर्बलः, तस्य कृते सहायतायाः, परस्परं प्रति आचरणस्य, स्नेहस्य, सद्भावनायाः मूलमन्त्ररूपेण गृहीतस्य नाम धर्मः।

यदि असामाजिककार्यात् दूरे स्थित्वा परोपकारेण व्यक्तिः धार्मिको भवति, तर्हि उपवास– व्रत– ध्यान-यज्ञोपासना-धर्मग्रन्थपाठ- तिर्थाटनादीनि कथम् ? विक्षिप्तचञ्चलमनः एकाग्रं कृत्वा सचिन्तने सद्भाषणे सत्कार्ये च विनियोगः सुकरो न भवति। उच्छृङ्खलं मनः नियत्रणाधीनं कर्तुम् उपवासोपासनातीर्थाटनानि कथितानि मनः यदा सत्कार्ये सच्चिन्तने च सदा तत्परं तिष्ठति तदोल्लिखितं यत् – ब्राह्योपचाराणावश्यकता न तिष्ठति । एकस्मिन् सुस्थसमाजे सर्वे परस्परं निर्भरशीला एकोऽपरस्य परिपुरकः । यो धर्ममनुसरति स उत्तमसामाजिको मानवो भवेत्।

सामान्यधर्माचरणं कथं मानवं महद्विपदः रक्षति तस्योदाहरणमसमीचीनं न स्यात् कश्चन वृद्धः सप्ताहे वारत्रयं निपतितवान् । आदौ जलपतितभूतले, ततः स्नानगृहे ततः च सोपानादवरोहणसमये । यथाक्रमं तस्य दक्षिणवाहो निवन्धः, कटीतवास्थि, अन्ते वामपादपार्ष्णीः च आयातितः। एषामुपशमः त्रिषुसप्ताहेषु जातः, यतो घटणासु अस्थि आघातप्राप्तं नासीत्। कथनस्य बाहुल्यं यद्धद्रजनः प्रत्यहं प्रार्थनां करोति स्म। अन्यस्य अनिष्टकरणं दूरे आस्ताम्, चिन्ता अपि नैव कृता । सरलवार्तालापैः कार्यैः च सर्वेषां मनः विमोहितम्। कस्यापि मनसि आघातम् उत्तेजनाम् अवसादं वा नैव सृजति स्म ।

धर्मे सदाचारे च विश्वासमकृत्वा यो जनः आत्मानं चतुर इति मत्वा सर्वं कार्यं स्वस्वार्थसिद्धये कृतवान्, सः सोपानारोहणात्पतितः। तस्य मस्तके आघातो जातः तेन सः तत्क्षान्मृतः। अन्यः यः आत्मानो भ्रातरं वञ्चयित्वा सर्वां पैतृकसम्पत्तिं अपहृतवान् सः स्नानागारे पतित्वा कटीतटनिबन्धरखलितात् दशवर्षाणि शय्याशायी भूत्वा पञ्चत्वं प्राप्तः। अन्यः क्रूरकर्मा यो जनान् पीडयित्वा आत्मानं प्राधान्यविस्तारेण अपारमानन्दमुपभुंक्तवान् सः आर्दभूभागे पतित्वा मेरुदण्डे आयातितः । परिणामः सः दूरारोग्यपक्षाघातेन पीडितः ।

**सर्वं परवशं दुःखं सर्वमात्मवशं सुखम् ।**

**एतद्विद्यात् समासेन लक्षणं सुखदुःखयोः।।**

पौराणिको धर्मः सर्वजनग्राह्यो विकसितः । तदनुसारं धार्मिकाः, निर्धनाः, उच्चवर्णाः नीच्चवर्णाः वा सर्वेऽपि धर्मपथेन स्वकल्याणं कर्तुं समर्थाः बभूवुः। धर्मस्यालौकिकविधानानि प्रत्यक्षानि न भवन्ति, किन्तु तेषां मान्यता समाजे वर्तत्ते । तेषु प्रथमं तावत्कर्मफलमेव । कर्मण इह जन्मनि फलं साक्षात् वर्तते, किन्तु मरणान्तरमपि कतिपयकर्माणि कर्तारमनुबध्नन्तीति धर्मकल्पना। अपरजन्मनि तेषां फलं भुज्यते। कर्मानुरुपमेव पुनर्जन्म भवतीति विष्णुपुराणभागवतयोः ज्ञायते।

★★★★★

## आदिशङ्करः

**श्रुतिः सि.के.**

शिक्षाशास्त्रिद्वितीयवर्षम्

अनेकेषां महात्मानां जन्मभिः अस्माकं भरतं पवित्रीकृतं भवति । तत्र प्रथमः भवति जगद्गुरु आदिशङ्करः । अयं केरलदेशे कालाटि नाम ग्रामे शिवगुरु-आर्यम्बयो: एकमात्रपुत्रत्वेन ७८८ तमे वर्षे जनिमलभत । वृषगिरि नाम मन्दिरे तप: कृत्वा एव तयो: पुत्रप्राप्तिरिति कथ्यते। बाल्ये मातृमुखात् श्रवणमात्रेणैव पुराणकथां स्वायत्तीकृतवान् । शङ्कराचार्यस्य तृतीये वयसि पिता शिवगुरुः दिवंगतवान् । अष्टमे वयसि मकरदंशनेन सन्यासं स्वीकृतवान् । शङ्कराचार्य: सर्वशास्त्रेषु पारङ्गतः भवति ।

अष्टवर्षे चतुर्वेदी द्वादशे सर्वशास्त्रविद् ।

षोडशे कृतवान् भाष्यं द्वात्रिंशे मुनिरभ्यगात् ।

इत्ययं श्लोक: श्रीशङ्करस्य अन्यादृशवैभवसूचकः । तस्य जन्म विषये परमशिव: अनुग्रहसम्पन्दा काञ्चित् कथा प्रदता असीत् | बाल्यावस्थायामेव अस्य बुद्धिशक्ति: अतिमहत्तरमासीत् । बाल्ये एव सन्यासाश्रमं स्वीकृत्य नर्मदा नदीतीरे श्री गोविन्दभगवद् पादाचार्यस्य समीपम् आगत्य अतिरिक्तशास्त्राध्ययनं ग्रन्थरचनां च अकरोत् । एकात्मसिद्धान्तेन भारतीयानाम् ऐक्यमापतयन् शृङ्गेरि, बदरी, पुरी, द्वारका इति चतुर्णां मठानां संस्थापनेन भरतस्य अखण्डता संरक्षणञ्च कृतवान् श्रीशङ्कर: । सुरेश्वराचार्यः, हस्थामलकाचार्यः, पद्मपादाचार्यः, तोडकाचार्य: इति तेषां चत्वारः प्रमुखाः शिष्याः भवन्ति । श्रीकृष्णस्वामिमन्दिरप्रवाहे गमवावासरे बिम्ब उत्प्रेक्षणस्थाने तस्य प्रतिष्ठाम् अकरोत् । तदानीम् अच्युताष्टकम् आलपितवान् ।

“अच्युतं केशवं रामनारायणं कृष्णदामोदरं वासुदेवं हरिम् ।

श्रीधरं माधवं गोपिकावल्लभं जानकीनायकं रामचन्द्रं भजे “ ॥

द्विसप्तत्युतरद्विशत(272)ग्रन्थान् अयं निर्मितवान् । ब्रह्मसूत्रभाष्यम्, भगवद्गीताभाष्यं, ईशादि-दशोपनिशद्भाष्यमित्यादि भाष्यत्रयं तेषु परमप्रधानम् । लघुभाष्याणि पञ्च विद्यन्ते । आत्मभेदः , उपदेशसाहस्रि, मनीषापञ्चकम् इत्यादयः शताधिका: प्रकरणग्रन्थाः सन्ति । सौन्दर्यलहरी, शिवानन्दलहरी इत्यादि अनेके स्तोत्रग्रन्थाः च अस्य कर्तृत्वेन उपलभ्यन्ते ।

शङ्करस्य परीक्षणार्थं शिव: चण्डालवेषेण प्रत्यक्षीभूतः । तयोः वग्वादस्य परिणतफलेन जीवपरमात्मैक्यम् उदितम् । पुनः व्यासस्य अनुग्रहेण दिग्विजयाय षोडशवर्षाणि अधिकायुः लब्धम् । द्विग्विजयाय गच्छन्नवसरे प्राणत्यागं करोति कुमारिल्लभट्टः तं दृष्टवान् । तस्य उपदेशप्रकारं माहिष्मतीं नगरीम् आगत्य मण्डनमिश्रं वादे पराजयित्वा तं शिष्यत्वेन स्वीचकार । ततः मीमांसक: मण्डन: अद्वैतं स्वीकृत्य सुरेश्वराचार्यः इति नाम्ना प्रसिद्धः । तौलवब्रह्मण: वसति श्रीवलिग्रामे तत्र शङ्करः गतवान् । त्रयोदशवयस्क: बालः जडसदृशं तत्र उपविशति तं शङ्करः दृष्टवान् । शङ्करस्य प्रश्ने सः अनायासेन उत्तरं दत्तवान् । करामलकवत् वेदान्ततत्वं गृहीतबालं तृतीयतमशिष्यत्वेन स्वीकृतवान् । तोडकं चतुर्थशिष्यत्वेन स्वीकृतवान् ।

समाधौ प्रवेशात्पूर्वमेव आचार्यः अद्वैतसिद्धान्तस्य रहस्यं शिष्येभ्यः उपदिदेश । ”ब्रह्म सत्यं जगत् मिथ्या जीवो ब्रह्मैव नापरः” इति । आधुनिकप्रचारकः पुनप्रतिष्टापकाचार्यः भवति श्री-शङ्करः, अतः अद्वैतवेदान्तः शङ्करवेदान्तः इति च वदन्ति ।

★★★★★

# प्रौढशिक्षा

**कमालिनी स्वैन्**

शिक्षाशास्त्रिद्वितीयवर्षम्

शिक्षा जीवनस्य मूलभूता आवश्यकता वर्तते। अन्तर्निहितशक्तीनां बहिरानयनम् इति शिक्षा।सा शिक्षा मानवानाम् अज्ञानतमसो मोचयित्वा सुखसद्रूपज्योतिषा आलोकयति।कस्यापि देशस्य विकासाय मानवमात्रस्य सुखीजीवनाय समृद्धये च शिक्षायाः आवश्यकता निर्विवादिता सिद्ध्यति । तस्मात् सर्वेषां कृते शिक्षाग्रहणस्य अवसरः देयः। प्रौढानां कृते या शिक्षा सा प्रौढशिक्षा ।

उपक्रमः

भारते प्रौढशिक्षायाः परम्परा सभ्यतायाः उदयात् अनवरतप्रवर्तमाना वर्तते । यद्यपि परम्परेयं मौखिकी आसीत्,परम् एषा अस्माकं संस्कृतिम्, मूल्यानि, मर्यादाः ज्ञानञ्च अतिप्राचीनकालात् अक्षुर्ण्णमस्थापयत।

प्रौढशिक्षा मानवस्य मौलिकी आकाङ्क्षाम् अतिरिच्य सामाजिकानां सांस्कृतिकानां चापेक्षां पूरयितुं सविशेषम् अवदधाति । प्रतिदिनं जीवनं सुखकरं, सरसं, सुन्दरं, सन्तुलितं च विधातुं यत् ज्ञानम् अपेक्षते तस्य पूर्ति प्रौढशिक्षया जायते । प्रौढशिक्षायां व्यक्तिः सम्यक् जीवनरीत्या सामाजिकमूल्यैः नैतिकमूल्यैः राजनैतिकगतिविधिश्च परिचितो भवति । व्यक्तिः स्वाबलम्बनं समाजं कल्पितुं स्वीयम् उत्तरदायित्वं विजानीयात् । प्रौढशिक्षा एवं विधामेव शिक्षामुदिश्यति,यतो हि साम्प्रतिक युगे साक्षरता अतीव महत्त्वमादधाति ।

विषयः

प्रौढः वयोबृद्धः इति कथ्यते। परन्तु अधुना १५-४० आयुः पर्यन्तं जनाः प्रौढाः इति कथ्यन्ते । यद्यपि प्राचीनकाले मानवस्य औसतवयः प्रायः शतवर्षाणि आसीत् । तथापि प्रौढक्रमः पञ्चाशत् वर्षाधिकः इति मतः। शिक्षा प्रत्येकस्य आयुः वर्गस्य व्यक्तेः कृते दीपवत् प्रकाशं दातुं कल्प्यते ।

निरक्षराणाम् अशिक्षितानाम् अर्धसाक्षराणां विस्मृतानां वा प्रौढानां पुनः शिक्षणम् अपि प्रौढशिक्षा एव। इदानीम् अपि देशस्य प्रौढाः प्रायः अशिक्षिताः सन्ति । अतः ते उपहास-अपमान-शोषणादि विषयाणां पात्राः भवन्ति। यदि प्रौढाः शिक्षिताः भवन्ति तर्हि ते एतादृशीसमस्यानां सम्मुखं न भवन्ति ।

अस्माकं भारतदेशे प्रौढशिक्षायाः प्रारम्भः १९७८ वर्षे अक्टोबर् मासे २ दिनाङ्के अभवत् । प्रोढाः सामाजिकचेतनां जनयितुं प्रेरिताः आसन् । १५-४०आयुवर्गस्य निरक्षरप्रौढानां कृते अनौपचारिक-शिक्षायाः व्यवस्थापनं प्राधान्यं दत्तम् ।

प्रौढशिक्षायाः लाभार्थीभ्यः वर्णमालाज्ञानं पर्याप्तं नास्ति, परन्तु तेषां कृते, परिवारनियोजनं, वृक्षारोपणम्, पर्यावरणप्रदूषणं, स्वास्थ्यं-स्वच्छतां च सहकारीसंस्थाः इत्यादीनां जनकल्याणकार्यक्रमानाम् अपि सूचनाः प्राप्तव्याः, ग्रामीणवित्तकोषः(Gramya Bank) इत्यादयः एतत् क्रियते येन तेषां ब्याहरिकलभाः प्राप्यन्ते । प्रौढशिक्षायाः माध्यमेन समाजस्य विशालः वर्गः लाभं प्राप्तुं तस्य कार्यक्षमतां च वर्धयितुं शक्नोति। तथा च देशस्य उपयोगी नागरिकाः कर्तुं शक्यते। स्वतन्त्रभारते प्रौढशिक्षा १९४९ ख्रीष्टाब्दे केन्द्रीयशिक्षा-परामर्शदातृपरिषदि भारतसर्वकारस्य शिक्षामन्त्री अबुलकालाम आजाद महोदयः अकथयत् –"प्रौढशिक्षायाः लक्ष्यं वयस्कानां साक्षरीकरणमेव न स्यात्। प्रौढशिक्षा एव सा स्यात् या नागरिकानां लोकतन्त्रात्मके समाजे तेषाम् उत्तरदायित्वं निर्वोढुं साक्षरान् कुर्यात्। प्रौढशिक्षासमित्याः निम्नाङ्कितबिन्दुषु बलप्रदानम्:-

- प्रौढसाक्षरतायाः महत्त्वम् ।
- साक्षरताशिक्षकाणां प्रशिक्षणम् ।
- साक्षरतायै प्रौढानाम् अभिप्रेरणम् ।
- दृश्य-श्रव्यसाधनानां प्रयोगः ।
- सततशिक्षायै प्रयासः ।

**उपसंहारः**

एवं शिक्षा अस्माकं जीवनस्य आवश्यकता अस्ति। वयः च अस्य कृते बाधकं न भवेत्। अत एव तेषां जनानां कृते प्रौढशिक्षा सर्वकारेण आरब्धा। ये केनचित्कारणात् मध्ये अध्ययनं त्यजन्ति। एतत् अभियानं तेषां जनानां अपि लाभाय भवति, ये सर्वथा शिक्षिताः न सन्ति, न च तेषां अध्ययनार्थं समयः प्राप्यते। रात्रौ शाखासु गत्वा अपि ते शिक्षां ग्रहीतुं शक्नुवन्ति इति वक्तुं शक्नुमः। भारतस्य विशालजनसंख्यां दृष्ट्वा अत्र शिक्षिताः जनाः प्रौढशिक्षायां सक्रियरूपेण योगदानं दद्युः। अशिक्षितान् प्रौढशिक्षाकेन्द्रेषु आनयितुं वर्णमालाम् अवगन्तुं च सुलभं कार्यं न भवति। तत्कर्तव्यत्वं प्रत्येकस्य भारतीयस्य अनिवार्यम्।

★★★★★

## कलिङ्गानां लोकसंस्कृतिः

**तपन कुमार दाश**

शिक्षाशास्त्रिद्वितीयवर्षम्

ऐतिहासिकदृष्ट्या औपनिवेशिकयुगे दक्षिण-ओडिशादेशस्य लोकसंस्कृतिः स्वीयं विविधपक्षं व्यापकरूपेण, समीक्षात्मकरूपेण, संकुचितरूपेण च प्रकाशं जनयति। एतत् प्रकारस्य प्रथमः आच्छादितः कालः प्रशासनिकराजनैतिकदृष्ट्या सर्वाधिकमहत्त्वपूर्णः, स्वरूपात्मकः च अस्ति। अस्मिन् कालखण्डे आङ्ग्लानां ओडिशा-विजयः, प्रतिरोध-आन्दोलनम्, सामाजिक-धार्मिक-सुधार-आन्दोलनम्, पुनर्जागरणस्य, ओडिया-राष्ट्रवादस्य च वृद्धिः, सर्वेषां ओडियाभाषिणां क्षेत्राणाम् एकीकरणाय उत्कल-सङ्घ-आन्दोलनम्, भारतस्य स्वातन्त्र्यस्य कृते स्वातन्त्र्य-सङ्घर्षः च अभवत्।

आधुनिक-ओडिशायाः दक्षिणभागः सप्तजिल्लाभिः युक्तः यथा- गञ्जामः, गजपतिः, रायगडाः, कोरापुटः, नवरङ्गपुरः, मालकङ्गिरी, कन्धमालः च। अयं मूलतः प्राचीनस्य कलिंङ्गराज्यस्य भागः आसीत् यस्य स्थापना ९ शताब्द्यां ई.पू. पार्श्वे समुद्रेण, अन्येषु सर्वेषु पार्श्वेषु पर्वतशृङ्खलाभिः, सघनवनैः च आच्छादितः, असंख्याभिः च छिन्ना दक्षिण-ओडिशा, स्वकीयजीवनस्य, कलानां, साहित्यस्य च विशिष्टं प्रतिमानं विकसितवती अस्ति। तस्याः देवताः, मन्दिराणि, तस्याः सामाजिकसंरचना, तस्याः नृत्यम्, संगीतम्, उत्सवाः च सर्वे आकर्षकव्यक्तिगतरूपाः विकसिताः ये भारते समानवर्गेषु विशिष्टसत्तारूपेण चिह्निताः सन्ति।

दक्षिणओडिशा-नगरस्य लोकसांस्कृतिकविकासताम् आकारयितुम् अनेकानि कारकानि आरोप्यन्ते। अस्य प्रदेशस्य भौगोलिकस्थितिः एतादृशीं संस्कृतिं पालनार्थं प्रधानकारकं वर्तते। भारतस्य पूर्वतटस्य प्राकृतिकराजमार्गस्य परम्, उत्तरदक्षिणभारतयोः मध्ये स्थितः दक्षिणः ओडिशादेशः। अयम् उत्तरस्य आर्यसंस्कृतेः दक्षिणस्य द्रविडसंस्कृतेः च मध्ये सेतुवत् कार्यं करोति। एवम् अस्य क्षेत्रस्य सामाजिक-सांस्कृतिकजीवनं द्रविड़-आर्य-तत्त्वेभ्यः विकसितं एकं अत्यन्तं रोचकं मिश्रणं निर्माति यत् आदिवासीनां जीवनात् आनन्ददायक-आत्मसंग्रहणं भवति तथा च इस्लाम-ईसाई-धर्मस्य बाह्य-प्रभावैः भारतस्य अन्येषु भागेषु इव न तावत् प्रभावितम्।

दक्षिण-ओडिशा-देशस्य ग्राम्यपृष्ठभूमिः अन्यत् कारकम् आसीत्। मूलतः एषा ग्रामभूमिः अस्ति, यत्र प्रायः ३०,००० ग्रामाः लघुरूपाः बृहद्रूपाः वा सन्ति। ते लोककथापरम्पराः अद्यपर्यन्तं जीविताः अक्षुण्णाः च धारयन्ति। जनानां रूढिवादः अपरं कारकम् आसीत् यत् अस्मिन् प्रदेशे लोकसंस्कृतेः वृद्धिं जनयति स्म। दक्षिण-ओडिशा-देशस्य जनाः अतीव रूढिवादिनः, अन्धविश्वासिनः, अज्ञानिनः च आसन्। ते आधुनिकविचारानां पाश्चात्यप्रभावानाञ्च प्रति विमुखाः उदासीनाः च दीर्घकालं यावत् आसन्। पौराणिकपरम्पराः भागवता तुङ्गी-जनानाम् अस्तित्वं च दक्षिण-ओडिशा-देशस्य जनानां कृते लोकसंस्कृतेः सम्यक् पोषणार्थं उत्तम-प्रोत्साहनं अपि प्रदत्तवान्। दक्षिण-ओडिशा-देशस्य प्रायः सर्वेषु ग्रामेषु पुराणपाण्डः प्रत्येकं सायंकालेषु भागबता-तुङ्गिषु वा मन्दिरपरिसरेषु वा म्युनिफिसेण्ट्-व्यक्तिषु वा बरामदे वा पुराणपाठं करोति स्म।

जनानां सृजनात्मकशक्तिः दक्षिणओडिशा-देशस्य साहित्यिकपृष्ठभूमिः च अन्यत् कारकम् आसीत् येन दक्षिण-ओडिशा-देशस्य लोकसंस्कृतिः प्रमुखा अभवत् । ओडिया साहित्यस्य प्रसिद्ध कवि, यथा कबिसाम्राट् उपेन्द्र भंञ्ज कबिसूर्य बलदेव रथ, गोपालकृष्ण पटनायक, त्रिपति गायक रत्न, हनुमान रायगुरु, भक्त रामदास, पद्मनाव नारायण देव(परालाखेमुण्डीस्य राजा), बनामली पटनायक, कबिचन्द्र रघुनाथ परिछा, किशोर चंद्र राजेन्द्रराजा गोस्वामी कृष्णचन्द्र दास, रघुनाथ सिंह देव, कृष्णसिंह(धाराकोटस्य राजा), किशोर चन्द्र हरिश्चन्दन जगदेव(सुरंगीस्य राजा), रामचन्द्र सुर देव(तरलास्य राजा)।

श्रीनिवास राजमणि(मंजूष राजा), कृष्णमोहन पटनायक, मोहन गोस्वामी, विक्रम देव वर्मा (जेयपुर के राजा), दीनाबंधु हरिश्चंदन, सुरंगी चंद्र चूडामणि हरिश्चंदनः कबिसूर्यनगरस्य तारिणी चरण पत्र एवं ब्राह्मणस्य भरत चौधरी; तेन्तुआपदस्य केसबा दासः; मंगलापुरस्य कान्हु दास; करखण्डीस्य नरसिंह मठ; ओडिशा-नगरस्य अस्मिन् प्रदेशे तन्हारा(पिताला)-नगरस्य पीताम्बरदासः जन्म प्राप्नोत् येन ओडिस्सी-चम्पु-छण्डा-पुराण-पुराण-ओडिशा-लोकगीतानां इतिहासे पुनर्जागरणं निर्मितम्।

अस्य प्रदेशस्य अनेकग्रामेषु अखादानां अस्तित्वेन लोकनृत्यसङ्गीतस्य, गीतानां च परम्परां निर्वाहयितुम् बहु साहाय्यं कृतम् । अद्यत्वे अपि अखादासु संरक्षितानि वाद्ययन्त्राणि, उपकरणानि च स्थानीयतया नियुक्तैः गुरुभिः आयोजितस्य पूर्वाभ्यासस्य स्थलस्य कार्यं कुर्वन्ति।

अस्य प्रदेशस्य सौन्दर्यं, उपहारं च तस्याः स्वकीयां आकर्षकं विशिष्टं च संस्कृतिं विकसितुं बहु योगदानं दत्तवती । उच्छ्रितपर्वतैः, चटपटीयुक्तैः उपत्यकैः, रमणीयैः हरितैः वनैः, गुञ्जमानैः धाराभिः, जलप्रपातैः, गायनपक्षिणां मधुरध्वनिभिः, लुठन्तैः नीलैः सरोवरैः सह सुवर्णसमुद्रतटः, चिलिकसरोवरस्य आश्चर्यजनकं आकर्षणं, सुरम्यः परिदृश्यः, समृद्धः आदिवासी च दुर्लभैः दृश्यसौन्दर्यैः सम्पन्नः ओडिशा-नगरस्य अस्य भागस्य जीवनं प्रकृतिप्रेमिणां यथार्थं स्वर्गम् अस्ति । विशुद्धदेशीयसंस्कृतेः एतेषां तत्त्वानां लोककथापरम्पराणां जीवितं जीवन्तं च निर्वाहयितुम् अत्यन्तं योगदानं आसीत्।

दक्षिण-ओडिशा-देशस्य राजानां, जमीदारानाञ्च राजनैतिक-संरक्षणम् अन्यत् कारकम् आसीत् यत् लोक-कथा-परम्पराणां जीवन्तं वृद्धौ साहाय्यं कृतवान्। लोकनृत्यानां संरक्षणं सामान्यतया राजैः, महाराजैः, जमीदारैः च तथा च समाजस्य सम्पन्नवर्गैः शताब्दशः यावत् आसीत्। दक्षिणओडिशादेशस्य अधिकांशः जमीन्दरः न केवलं लोकनृत्यानां नाटकानां च संरक्षणं करोति स्म अपितु स्वप्रासादरङ्गालयेषु रचयति स्म, मञ्चयति स्म च

केवलं राजनैतिकसंरक्षणेन सांस्कृतिकभवनस्य निर्माणं कर्तुं न शक्यते, जनानां आध्यात्मिकः विश्वासः किञ्चित् उच्चतरं उदात्ततरं च भवति। दक्षिण ओडिशा अनेकेषां पंथानाम्, पंथानाम्, धार्मिकसन्तानाम् च धुरी आसीत्। अत्र जगन्नाथमन्दिराणि, सकरी च सर्वाधिकसंख्या अस्ति।

ओडिशायाः पिठा तथा अनेक साधु संथां जनयति यथा अरखिता दास, राम दास, केशव दास, पीताम्बर दास, राजा लक्ष्मी नारायण देव, राजा कृष्णसिंह, नरसिंह मठा आदि।

दक्षिण ओडिशा अधिकं पश्चात्तापी ग्रामीणं च अस्ति ततः ओडिशा सम्यक्। अयं प्रधानतया कृषिप्रदेशः अस्ति। ओडिया-जनाः तेषु ग्रामेषु निवसन्ति येषु समीपस्थेषु राज्येषु स्थितानां ग्रामेभ्यः प्रतिरूपं रोचकरूपेण भिन्नम् आसीत्। सामान्यतया स्कन्धं स्कन्धं स्थितौ फूत्कारगृहपङ्क्तिद्वयं भवति, यस्य मध्ये वीथिः धावति, एकस्मिन् अन्तरे मन्दिरं टङ्कं च, अपरस्मिन् अन्तरे भागवतघरं वा ग्रामः अखडा वा भवति ग्रामगृहाणि अनिवार्यतया केनचित् प्रकारेण भित्तिचित्रैः अलङ्कृतानि सन्ति, पृष्ठभागे छायायुक्तं उद्यानं च भवति। जगन्नाथदासस्य भागवतस्य ग्रामपुरोहितस्य च अद्यापि ग्रामस्य औसतओडियायाः सामाजिकव्यक्तिगतजीवने पर्याप्तः प्रभावः अस्ति अद्यत्वेऽपि जगन्नाथदासस्य भागवतस्य नित्यं पाठः भवति। सामान्यभागवतगृहे वा अधिकांशग्रामेषु हिन्दुकुटुम्बेषु वा।

भारतस्य लोकसंस्कृतौ दक्षिण-ओडिशा-देशस्य प्रमुखं स्थानं वर्तते। सामान्यतया दक्षिण ओडिशा, विशेषतया च गञ्जाम-मण्डलं ओडिशा-देशस्य लोकनृत्यानां पालना इति गण्यते। भौगोलिकं स्थानं, स्थलाकृतिकविशेषता, धार्मिकसाहित्यिकपृष्ठभूमिः, प्रकृतेः सौन्दर्यं, उदारता च सर्वेषां संयुक्तरूपेण लोकसंस्कृतेः अद्वितीयप्रतिमानस्य पराकाष्ठायां महत्त्वपूर्णं योगदानं कृतम् अस्ति

लोकनृत्यस्य नाट्यपरम्परायाः च समृद्ध्या दक्षिण ओडिशा सम्भवतः केरलस्य पार्श्वे अस्ति। दक्षिण ओडिशादेशस्य लोकनृत्यसङ्गीतं, लोकगीतानि, लोककथाः, लोकप्रत्ययाः, लोकौषधानि, चिकित्साविधयः, लोकोत्सवः, लोककला, शिल्पानि च एतावन्तः सजीवाः रङ्गिणः च आसन् यत् ते मनः मोहितुं शक्नुवन्ति स्म सर्वे कलाप्रेमिणः जनाः। अस्य प्रदेशस्य लोकगीतानि, लोककथाः, लोकपहेलिकाः, सुभाषितानि, गद्यगीतानि च न केवलं स्वरूपेण रचनायाश्च सरलाः आसन् अपितु मानवीयमूल्यानां गहनसन्देशमपि वहन्ति। किन्तु, अतीव खेदस्य विषयः यत् लोकनृत्यनाट्यगृहाणि, लोकगीतानि कथा च, लोककलाशिल्पानि

ग्रामीणजनानाम् मनोरञ्जनस्य, आजीविकायाः च महान् स्रोतः, नैतिकता, सत्यता, दुष्टशक्तयोः उपरि धर्मिणः विजयः, समाजे सहकार्यं, सामञ्जस्यं च क्षयस्य, मृत्युस्य च मार्गे सन्ति इति सन्देशानां प्रसारणे अपि साहाय्यं कृतवान् अतः एतासां लोककथापरम्पराणां पुनरुत्थानाय, तान् अभिलेखयितुम्, संरक्षितुं च आवश्यकाः पदानि गृहीतुं शक्यन्ते, यावान् सर्वकारेण वा निजी-उपन्यासेन वा वंशजानां कृते डीवीडी-ई-पुस्तकालय-रूपेण वा। अन्यथा समाजस्य शताब्दयोः परम्परा, धनं च कतिपयेषु दशकेषु विलुप्तं भविष्यति।

ओडिशा-नगरस्य लोककथाविषये संशोधनानि अतीव दुर्लभानि सन्ति। अस्मिन् क्षेत्रे व्यवस्थितसंशोधनं नास्ति। ओडिशा-नगरस्य लोकसंस्कृतौ विशेषतः दक्षिणप्रदेशस्य लोकसंस्कृतौ अद्यापि पर्याप्तं प्रकाशं न क्षिप्तं इति अत्यन्तं दुर्भाग्यम्। जॉन बीम्स्, एल्विन् वेरियर, यू.एन.दत्तगुप्त इत्यादीनां कृतीषु लोककथानां विषये केचन क्षणिकसन्दर्भाः सन्ति।राघवानन्ददासः, गोपालचन्द्रप्रहारजः, नीलमणिविद्यारत्नः, अपर्णपाण्डा, भगवनहोट्टा इत्यादयः विद्वांसः लोकस्य क्षणमात्रं सन्दर्भं दत्तवन्तः संस्कृति ओडिशा। अद्यापि चक्रधरमोहापात्रः, कुञ्जबिहारीदशः, श्यामसुन्दरमोहापात्रः, हेमन्तकुमारदशः,धीरेन् पटनायक इत्यादयः अन्ये कतिचन विद्वांसः सन्ति, ये ओडियाभाषायां लिखितेषु विद्वान्ग्रन्थेषु लोकसंस्कृतेः कतिपयान् पक्षान् आनयन्ति।

★★★★★

## दर्शनसारसंग्रहः

**अश्वती P.G.**

शिक्षाशास्त्रिद्वितीयवर्षम्

सनातनधर्मः स इति विषयमधिकृत्य चर्च्यते । सनातनं नाम नित्यः त्रैकालिकाबाध्यः, भुत-भावि-वर्तमानकालेषु नित्यत्वेन तिष्ठति इति । धृञ् धारणे इति धातुतः धर्मशब्दस्य निष्पत्तिः । धर्मः आस्य पूण्याचरणे स्वभावोपमयोः क्रतौ इति मेदिनी । सनातनधर्ममधिकृत्य वक्तव्यम् चेत् प्रथमं तावत् सामान्येन दर्शनमधिकृत्य विशिष्य सांख्ययोगचिन्तनं च करणीयम् ।

**दर्शनानां सामान्य परिचयः -**

दृश्यते अनेन इति दर्शनम् अर्थात् यद्द्वारा यथार्थतत्त्वस्य दर्शनं भवति वास्तविकसत्यस्य च ज्ञानं भवति तद् दर्शनमिति कथ्यते । आदिकालादेव अस्मज्जीवने दर्शनस्य महत्त्वपूर्णं स्थानं वर्तते । भारतीयसंस्कारस्य आधारशिला वेदमन्त्राः दर्शनानि पुराणेतिहासादीनि इति सुविदितमेव ऋषीणां विचारसरणिरेव दर्शनानि । दर्शनम् इति पदस्य निष्पत्तिः दशिर् प्रक्षेपण इति धातुतः अभवत् । सन्दर्शयति, पश्यति , जानाति इत्यर्थः प्रायः । वस्तुतः जीवनं प्रति मनुष्यस्य दृष्टिः हि दर्शनं वर्तते यच्च प्रति व्यक्तिं विद्यते। मनुष्यः स्वीयं परितः विद्यमानान् पदार्थान् अवगन्तुं सर्वदैव यतमानो भवति तदवगमनसम्बन्धिनी च जिज्ञासा तन्मनसि सदैव उत्पद्यते। एततेव न अपि तु एतेषां पदार्थानां तेन साकं कीदृशः सम्बन्धो वर्तते? अयञ्च सम्बन्धः केन निरूप्यते ? एतेषां पदार्थानां ज्ञानं कथं जायते? तदर्थं कानि साधनानि वर्तन्ते ? सृष्टेः कर्ता कः ? मानवस्य जीवनलक्ष्यं किम्? लक्ष्यप्राप्तेः साधनानि कानि? इत्यादयः बह्व्यः जिज्ञासाः वर्तन्ते याः मनुष्यं चिन्तनार्थं प्रेरयन्ति। सामान्यतः आभ्यः एव जिज्ञासाभ्यः दर्शनशास्त्रस्य आविर्भावो मन्यते। आसां जिज्ञासानां सामाधाने कैश्चित् वेदानामालोके स्वीयविचाराः प्रतिपादिताः कैश्चिच्च तद्भिन्नाः विचाराः प्रतिपादिताः। दर्शनानां मध्ये आस्तिकदर्शनानि नास्तिकदर्शनानि च अस्ति। वेदप्रामाण्यमङ्गीकृत्य प्रवृत्तानिदर्शनानि आस्तिकदर्शनानि । अन्यथा प्रवृत्तानि दर्शनानि नास्तिकदर्शनानि । प्रसिद्धानि आस्तिकदर्शनानि सांख्य , योग ,न्याय,वैशेषिक, पूर्वमीमांसा,उत्तरमीमांसा चेति । नास्तिकानां मध्ये चार्वाक,जैन,बौद्ध दर्शनानि एतान्यतिरिच्य अन्यानि सहस्राधिकानि दर्शनानि सन्ति इति श्रूयते ।

**योगदर्शनमधिकृत्य परिचयः**

सश्वरसाख्यमियपरनाम्नः अपि योगः। कपिलमहर्षिप्रणीत सांख्यदर्शने - " मूलप्रकृतिरविकृतिः महताद्याप्रकृतिविकृतयः सप्त । षोडशकस्तुविकारो न प्रकृति न विकृति पुरुषः " । इति महतादीनि पञ्चविंशति तत्वयुक्तानि । एवं पञ्चविंशति तत्त्वानां साकं समाधिदशासम्पन्न ईश्वरस्यापि अङ्गीकारः योगदर्शने स्वीकृत इत्यतः योगदर्शनस्य स्वेश्वसांख्यमिति नाम संजातम्। वेदकालादारभ्य योगशास्त्रस्य प्रचारः आसीदिति प्रमाणीकरोति श्वेताश्वतरोपनिषदि द्वितीयाध्याये षष्टं मन्त्रम्।

"आग्निर्यत्राभिमथ्यते वायुर्यत्राधिरूध्यते । सोमोयत्रातिरिच्यते तत्र संजायते मनः।"

यत्र ज्ञानात्मकानो ध्यानेन मननं कृत्वा स्थाप्यते । यत्र प्राणसंयमेन वायुनिरोधं करोति। यत्र सोमरस्य स्यन्तनं भवति। इत्युक्ते आनन्दातिरेकत्वं ब्रह्मकारकं संजायते तत्र संसिद्धो मनः भवति । तद्वदेव ध्यानवेलानूभवस्यापि यथा तथा वर्णनं श्वताश्वेतरे रमणीयरीत्या प्रतिपादितम्। तत्रैव एकादशतमे मन्त्रे - नीवार धूमकार्निलानलानम्। रवसोतविद्युत्स्पडिकइइनाम् । एतानि पुरसःराणि ब्रह्मण्याभव्यक्तिकराणि योगे ।

ध्यानप्रारंभवेलायां तुषारः ,धूमः, सूर्यः, अग्निः विद्युत्, चन्द्रः, इत्यादीनां रूपाणि ब्रह्मण्याभव्यक्तिकराणि पुरागामिरूपेण भवन्ति । आत्मवान् यात्रायां योगसाधनायाः आवश्यकता सर्वैरपि दार्शनिकसम्प्रदायैः स्वीकृता एव। योगशास्त्रस्य प्रवर्तकः महर्षिः पतञ्जलिः वर्तते। पतञ्जलेः पातञ्जलयोगसूत्रे योगदर्शनं वर्णितं वर्तते।पातञ्जलयोगसूत्रे चत्वारः पादाः क्रमशः समाधिपादः ,साधनापादः विभूतिपादः कैवल्यपादाश्च वर्तन्ते। समाधिपादे रूपभेदादीनां चित्तवृत्तीनाञ्च वर्णनं विद्यते। द्वितीये साधनापादे क्रियायोगानां क्लेशादीनां तन्निवारणोपायादीनाञ्च वर्णनं विद्यते। तृतीये विभूतिपादे योगस्य अन्तरङ्गयोगशक्त्युसांख्यदर्शनः अपि सांख्यप्रवचनसूत्रे रागोपहतिर्ध्यानं रजोगुणस्य नाशः ध्यानेन भवतीति। वृत्तिनिरोधात् तत्सिद्धिः चित्तवृत्तिनिरोधेनैव ध्यानसिद्धिः इति। सांख्यदर्शनस्य प्रवर्तकः महर्षिः कपिलः वर्तते। सांख्यदर्शने पञ्चविंशतिः तत्त्वानि प्रतिपादितानि वर्तन्ते। एषु प्रकृतिः पुरुषश्चेति मूलतत्वद्वयं वर्तते। अनयोः प्रकृतिः जडरूपा पुरुषश्च चैतन्यस्वरूपो वर्तते। प्रकृतिश्च सत्वरजस्तमो गुणानां साम्यावस्था मता वर्तते। पुरुषश्च स्वतन्त्रः शरीरेन्द्रियबुद्ध्यहङ्कारादिभिन्नो वर्तते। प्रकृतेः बुद्धिः, महतो अहङ्कारः अहङ्कारात् पञ्च ज्ञानेन्द्रियाणि,पञ्च कर्मेन्द्रियाणि, पञ्च तन्मात्राणि मनश्च , पुनश्च तन्मात्रेभ्यः पञ्च महाभूतानि उत्पन्नानि इति । सांख्यदर्शनस्य सत्कारवादः प्रसिद्धो वर्तते। एतत्सिद्ध्यये पञ्च युक्तयः प्रतिपादिताः वर्तन्ते।त्पन्नविभूतीनाञ्च वर्णनं विद्यते। चतुर्थे कैवल्यपादे समाधिसिद्धेः कैवल्यादीनाञ्च वर्णनं विद्यते।

**यम-धर्मनियमपरिचयः**

योगसूत्राणि- समाधिपादम् साधनापादम् , विभूतिपादम् , कैवल्यपादम् इति चतुर्था विभाज्यन्ते । तत्र द्वितीय अध्यायस्य प्रथमं सूत्रं भवति - तपः स्वाध्यायेश्वरप्रणिधानानि क्रियायोगः इति। १. ब्रह्माचर्यं, सत्यं, मौनं,स्वधर्मानुष्ठानम्,शीतोष्णद्वन्दसहिष्णुत्वम्,मिताहारादयः च भवति तपः। २. वेदाध्ययनं भवति स्वाध्यायः।३.ईश्वरप्राणिधानं नाम ईश्वरविषयेच्छा तथा विश्वासः एतानि त्रीणि मिलित्वा क्रियायोगः इत्युच्यते । द्वितीयाध्याये एकत्रिंशत् सूत्रे यमनियमासनप्राणायामप्रत्याहारधारणाध्यनसमाधयः अष्टावंगानि इत्येतानि अष्टांगयोगानि प्रसिद्धानि योगशास्त्रे । अत्र प्राधान्येन यमनियममधिकृत्य अथवा धर्मनियममधिकृत्य उच्यते।यमनियमेषु -यम ,नियम,आसन्, प्राणायाम, प्रत्याहार इति प्रथमपञ्चकं बहिरङ्गसाधनं भवति। धारण, समाधयः अन्तरङ्गसाधनं च भवति। एतानि सूत्ररूपेण यथाक्रमं साधनापादे विभूतिपादे च व्याख्यातं आचार्येण ।

१. यमो नाम -अहिंसासत्यमस्तेयंब्रह्मचर्यःअपरिग्रहा यमः इति पञ्च विधाः प्रोच्यते।

२.अहिंसा नाम प्राणवियोगानुकूलव्यापारः हिंसा ।तद्विपरितः अहिंसा । अहिंसा परमो धर्मः।

३ .सत्यम् - किमिति चेत् वाचा मनसा च यत्सत् वचनं तथा सत्कर्म तदेव सत्यमिति यदुच्यते "सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यमप्रियम्"।

४. अस्तेयं नाम परद्रव्यापहरणं स्तेयम्।

५ ब्रह्मचर्यम् अर्थात् उपस्थेन्दियनियमनं भवति

उपस्था-वाक्-पाणि-पाद-पायुरिति-कर्मेन्द्रियाणां मध्ये पञ्चमो भविति ।उत्साहेन कत्वात् उपस्था इति। अस्माकं शरीरे अत्यन्तोत्साहजनकमिन्दियं जननेन्द्रियमेव । तस्मात् जननेन्दियनियन्त्रणमेव ब्रह्मचर्यमिति सामान्यविवक्षा । ब्रह्मचर्यत्वादेव मोक्षो भवति ।

★★★★★

## भारतीयज्ञानपरम्परायां संस्कृतस्य योगदानम्

**प्रद्युम्नकुमारः**
शिक्षाशास्त्रिद्वितीयवर्षम्

संस्कृतभाषा विश्वस्य परिष्कृतभाषा प्राचीनतमा भाषा अस्ति । निश्चयमेव एषः सम्पूर्णविश्वस्य वैदिकतदन्यभाषासु च श्रेष्ठा अस्ति। धार्मिकदृष्ट्या पश्यामः चेत् इयं भाषा देववाणी, गीर्वाणी, सुरवाणी सुरभाषापि आसीत् । यस्मिन् समये विश्वस्य अन्यदेशे जनाः सांकेतिकभाषया वार्तालापं अकुर्वन् । तस्मिन् समये भारते संस्कृतभाषया ब्रह्मज्ञानस्य प्रचार-प्रसारम् च कुर्वन्तः आसन् । संस्कृतप्रयोगस्य क्षेेत्रं अत्यधिकं बृहद् आसीत्। अस्याः भाषायाः वर्णनम् प्राचीनग्रन्थेषु अपि आसीत् । आधुनिकपरम्परायाम् इव पुरातनपरम्परायाम् संस्कृतस्य बहु योगदानम् वर्तते।

शास्त्रे उक्तं यत् -

***भारतस्य प्रतिष्ठेद्वे संस्कृतं संस्कृतिः तथा।***

भारतस्य प्रतिष्ठाद्वयं वर्तते एकं संस्कृतम् अपरा संस्कृतिः । संस्कृतं भारतस्य एका शास्त्रीयभाषा अस्ति । अस्याः भाषायाः मुनीनां द्वारा गभीर- परिश्रमेण अध्ययनेनैव पश्चात् इयं भाषा संसारेषु आगता । प्राचीनकाले भारते शिक्षाकार्यं गुरुकुलपद्धत्यां भवति स्म । सर्वे गुरुकुलं गत्वा पठन-पाठनम् कुर्वन्तः आसन् । तत्र ब्रह्मचर्यगृहस्थवानप्रस्थसन्यासाश्रमधर्माणां पालनम् अकुर्वन् ।

तस्मिन् समयेपि पाठ्यक्रमः आसीत् । तेन माध्यमेन संस्कृतशिक्षा तथा च अन्यविषयाणाम् यथा- दर्शनम्, ज्योतिषम्, व्याकरणम्, इत्यादिविषयाणाम् शिक्षा संस्कृतेनैव दीयते । संस्कृतं भारतस्य संस्कृत्याः प्राणस्वरूपं अस्ति । विश्वस्य सर्वासु भाषासु प्राचीनतमा भाषा तथा सर्वमान्यरूपेण इयं गृह्यमाणा आसीत् । सम्पूर्णे वैदिकवाङ्मयेः रामायणम्, महाभारतम्, पुराणम्, स्मृतिग्रन्थः, दर्शनम्, धर्मग्रन्थः, महाकाव्यम्, नाटकम्, गद्यकाव्यम्, गीतिकाव्यम्, व्याकरणम् तथा ज्योतिषम् इति सर्वं संस्कृतभाषायाम् एव उपलब्धाः । इयं संस्कृत भारतीयसभ्यतायाः भारतीय संस्कृत्याश्च धरोहरस्य रक्षणं करोति ।

गुप्तकाले संस्कृतसाहित्यस्य अप्रतिमः विकासः अभवत् । अस्मिन् काले संस्कृतस्य प्रयोगः शिलालेखे, स्तम्भलेखे इत्यादि स्थानेषु प्रयोगं अकुर्वन्। अस्मिन्नेव काले अस्य कालस्य महान्तः कवयः साहित्यकाराश्च स्वस्य रचनया अस्याः गौरवं अभिवर्धितवन्तः ।

यथा-

कालिदासः – ऋतुसंहारम्, कुमारसम्भवम्, रघुवंशम्, इत्यादि पुस्तकम् लिखितवान्। भारविः– किरातार्जुनीयम् लिखितवान् ।अयं कालः संस्कृतस्य कृते स्वर्णकालः आसीत् । तदनन्तरं आधुनिकेकाले पश्यामः चेत्, प्राचीनसमये यानि गुरुकुलानि आसन् तानि गुरुकुलानि अधुना विद्यालयरूपेण प्रचल्यमानानि सन्ति । तदनन्तरं सा गुरुकुलपरंपरा शनैः शनैः आधुनिककाले विद्यालयरूपेण प्रवर्तिता अभवत् । यस्मिन् संस्कृतस्य बहुमहत्वपूर्णयोगदानं वरीवर्तते । संस्कृतं स्वस्य नैतिकतासामाजिकताप्रकाराणाम् आयोजनानाम् संरक्षणं संवर्धनं च करोति । शास्त्रे उक्तं यत् -

**संस्कृतिः संस्कृताश्रिता ॥**

या संस्कृतिः अस्ति सा संस्कृतस्य उपरि आश्रिता अस्ति । एषा राष्ट्रीयैकतायाः, नैतिकतायाः अखण्डतायाः, आध्यात्मिकतायाः महत्त्वं निरूपयति ।

भारतीयसंस्कृतेः संरक्षणं संवर्धनं च कर्तुं भारतीयज्ञानपरंपरायाः ज्ञानं परमम् आवश्यकमं वर्तते । अस्माकं देशस्य इदं कटुसत्यम् अस्ति यत् संस्कृतभाषा किंचिदेव ग्रामेषु सीमिता वर्तते । संस्कृतं सम्पूर्णविश्वस्य सर्वासां भाषानां जननी वर्तते । संस्कृतं भारतीयसंस्कृतिसभ्यतायाः संवाहिकाभाषा अस्ति ।

अस्मिन् काले महती चिन्ता वर्तते यत् जनाः अस्य उपरि अवधानं न इच्छन्ति, परन्तु नूतनशिक्षानीतेः अस्याः उपरि अपि बहु कार्यं भविष्यति वयं तु जानीमः । इयं वैज्ञानिकी भाषा वर्तते । अतः अस्माकं दायित्वं अस्ति यत् अस्याः कीर्तिं पुनः संस्थापयामः भारते न अपितु सम्पूर्ण विश्वे ।

★★★★★

## वृक्षायुर्वेदस्य महत्वम्

**अमृता पि एस्**

शिक्षाशास्त्रिद्वितीयवर्षम्

**उपोद्घातः**

आयुषः वेदः भवति आयुर्वेदः। जीवनसम्बन्धिः वेदः इति अस्य पदस्यार्थः। न केवलं मनुष्याणां चिकित्साविषये अपि च सकलजीवजालानां चिकित्साविषये आयुर्वेदशास्त्रं प्रबलम् आसीत्। वेदकालतः वृक्षायुर्वेदचिकित्सा प्रयोजनकरं भवति । फलसमृद्धिः, गुणसंवर्धनम्, कीडाणूनां निर्मार्जनम्, कृषिकार्ये रासप्रयोगं विना जैवरीतिः इत्येवं विषयाः अत्र परामृश्यन्ते। सुरपालः नाम पण्डित प्रवर एव अस्य ग्रन्थस्य कर्ता । सहस्रवर्षेभ्यः पूर्वं अद्यतन ओडीषायाः भीम्पालराज्ञः राजसभायां आयुर्वेद चिकित्सकः आसीत्। पुरातनकृषिशास्त्रं भवति वृक्षायुर्वेदम्। मुनिभिः प्रणीतं शास्त्रमधिकृत्य तेषां आशयान् समाकलय्य सुरपालः वृक्षायुर्वेदं व्यरचयत् इति भवति विकासः। तरुमहिमा, निवसासन्नतरुशुभलक्षणानि, भूमिनिरूपणं, बीजोल्पत्तिविधिः, वपनविधिः, कुणपजलं, पोषणं, रोगज्ञानं, चिकित्सा, विचित्रं, उपवनक्रीया, कूपभूमिपरीक्षा, अन्नादिनिष्पत्तिः इत्याद्याः विषयाः अस्मिन् ग्रन्थे प्रतिपाद्यन्ते ।

**विषयवर्णना**

वृक्षायुर्वेदम् सुरपालस्य परिचयः वृक्षाणां सर्वविधसंवर्द्धनाय परिपुष्ट्यर्थञ्च भारतीयपारम्परिकविज्ञानरूपेण वृक्षायुर्वेदनाम्ना यत् विज्ञानं विविधेषु ग्रन्थेषु निहितं तदधुना परिवेशम् प्रति वृक्षाणां महत्त्वं प्रति भारतीयप्राचीनमनीषिणाम् कीदृशी चिन्तासीत् तदेव प्रतिपादयति, वृक्षाणां रोपणाय, वर्धनाय, परिपुष्ट्यर्थं, रोगाणां निरुपणेन तेषामुपशान्तये तथा विहारोपवन निर्माण विधानमधिकृत्य यत् विज्ञानं तस्य एका परम्परा वैदिककालादारभ्य संस्कृतभाषया विरचितषु ग्रन्थेषु तत्र उपलभ्यते।

**सुरपालस्य परिचयः**

त्रिंशत् संख्यकाः श्लोकाः सन्ति यत्र अन्तिमश्लोके सुरपालेनोक्तम् -

इति धरणिरुहायुर्वेदमुद्यत्प्रताप प्रचरनरपति श्री भीम पालन्तरङ्गः,

अकुरुत सुरपालः कौतुकात् सिद्धयोगै जगदमलयशः श्रीवैदविद्या वरेण्यः। (श्लोक - ३२५)

अर्थात् वैद्यविद्यावरेण्यः सुरपालः श्री भीमपालनरपतेः अन्तरङ्गम् आसीत् । परमस्य भूपतेः भीमपालस्य परिचयः सम्यक् नोपलभ्यते । उत्तरप्रदेशस्य राष्ट्रकूटवंशोद्भवः नरपतिः आसीत् भीमपालः, यस्य समयः ख्रीष्टीयद्वादशशताब्धिः आसीदिति केषाञ्जन विदुषां मतम् । स्थूलतः सुरपालेन वराहमिहिरस्य कतिपय श्लोकाः वृक्षायुर्वेदग्रन्थे समुद्धृताः, शार्ङ्गधरपद्धतेः समयं यावत् सुरपालः प्रसिद्धः अभवत् । अतः तस्य समयः १००० ख्रीष्टाब्दतः १२५० ख्रीष्टाब्दमध्ये कस्मिंश्चित् समये आसीदिति वक्तुं शक्यते। वृक्षायूर्वेदविषये ग्रन्थकर्तुः सुरपालस्य अभिव्यनक्तिः शास्त्राणि तावद् अवलोक्य मया मुनीनाम्अर्थः स एव गदितः पश्मात्य युक्तया । एवं विलोक्य लिखितं च विचारयन्तः सन्तः स्वभाव सरला मुदम् आप्नुवन्तु । मया मुनीनां शास्त्राणि तावद् अवलोक्य परमात्ययुक्तया स एव अर्थः गदितः। स्वभावसरलाः सन्तः एवं विलोक्य लिखितमिति विचारयन्तः मुदम् आप्नुवन्त। वृक्षायुर्वेदविषये पूर्वसूरीणां शास्त्राण्यालोच्यैव सुरपालः वृक्षायुर्वेदं सज्जननामाननदविधानाय प्रस्तौति, वृक्षायुर्वेद-विज्ञानस्य एका परम्परा भारतवर्षे आसीत्, एतस्मिन् विषये प्राचीनाचार्याणां ग्रन्थानाधारीकृत्यैव सुरपालः वृक्षायुर्वेदं रचितवान् ।

**वृक्षायुर्वेदस्य विषयः**

सुरपालस्य वृक्षायुर्वेदे त्रयोदशाध्यायाः सन्ति। तेषु वृक्षाणां अभिवृध्यर्थं बहुविधानि विधानानि उल्लिखतानि।

प्रथमाध्यायः - तरुमहिमा आलोच्यते।

द्वितीयाध्यायः - निवासासन्नतरुं शुभाशुभलक्षणानि निर्दिष्टानि।

तृतीयाध्यायः - वृक्षारोपणाय भूमिनिरूपणम् आलोच्यते।

चतुथाध्यायः -बीजोत्पत्तिविधिः वर्ण्यते।

सप्तमाध्यायः - तरूणां पोषणं कथं विधीयते तद् वर्तते।

अष्टामाध्यायः - तरुणां रोगलक्षणानि निदिश्यन्ते।

नवमाध्यायः -रोगाणां चिकित्सा व्यवस्था निदिश्यते।

दशमाध्यायः - तरूणां तत्कालफलता, वियोनिजननम् ,वामनीकरणादि - वैचित्र्यं वर्ण्यते।

एकादशाध्यायः - उपवननिर्माणप्रक्रिया वर्ण्यते।

द्वादशाध्यायः - कूपखननार्थ भूमिपरीक्षाप्रकारः निर्दिश्यते।

त्रयोदाशाध्यायः - वृक्षाणां कीदृशरोपणेन अन्नदिनिष्पत्तिः कथं साधितास्ति इति वर्ण्यते।

**वृक्षायुर्वेदस्य कालिकप्रसक्तिः**

चरकसुश्रुतादि-आयुर्वेदग्रन्थेषु मनुष्यस्य स्वास्थ्यचर्या, आयुर्वर्धनोपायः रोगाणां प्रतुकारविधनानि च उपलभ्यन्ते तथैव वृक्षायुर्वेदग्रन्थे वृक्षस्य प्ररोहणाय, रोगणिरूपणाय, रोगाणाम् निराकरणाय, यथाकालफलधारणाय, वामनीकरणाय वियोनिजनानाय, वृक्षाणां महत्वप्रतिपादनाय, निवासासन्नतरुशुभाशुभलक्षणया, बीजवपनविधिनिरूपणाय विविधानि तत्त्वानि परम्परानुसारेण विज्ञानभित्त्या चालोच्यन्ते । विष्णुधर्मोत्तरपुराणे, वराहामिहिरस्य बृहत्संहितायाम् कौटिल्यस्यार्थशास्त्रे, अग्निपुराणे वृक्षायुर्वेदमधिकृत्य तथा शार्ङ्गधरपद्धत्यामुपवन-विनोदमधिकृत्य वहूपादेयतत्त्वानि समुपलभ्यन्ते, अस्मिन् विषये सुरपालविरचितः वृक्षायुर्वेदः एव सर्वमान्यः, सुसम्बन्धप्रामाणिक ग्रन्थरूपेण प्रसिद्धं लभते। परत्रेह च कल्यानविधानाय तथा चानन्तदारिद्यात् रक्षणस्य तारणस्य हेतोः तरवः प्रथिताः, सुशीतलच्छायाप्रदानेन सुमधुरफलदानेन च धर्मार्थकामान् प्रसाधयन्तः वृक्षाः प्रयत्नेन संरक्षणीया इति प्राचीनभारतीयशास्त्रेषु बहुभवेन प्रतिपादितम्, अधुना एकविंशति - शताब्द्याम् प्राणीजगतः प्रमुखापद् भवति परिवेशप्रदूषणं प्रमुख विषयस्य च अस्ति परिवेशसुरक्षा । परिवेशरक्षणाय वृक्षरोपणाय बहुविधाः प्रकल्पाः गृह्यन्ते भवन्ति। वृक्षाणां सर्वविधसंवर्द्धनाय परिपुष्ट्यर्थच भारतीय-पारम्परिक-विज्ञानरूपेण वृक्षायुर्वेदनाम्ना यत् विज्ञानं विविधेषु ग्रन्थेषु निहितं, तदधुना परिवेशम् प्रति वृक्षाणां महत्त्वं प्रति भारतीयप्राचीनमनीषिणाम् कीदृशी चिन्तासीत् तदेव प्रतिपादयति, वृक्षाणां रोपणाय, वर्धनाय, परिपुष्ट्यर्थं, रोगाणां निरुपणेन तेषामुपशान्तये तथा विहारोपवननिर्माणविधानमधिकृत्य यत् विज्ञानं तस्य एका परम्परा वैदिककालादारभ्य संस्कृतभाषया विरचितषु ग्रन्थेषु तत्र उपलभ्यते । विशेषतः सुरपालविरचितेवृक्षायुवेदे ग्रन्थे अनवद्यायं वृक्षस्य विविधज्ञानविज्ञानमालोचितम् । अस्य ज्ञानेन दात्राः भारतीयकृषि परम्परविषये तथा च उद्यानरोपणविन्यासे सम्यक् ज्ञानं प्राप्स्यन्ति तथा च वृक्षाणां रोपणे संवद्धने च अनुरागिणः भविष्यन्ति ।

सर्वविधतरूणां रोपणफलम् -

अन्यान् सर्वतरून रोप्य फलपुष्पोपयोगिनः

रत्नधेनुसहस्रस्य फलं प्राप्नोति मानवः।

फलपुष्पप्रदायिनः अन्यान् सर्वान् तरून् संरोप्य मानवः रत्नधेनुसहस्रस्य फलं प्राप्नोति ।

**उपसंहृतिः**

वृक्षायुर्वेदविज्ञानस्य एका परम्परा भारतवर्षे आसीत् । एतस्मिन् विषये प्राचीनाचार्याणां ग्रन्थान् आधारीकृत्यैव सुरपालः वृक्षायुर्वेदं रचितवान् । वैदिकसंहितातः प्रारभ्य वृक्षाणां महत्त्वं महाभारते रामायणे पुराणादिषु वरहमिहिरस्य बृहत्संहितायां समुपलभ्यन्ते । सुरपालेन विरचिते वृक्षायुर्वेदे तरुमहिमात् आरम्भ्य वृक्षाणां कीदृशरोपणेन अन्नादिनिष्पत्ति: पर्यन्तं वर्ण्यते ।

★★★★★

## भारतस्य प्राचीनशिक्षाव्यवस्था

**शुभलक्ष्मी रायगुरु**

शिक्षाशास्त्रिद्वितीयवर्षम्

प्राचीनसमये अस्माकं देशे शिक्षायां बहु दृष्टिरासीत्। तस्मिन् काले तु ज्ञानवन्तः ऋषयः साक्षात् मंत्रद्रष्टारः आसन् । तत्र च तेजस्विनः ज्ञानंप्रति सर्वदा सचेष्टाः ज्ञानस्य च प्राप्तये सर्वदा क्रियाशीलाः, आध्यात्मिक-उन्नतिशीलाः आसन् । तस्मात् कारणात् आध्यात्मिकवशादेव ते साक्षात् वेदस्य श्रवणं मननं निदिध्यासनं च कुर्वन्तः आसन्। वैदिकाः ऋषयः वेद इति पदस्यार्थं लक्षणं च प्रतिपादयन्तः वदन्ति - वेत्ति सृष्टितत्वमनेनेति, वेद-शब्दसामान्योऽर्थः। अथवा विद् धातोः करणे घञि प्रत्यये कृते निष्पन्नोऽवेदार्थः। वेद्यन्ते ज्ञाप्यन्ते धर्मार्थकाममोक्षा येनासौ वेदः इति । तथा च इष्टप्राप्तिरनिष्टपरिहारार्थं लौकिकाऽलौकिकोपायो येन ज्ञायते असौ ज्ञानराशिर्वेदः इति । एतानि सर्वाणि लौकिकाऽलौकिकानि तत्त्वानि चिन्तयन्तः सन् सर्वाणि अंधकारयुक्तानि तत्त्वानि – अपहाय प्रकाशपूर्णानि तत्त्वान्येव चिन्तयन्तः तेषां प्रकाशपुञ्जानां लोके प्रसारार्थं च सर्वदा क्रियाशीला आसन अलौकिकज्ञानमपि निःश्रेयससिद्धये च प्राप्तवन्तश्चासन्। तस्य च प्रभावः अस्माकं शिक्षापद्धतौ शिक्षाव्यवस्थायां च साम्प्रतमपि अवलोक्यते -

तत्र वेदलक्षणमित्यपेक्षायां 'मन्त्रब्राह्मणयोर्नामाधेयमिति आपस्तंबः'। मन्त्रब्राह्मणमित्याहुः इति बोधायनोऽपि। केचनाधुनिकास्तु मन्त्रभागमात्रस्यैव वेदत्वं, ब्राह्मणभागस्तु तदीयं व्याख्यानमस्ति इति स्वीकुर्वन्ति। तथाहि निरुक्तादि वैदिकग्रन्थः व्यापको भवति, तस्मात् प्राचीनोक्त वेदलक्षणमेव न्याय्यः स्वीक्रियते । तत्र च पादेश्च्छन्दोभिर्बद्धा ऋचः इति, नियताक्षरपदावसाना ऋक् इति लक्षणात्। अनियताक्षराणि, अपाद्बद्धानि यजूँषीति "द्वे वेदितव्ये पराचैवापरा च" इति विद्या भेदं संसूचयति अतः अस्मिन्नेव प्रसङ्गे परमात्मनः द्विविधं स्वरूपं ज्ञेयं भवति यथाहि-

**विद्याञ्चाविद्याञ्च यस्तद्वेदोभयं सह।**

**अविद्ययामृत्युं तीर्त्वा विद्ययाऽऽमृतमश्नुते॥**

इत्यस्मिन् स्थाने उवटमहीधराचार्यों व्याख्यातौ । यथा- अविद्योपदेशकर्मधर्मयोर्ज्ञानं यज्ञादि कर्मरूपं भवति । तैरमृतत्वस्य भागीभूत्वा पराभिर्ब्रह्मविद्याभिर्ज्ञानफलरूपाभिः नरः ब्रह्मरूपं लभते । अत एव उभयरूपज्ञानं साध्यसाधनरूपेण सिद्धो भवति । शिक्षा पदेन वर्ण स्वराद्युच्चारण प्रकारो यत्र व्यपदिश्यते सा शिक्षेति । तथाहि तैत्तिरीयोपनिषदि आरम्भे प्रतिपादयति-

"अथ शिक्षां व्याख्यास्यामः वर्णः स्वरः, मात्रा, बलं साम सन्तान इत्युक्तः शिक्षाध्यायः इति । किन्तु क्रमशः शिक्षापदं समग्रज्ञानविज्ञानादिव्यवस्थावाचकः अस्मिन् कोमलकठोरतंत्राभिधे समयेप्यस्ति । अतस्माभिः शिक्षा शब्दो व्यवहीयते। "अक्षणवन्तःकर्णवन्तः सखायोमनोजवेष्वसमा बभूवुः।" इयं ऋग्वैदिकी वाणी। अनया मनुजः क्वापि अपरात् श्रेष्ठो वर्तते यतः एतस्यातिरिक्तं हस्तोचक्षुर्वास्ति इति नायमर्थः अतएव सः श्रेष्ठो भवति यस्य बुद्धिः मस्तिष्कं शिक्षया विकासमानं भवति । अतः अधीत्य गुरुकुलात् बहिर्गच्छन्तं वटु आचार्यः उपदिशति "स्वाध्यान्नप्रमदितव्यम् " इति अध्यायनाध्यापनं कदापि क्वापि समाप्तिं न गच्छति, अपितु यावज्जीवनं चलति। अतः तस्मात् अध्ययन- अध्यापनमपि अस्माकं मुख्यं कर्म भवति। यथा कस्मैचित् छात्राय मोदकमेकं दीयते, सः

भुक्त्वा कालांतरे भोजनं विस्मरति । यदि तमेव छात्रं मोदकोत्पत्तिप्रक्रियायां मोदकनिर्माणरसवैशिष्ट्यमुपादेयत्वं च शिक्षयामः सः आजीवनं स्मरति । इदमेव अध्ययनाध्यापनमर्वाचीनकाले शिक्षेति शब्देन सूच्यते । पुरातने शिक्षाशास्त्रमिदं शास्त्राणामभिन्नाङ्गत्वेन सर्वेषां प्रासाङ्गिकमासीत् । निरुक्तादि ग्रन्थेषु शिक्षण विचाराः अतिसूक्ष्मतया वर्णिताः सन्ति । ऋग्वेदे विद्याब्राह्मण संवाद गुरुशिष्य संदर्भ व अतीव स्वाभाविकीप्रक्रिया अवलोक्यते । ऋमुखेनैव साख्यायिका वर्तते, यस्य संक्षेपेण प्रतिपाद्यते तथाहि-

**विद्याहवे ब्राह्मणमाजगाम गोपायमा शेवधिष्टेऽहमस्मि ।**

**असूयकायानृजवेवताय न मा ब्रूयाः वीर्यवती तथा स्याम ।**

एतदेवाभिप्रायं मनुः प्रतिपादयति -

**विद्याब्राह्मणमेत्याह शेवधिष्टेऽस्मि रक्षमाम् ।**

**असूयकाय मां मादास्तथा स्यां वीर्यवत्तमाः ।।**

अस्यार्थः विद्याधिस्ठात्रीदेवी ब्राह्मणेभ्यो वदति-तव अहं शेवधिर्निधिरस्मि मां रक्ष । केभ्यः प्रश्नेचोपस्थिते असूयकाय येदानात् विमुखाः, निंदकाः तेभ्यो दानान्मां रक्षेति । एवं प्रकारेण रक्षिताहं तव तयोचितामभिलाषांपूरयामिति । उपर्युक्तप्रसंगे विद्याब्राह्मणसम्बादे यादृशं सारगर्भितं मनुना व्यनक्ति तत्रैव छात्रस्य नियमानपि ब्रूते । वितथं अनृतं अपुरुषार्थभूतं लौकिकवाक्यम् । तद्विपरीतं सत्यं वेदवाक्यं अवितथम् । तादृशेन वाक्येन आचार्यः, छात्रस्य कर्णौ आतृणोति कर्णौ पूरयति । यः सदा वेदं श्रावयति किं कुर्वन्, अटुः रवं कुर्वन्, मदस्य ब्रह्मचारिणः "पच्छोधर्चशः आदौ अर्धर्चमर्थं वा ग्रहीतुमशक्तस्य यथा कष्टं न भवति तथा पादैकदेशं वा ग्राह्यन्, किन्तु अमृतं देवजन्मनो मोदास्य वा प्रापकत्वादमृतं वेदार्थः तस्यापदेशं कुर्वन् तं तादृशमाचार्यं शिष्यो मुख्यमातृपितृरूपं मन्येत् । एवं विधस्य मनुष्यजन्मनः देवत्वं प्रापकस्य कदाचिदपि द्रोहं नैव कुर्यात् ।

★★★★★

## महाराणाप्रतापस्य जीवनम्

**सागर गौतमः**

शिक्षाशास्त्रिद्वितीयवर्षम्

### प्रारम्भिकजीवनम्

महाराणाप्रतापस्य जन्म 1540 वर्षे मई मासे 9 दिनाङ्के कुम्भलगढदुर्गे अभवत् । महाराणा प्रतापस्य मातुः नाम जयवन्तबाई, सा पालीनगरस्य सोनागर अखैराजस्य पुत्री आसीत् । महाराणा प्रतापः बाल्यकाले किका इति नाम्ना आहूतः आसीत् । महाराणाप्रतापस्य राज्याभिषेकः गोगुण्डे अभवत् । बाल्यकालात् एव महाराणा प्रतापः साहसी, वीरः, स्वाभिमानी, स्वातन्त्र्यप्रेमी च आसीत् । १५७२ तमे वर्षे मेवाड़-सिंहासनम् आरुह्य एव तस्य अपूर्व-कष्टानां निवारणं कर्तव्यम् आसीत्, परन्तु धैर्येन, साहसेन च सः प्रत्येकं विपत्तिं सम्मुखीकृतवान् ।

हल्दीघाट्यां मुगलानां विशालसैन्येन सह तस्य घोरं युद्धम् अभवत् । तत्र यत् शौर्यं दर्शितवान् तत् भारतीय-इतिहासस्य अद्वितीयम् अस्ति, सः स्वपितृणां राणा उदयसंङ महोदयानां गौरवस्य च रक्षणं कृतवान् । यावत् सः स्वराज्यं मुक्तं न करिष्यति तावत् राज्यस्य सुखं न भोक्ष्यामि इति प्रतिज्ञां कृतवान् । ततः परं सः भूमौ निद्रां कर्तुम् आरब्धवान्, सः कष्टं प्राप्य अरवल्ली-वनेषु भ्रमति स्म । परन्तु मुगलसम्राट् इत्यस्य अधीनतां न स्वीकृतवान् । सः स्वमातृभूमिरक्षणार्थं स्वप्राणान् त्यक्तवान् । महाराणाप्रतापः बाल्यकाले एव कवच-खड्ग-प्रयोगस्य प्रशिक्षणं प्रारब्धवान् यतः तस्य पिता तं स्वसदृशं कुशलं योद्धां कर्तुम् इच्छति स्म । बालप्रतापः अल्पवयसि एव स्वस्य अदम्यशौर्यं प्रदर्शितवान् आसीत् । यदा सः बालकैः सह क्रीडितुं बहिः गच्छति स्म तदा संभाषणे एकं दलं निर्माति स्म । दलस्य सर्वैः बालकैः सह सः कवचस्य खड्गस्य च अभ्यासं करोति स्म । अतः सः शस्त्रप्रयोगे प्रवीणः अभवत् । कालः शनैः शनैः व्यतीतः। दिवसाः मासाः, मासेषु वर्षेषु च परिणताः । तदनन्तरं प्रतापः शस्त्रसञ्चालने निपुणः अभवत्, तस्य आत्मविश्वासं दृष्ट्वा उदयसिंहपुले स्वं नियन्त्रयितुं न शक्तवान् ।महाराणाप्रतापस्य ऊर्ध्वता सार्धसप्तपादः, भारः ११० किलोग्रामः च आसीत् । तस्य रक्षात्मककवचस्य भारः ७२ किलोग्रामः, शूलस्य भारः ८० किलोग्रामः च आसीत् । सः कवच-शूल-खड्ग-आदिभिः सह मिलित्वा २०० किलोग्रामाधिकं भारं वहन्तः युद्धं करोति स्म । अद्यत्वे अपि उदयपुरराजपरिवारस्य संग्रहालये महाराणाप्रतापस्य कवचः, खड्गः इत्यादयः सुरक्षिताः सन्ति ।

**हल्दीघाटीयुद्धम्**

हल्दीघाटीयुद्धं भारतस्य इतिहासे एकः प्रमुखः प्रकरणः अस्ति । एतत् युद्धं १५७६ तमे वर्षे जूनमासस्य १८ दिनाङ्के प्रायः ४ घण्टापर्यन्तं अभवत्, यस्मिन् मेवाद्-मुगलयोः मध्ये घोरं युद्धम् अभवत् । महाराणाप्रतापस्य सेनायाः नेतृत्वं एकमात्रः मुस्लिमः सरदारहकीमखानसूरी आसीत् । मुगलसेनायाः नेतृत्वं मनसिंहः, असफखानः च आसीत् । अस्मिन् युद्धे महारणप्रतापस्य कुलम् 20000 राजपूतानां सम्मुखी, अकबरस्य कुलम् 80000 मुगलसेना आसीत्, यत् अद्वितीयं वस्तु अस्ति। अनेकाः समस्याः सम्मुखीकृत्य अपि महाराणप्रतापः न त्यक्तवान्, स्वस्य शौर्यं च दर्शितवान् । अतः एव अद्य इतिहासस्य पृष्ठेषु तस्य नाम प्रकाशते। केचन इतिहासकाराः मन्यन्ते यत् हल्दीघाटी-युद्धे विजयः नासीत्, परन्तु यदि वयं पश्यामः तर्हि केवलं महाराणाप्रतापः एव विजयं प्राप्तवान् ।

**अश्वः चेतकः**

महाराणाप्रतापस्य वीरत्वेन सह तस्य चेतकनामकस्य अश्वस्य वीरता अपि विश्वप्रसिद्धा अस्ति । चेतकः अतीव बुद्धिमान् वीराश्वः आसीत्, यः स्वप्राणान् अपेक्षया स्थापयित्वा २६ पादगंभीरायाः नदीतः कूर्दनं कृत्वा महाराणाप्रतापस्य उद्धारणं कृतवान् । चेतकस्य मन्दिरम् अद्यापि हल्दीघाटीनगरे निर्मितम् अस्ति ।

राजस्थानस्य अनेके परिवाराः अकबरस्य सत्तायाः अधीनाः अभवन्, परन्तु महाराणा प्रतापः स्ववंशस्य निर्वाहार्थं संघर्षं कुर्वन् आसीत्, अकबरस्य समक्षं शरणं न कृतवान्, दुर्गते परिस्थितौ स्वपत्न्याः बालकस्य च समीपे स्थापयित्वा अपि सः कदापि धैर्यं न त्यक्तवान् । दानवीरभामाशाहः धनस्य अभावात् सेनायाः क्षीणमानस्य मनोबलस्य पुनरुत्थानाय स्वस्य सम्पूर्णं निधिं समर्पितवान् । तथापि महाराणा प्रतापः अवदत् यत् सैन्य-

आवश्यकताम् अपि विहाय अहं भवतः कोषस्य एकं रूप्यकम् अपि न इच्छामि। अकबरस्य मते :- महाराणा प्रतापस्य साधनं सीमितम् आसीत्। परन्तु तदपि सः न नमति स्म, भयभीतः न अभवत्।

हल्दीघाटीयुद्धात् परं महाराणाप्रतापः समयं पर्वत-वनेषु व्यतीतवान्। सः स्वस्य पर्वतयुद्धनीत्या अकबरं बहुवारं पराजितवान्। यद्यपि महाराणाप्रतापस्य वनेषु, पर्वतेषु च निवसन् अनेकविधकष्टान् सम्मुखीकृत्य स्थितः आसीत्, तथापि सः स्वस्य आदर्शान् न त्यक्तवान्। महाराणाप्रतापस्य प्रबलेच्छया अकबरस्य सेनापतीनां सर्वान् प्रयत्नाः विफलाः अभवन्। तस्य धैर्यस्य साहसस्य च प्रभावः अभवत् यत् ३० वर्षाणां निरन्तरप्रयत्नानामपि अकबरः महाराणाप्रतापं बन्दीम् कर्तुं न शक्तवान्। महाराणाप्रतापस्य प्रियतमः अश्वः 'चेतक' आसीत्, यः अन्तिमश्वासपर्यन्तं स्वामिनः समर्थनं कृतवान्। राज्याभिषेकः महाराणा प्रतापस्य राज्याभिषेकः गोगुण्डे अभवत्। राणाप्रतापस्य पिता उदयसिंहः अकबरस्य भयात् मेवारं त्यक्त्वा अरवल्लीपर्वते शिबिरं कृत्वा उदयपुरं स्वस्य नूतनराजधानीम् अकरोत्। यद्यपि तदा मेवाड् अपि तस्य अधीनम् आसीत्। महाराणा उदयसिंहः तस्य मृत्युसमये स्वस्य अनुजपुत्राय सिंहासनं समर्पितवान् आसीत्, यत् नियमविरुद्धम् आसीत्। उदयसिंहस्य मृत्योः अनन्तरं राजपूतप्रमुखाः मिलित्वा १६२८ फाल्गुन शुक्ल १५ अर्थात् १ मार्च १५७६ दिनाङ्के महाराणा प्रतापं मेवाड़स्य सिंहासने स्थापितवन्तः।

★★★★★

## श्री नारायणपट्टपादेन कृतं नारायणीयम्

**काव्या पी यू**

शिक्षाशास्त्रिद्वितीयवर्षम्

केरले प्रसिद्धं स्तोत्रकाव्यं भवति श्रीमन्नारायणीयम्। काव्यस्यास्य कर्ता भवति संस्कृतपण्डितेषु निपुणः श्री मेल्पत्तूर् नारायणभट्टपादः। भट्टपादस्य अन्यः व्याकरणग्रन्थः अस्ति प्रक्रियासर्वस्वम्। नारायणीयाख्यं स्तोत्रकाव्यं भक्तिरसप्रधानः वर्तते। काव्यमिदं 1587 तमे वर्षे लिखितवान्। अच्युतपिषारटिमहोदयस्य प्रियशिष्यः अस्ति।

श्री नारायणभट्टपादः तस्य आचार्यस्य वातरोगं स्वयमेव सः स्वीकृतवान्। अनन्तरं किं कर्त्तुं शक्यते इति मत्वा मलयालभाषायाः पिता 'तुञ्जत्त् रामानुजन् एषुत्तच्चन्' - तस्य समीपं गतवान्। तस्मिन् समये सः उपदेशं दत्तवान् यत् - मत्स्यावतारतः दशावताराणां कथां रचयतु इति। तेन श्रीमद्भागवतपुराणात् दशावतारकथां रचितवान्। अतः भागवतस्य संग्रहः एव अस्ति इदं काव्यम्। एवमेव एकैकं कथां संङ्गृह्य शतं दशकं श्लोकरूपेण लिखित्वा समर्पितवान्। चतुस्त्रिंशदुत्तरैकसहस्रश्लोकाः सन्ति। शतं दशकं गुरुवायूर् मन्दिरे उपविश्य शतं दिवसैः रचितवान्।शततमे दिने सः रोगमुक्तः अभवत्।

प्रत्येकं दशकस्य अन्ते रोगशमनाय गुरुवायुर्-परेशं प्रार्थनां करोति । यथा-" निरुन्धि वातालयवासविष्णो"। एकैकं दशकस्य भिन्नभिन्ननामानि सन्दर्भोचितं निर्दिष्टवान् । अलङ्काराः छन्दांसि च एवमेव प्रयुक्तवान् । तस्य रोगः स्ति चेदपि सः अत्यन्तम् आनन्देनैव सः श्लोकान् लिखितवान् ।

सान्द्रानन्दावबोधात्मकमनुपमितं......." इति पङ्क्त्या काव्यमारभ्यते । श्रग्धरा छन्दसि एव प्रथमदशकं लिखितम् । दश श्लोकाः वर्तन्ते । अस्य दशकस्य नाम 'भगवत् स्वरूपमहत्वम्' इति। अथ द्वितीयदिने भक्तिमहत्वमधिकृत्य वर्णितवान्। तृतीयदिने तस्य रोगः अधिकः जातः। अतः भक्तिं वर्धयितुमेव दशकम् । भक्तिप्रार्थना इत्येव दशकस्य नाम भवति। तस्मिन् एकंः महत्वपूर्णं तृतीयं श्लोकं रचितवान् । तद्यथा -

"विधूयक्लेशान्मे कुरुचरणयुग्मं धृतरसं भवत्क्षेत्रप्राप्तौ करमपि च ते पूजनविधौ ।

भवन्मूर्त्यलोके नयनमथ ते पादतुलसी- परिघ्राणे घ्राणं श्रवणमपि ते चारुचरिते।।"

अर्थात् मम हस्तौ भगवतः पूजनं कर्तुं श्रवणेन भगवतः कथां श्रोतुं, घ्राणेन पूजाप्रसादाः तुलसीपुष्पादिकं घ्राणं कर्तुं, अक्षिणा भगवत् स्वरुपं द्रष्टुं च आशीर्वादप्राप्तये ईश्वरं प्रार्थयति । इदम् अस्माकमपि प्रार्थना भवति । अम्बरीषचरितम्, गजेन्द्रमोक्षम्, कुचेलवृत्तम्, रासक्रीडा,उलूखलबन्धनम् इत्यादि विविधाः आनन्ददायकः कथाः अत्यन्तसरलतया वर्णिताः ।

शैक्षिकदृष्ट्या किञ्चित् पश्यामश्चेत् क्वचित् व्याकरणं, साहित्यं, साङ्ख्यं च अत्र अन्तर्भवति । व्याकरणे विविधाः प्रत्ययाः प्रयुक्ताः, तेषु 'णमुल् प्रत्ययः केषुचित् श्लोकेषु दृश्यते -

१. " अहं गायं गायं कुहचनविवत्स्यामि विजने ..1"(3/2)

२. "पायं पायमुदैरयो बहुजगत्....।"(25/6)

एवं च साहित्यदिशा अनेकाः अलङ्गाराश्च प्रयुक्ताः।

अनुप्रासालङ्गारः विविध दशकेषु दृश्यते ।

यथा- १." केलिभेदपरिलोलिताभिरतिलालिताभिरलालिभिः" । (69/10)

२."प्रक्षुद्योद्यानमक्षक्षपणचणरणः .." । (35/3)

कपिलोपदेशाख्यं दशके साङ्ख्यविषये प्रदिपादितः यथा-

प्रकृतिमहदहङ्गाराश्च मात्राश्च भूतान्यपि...।" (15/2)

एवम् अनेके दीर्घसमासाः,, कथासन्दर्भानुगुणं यथोचितं छन्दांसि च श्लोकेषु द्रष्टुं शक्यते । संस्कृते स्पष्टोच्चारणं सम्बादयितुं प्रतिदिनं पारायणं कर्तव्यम् । रोगमुक्त्यर्थं अत्युत्तमं काव्यमस्ति। भट्टपादस्य सङ्ग्रहणपाठवमपि काव्यात् अवगच्छति। सः अन्तिमे दिवसे रोगमुक्तिं प्राप्तवान्। "इदमिह कुरुतामायुरारोग्यसौख्यम्.. । इति प्रार्थनया काव्यं समाप्यते।

★★★★★

# प्रभावीपठनम्

**श्रीकान्तः के.पि.**

शिक्षाशास्त्रिद्वितीयवर्षम्

प्रभावीरूपेण पठनस्य अर्थः अस्ति यत् लिखितग्रन्थस्य अवगमनं, मूल्याङ्कनं , चिन्तनं च कर्तुं साहाय्यं करोति इति। यथा वयं अनुमानं कुर्मः महाविद्यालयस्य छात्राणां कृते एतानि कौशलानि अतीवमहत्वपूर्णानि सन्ति । वयं कस्मिन्नपि क्षेत्रे गत्वा बहु पठनं करिष्यामः । वयं यदा यदा अधिकं प्रभावी रूपेण पठामः तदा तदा सुलभं भविष्यति, न्यूनः समयः भविष्यति अनुभवस्य आनन्दं च अधिकतया प्राप्नुमः।

अस्मिन् पत्रे विभिन्नानि पठनप्रविधयः अवलोकिताः सन्ति, यत्र तन्त्राणां कार्यान्वयनार्थं कार्यानुष्ठानपदार्थाः अपि सन्ति । कतिपयानि तन्त्राणि पश्यामः । यथा SQ3R , स्किम्मिंग्, स्कान्निंग्, सत्क्रियापठनं , विस्तृतपठनम् इत्यादयः ।

## 1- SQ3R उपायः

SQ3R इत्यस्य नामकरणं तस्य पञ्च चरणानां नामधेयेन कृतमस्ति - सर्वेक्षणं , प्रश्नं , पठनं, पाठनं, समीक्षा च । पठन विधिः अवगमनाय स्मृता य च महान् अस्ति।

**सर्वेक्षणम्** - SQ3R तन्त्रस्य एतत् प्रथमं सोपानं भवतः मनः सामग्रीं प्राप्तुं सज्जं करोति। सर्वेक्षणं समग्र सामग्रीणां शीघ्रं विचारः भवति।

**प्रश्नः** - एतत् सोपानं प्रश्नानां सज्जीकरणस्य विषयः अस्ति येषाम् उत्तराणि भवन्तः पठन् सामग्रीन् प्राप्नयः।

**पठनम्** - SQ3R इत्यस्य उपायस्य तृतीयपदार्थरूपेण पठनं सामग्रीं साक्षात् पठनस्य अपेक्षया अधिकं उत्पादकं भवति । यतोहि भवतः मनसि तस्य उत्तराणि अन्विष्य तस्य विचारः पूर्वमेव भविष्यति।

**पाठनम्** - अत्रैव भवन्तः पठनस्य आरम्भात् पूर्वं निर्मितानां प्रश्नानाम् उत्तराणि ददाति। पठितं पाठितं पचयित्वा तस्य अर्थः कृत्वा प्रश्नानाम् उत्तराणि प्राप्य पाठावगमनं सहायकं भवति ।

**समीक्षा** - एतत् केवलं भवता पठिनं कियत् स्मर्यते इति मानसिकी टिप्पणी करणीया। एवं च एतत् पदं सर्वं धारणविषयमेव ।

## 2-सत्क्रियापठनम्

सत्क्रियापठनम् एकः मार्गः अस्ति यः अवगमनम् धारणं च साहायकं भवति। पठन वस्तुना सह सम्लग्नाता अन्तर्भवति येन भवन्तः तत् अवगम्य स्वस्य आवश्यकतानुसारं मूल्यांकनं कुर्वन्ति।

**3- विस्तृतपठनम्**

विस्तृतपठनं प्रायः इत्यनेन आरभ्यते। प्रथमं भवन्तः सामग्रीं स्किं कुर्वन्ति। यत् तद् किमिति विचारः भवति। ततः भवन्तः सम्यक् पठन्ति।

स्किम्मिंग् इति पठनविधिः यस्य उपयोगेन सामग्रियः मुख्यसारं प्राप्तुं शक्यते। एते सर्वे पाठस्य एकं खण्डं शीघ्रं गमनस्य विषयः अस्ति। तथा च अवगमनस्य विषये न्यूनं न तु स्किम्मिंग् इति वेगपठनम् इति। वेगपठनेन बहु सूचनाः आच्छादिताः भवन्ति परन्तु स्किम्मिंग् केवलं शीघ्रसमये सूचनानां छादनं भवति। स्कानिंग् समीपगमने स्किम्मिंग् इत्यस्य सदृशम् अस्ति।अस्मिन् बोधस्य किमपि परीचर्यया विना शीघ्रं पाठस्य एकं खण्डं अवगमनम् अपि अन्तर्भवति। स्किम्मिंग् तथा स्कानिङ् इत्येतयोः मध्ये अन्तरम् उद्धेश्यतः एव भवति। यदा समग्रसामग्रीनां मुख्यविचारं प्राप्तुं स्किम्मिंग् क्रियते, तदा सामग्रीणां विशिष्टसूचनाः अन्वेष्टुं स्कानिङ् क्रियते। स्कानिङ् इति पठनविधिः यत् भवन्तः बहुषु परिस्थितिषु उपयोगिनो भवन्ति। एतादृशेषु एका परिस्थितिः पठनसामग्रीणां समीक्षां कृत्वा पठितस्य अवगमनं पुनः सजीवं कर्तुं शक्यते।

★★★★★

## राष्ट्रियशिक्षानीतिः 2020

**नरेश् एक्का**

शिक्षाशास्त्रिद्वितीयवर्षम्

गुणवत्तापूर्णप्रारम्भिकबाल्यविकासस्य परिचर्यायाः शिक्षायाः च सार्वभौमिकप्रावधानं 2030 तमवर्षपर्यन्तं प्राप्तव्यम्, येन सुनिश्चितं भवति यत् प्रथमश्रेणीयां प्रवेशं कुर्वन्तः सर्वे छात्राः विद्यालयसज्जाः सन्ति। 88% नवीनशिक्षानीतिः २०२० कदा प्रयोज्यः भविष्यति इत्यस्मिन् प्रमुखसुधाराः प्रचलन्ति। अधुना छात्राः 3, 5, 8 च विद्यालयपरीक्षां ददति। 10,12 कक्षायां बोर्डपरीक्षाः निरन्तरं भविष्यन्ति। परन्तु सर्वाङ्गविकासस्य प्रयोजनार्थं तस्य पुनर्निर्माणं भविष्यति। समग्रशिक्षाविकासाय ज्ञानस्य विश्लेषणम् प्रदर्शनमूल्यांकनम्, समीक्षा च इति नामकं नवीनं राष्ट्रियमूल्यांकनम् स्थापितं भविष्यति। विद्यालये षष्ठी कक्षातः गणितीयचिन्तनं वैज्ञानिकं कोडिंग् च आरभ्यते। व्यावसायिकशिक्षा 6 कक्षातः आरभ्यते यस्मिन् इण्टर्न्शिप् अपि अन्तर्भवति। 10 + 2 संरचनायाः स्थाने 5 + 3 + 3 + 4 इति नवीनव्यवस्थायां 12 वर्षाणां विद्यालयशिक्षणं भविष्यति।

तथा च UGC अध्यक्षः कथयति यत् कोविड-19 महामारी NEP 2022 इत्यस्य कार्यान्वयनम् प्रभावयति। किन्तु सः आश्वासयति यत् वयं निश्चिन्ताः स्मः यत् यदा स्थितिः सामान्या भवति तदा शीघ्रं कार्यान्वितं भविष्यति इति। २०३० तमे वर्षे अध्यापनार्थं न्यूनतमं शैक्षिकयोग्यता ४ वर्षीयः एकीकृतः बी.एड् पाठ्यक्रमः भविष्यति। शिक्षामन्त्री धर्मेन्द्र प्रधान महाभाग: अवदत् यत् नेक्-अन्तर्गतं आरक्षणमापदण्डस्य संशोधनस्य योजना

नास्ति। मेघालयस्य मुख्यमन्त्री उक्तवान् यत् सः नूतनशिक्षानीतेः कार्यान्वयनार्थं कार्यदलस्य निर्माणं करिष्यामि इति। तथा च एतादृशस्य बलस्य निर्माणानन्तरं मेघालयः देशस्य प्रथमं राज्यं भविष्यति।

१२ वर्षाणां विद्यालयशिक्षणे ३ वर्षाणां पूर्वस्कूल/अङ्गनवाडी च भविष्यति। ५ कक्षापर्यन्तं स्थानीयभाषा/क्षेत्रीयभाषा/मातृभाषया शिक्षणस्य माध्यमरूपेण एषा नीतिः महत्त्वं दास्यति । विद्यालये उच्चशिक्षायां च त्रिभाषासूत्रसहितं सर्वेषु स्तरेषु छात्राणां कृते संस्कृतं विकल्परूपेण अपि प्रवर्तयिष्यते । भारतस्य साहित्यादिशास्त्रीयभाषा अपि विकल्परूपेण उपलभ्यते । कस्यापि भाषायाः कृते कोऽपि छात्रः बाध्यः न भविष्यति। उच्चशिक्षायाः कृते समुचितप्रमाणपत्रेण सह बहुविधेषु कार्यक्रमेषु प्रवेशनिर्गमस्थानानि भविष्यन्ति । UG कार्यक्रमः 3 वा 4 वर्षाणां अवधिः भवितुम् अर्हति यस्मिन् अवधिमध्ये समुचितप्रमाणीकरमपि भविष्यति । यथा एकवर्षस्य अनन्तरं प्रमाणपत्रं, द्विवर्षेभ्यः परं उन्नतडिप्लोमा, त्रिवर्षेभ्यः अनन्तरं डिग्री तथा च चतुर्वर्षेभ्यः परं पाठ्यक्रमकार्यं स्नातकेन सह प्रदत्तं भविष्यति ।

